47 B3 M6 om. 47 (cf. v.l. 46 and 43 respy.). For sequence in B4, cf. v.l. 43. T1 M3 read 47^a twice. —^{a}) V3 शत्रु-; T1 M3 (both first time) शर- (for चक्र-). V2 * विशीर्ण-; B2.4 च निकृत्त-; D7 विनिकृंत- (for विनिकृत्त-). Ś Ñ1 V B1 D2.5.8.9.12 T3 -देहाः; T1 M3 (both first time) -गात्राश् (for -शीर्षाः). —^{b}) Ś2 संचू **** (moth-eaten); D1 3.4 संचूर्णिताश्चापि; M1 संघूर्णि° (for संचूर्णिताङ्गाश्च). —^{c}) Ś Ñ1 V1 B1.2 D1–4. 8.9.12 T3 च द्विधा; V2 D10.11 G1 M2.5.8.9 द्विविधा; V3 च गदा-; B4 विविधैर्; M1.7 विविधा; M3 बहुभिर्; M4 विविधं; Cg.k.t as in text (for बहुधा). V2 D6.7.10.11 Cg.t विभिन्नाः; B2.4 विमुक्ताः; Ck as in text (for विभक्ताः). —^{d}) D1 शिला (unmetrical) (for शैला). M3 वज्रभिन्नाः (for राक्षसेन्द्राः). —After 47, M3 ins.:

128* वायुप्रभग्ना इव वृक्षषण्डाः
संछिन्नगात्रा युधि राक्षसेन्द्राः ।

—Then M3 cont.; T1.2 G1.3 ins. after 47:

129* निरन्तरं देवगणैश्च दृष्टाः.

—After 47, D6.7.10.11 T1 G1 (T1 G1 preceded by 129*) M6 read 50.

48 V2 B3 D6.7.10.11 T1 G1 M6 read 48–49 after 42. —^{a}) Ñ2 B D1.3.4 चक्रोत्कृत्त-; D6.7.10 चक्रकृंत-. Ś Ñ1 V D2.5.8.9.12 T3 चक्रविच्छि (V3 °प्रभि; T3 °विभि) न्नशिरसो. —^{b}) D3 -संचूर्णित- (for -संचू°). —D5 om. 48^c–49^b. D7 om. 48^{cd}. —^{c}) B2.3 M5 लांगूल-. Ñ2 B1.3 -[आ]कर्षित-; B2.4 -[आ]कलित-; D1.3.4 -[अ]ग्रहत-; G2 -ग्लापित-; M2 -[उ]न्मथित-; M6 -ग्लावित-; Ck as in text (for -ग्लपित-). Ś Ñ1 V D2.8 9 12 T3 लांग (D2 °गू) लैर्दोरि- (V2 °लैः कर्षि) तग्रीवाः; G1 लांगलाभिहताश्चान्ये. ❀ Ck: तदा क्षितिरित्यादिक एक श्लोकः क्वचिदस्ति तदव्याख्येयम्। असंगतस्वरूपत्वात्. ❀

49 Ñ1 D5 om. 49^{ab} (for D5, cf. v.l. 48). D9 om. 49–50^b. For sequence in V2 B3 D6 7.10.11 T1 G1 M6, cf. v.l. 48. —^{a}) G1 भिन्नास् (for छिन्नास्). —^{b}) B1.2.4 D1.3.4 T1 M3.6 -पीडिताः; T2 - **ताः (for -ताडिताः). —For 49^{ab}, Ś V1.3 D2.8.12 T3 subst.:

130* असिभिर्बहुभिश्छिन्नाः शरसंभिन्नवक्षसः ।

[T3 बहुधा (for °भिश्). V3 -मस्तकाः (for -वक्षसः).]

—^{c}) Ś Ñ1 D2.5.8.12 V3 निपतंति. V2 B असुरास् (for अम्बरात्). V1.3 निपतंति च ते (V3 °त्यपरे) तूर्णं.

50 D9 om. 50^{ab} (cf. v.l. 49). D6 7.10.11 T1 G1 M6 read 50 after 47. —^{a}) Ś1 V3 D1.2.4.5.8.12 T3 G1.2 M1.2.4.5.9.10 तदंबरं; Ñ B3.4 D3 M7 ततोंबरं (Ñ1 B4 °राद्); V2 ततोसुराः; B1 ततः सुराः; T1.2 G3 तदा (T2 °था) क्षितिर्; M6 ततोंबरे; M8 ** बरं (for तदाम्बरं). Ñ2 V2 B1.3.4 M6 प्रच्युत- (for विगलित-). B2 ततो लसच्चारु सु-; D6.7.10.11 विलंबमानैर्मणि- (for तदाम्बरं विगलित-). —^{b}) Ś2.3 अमित-; B2 मीन- (for नील-). —^{c}) V1 D6 7.9 निपात्यमानं. Ś D2.8 9.12 ददृशुर् (for ददृशे). M8 निशांतरं (sic) (for निरन्तरं). —^{d}) Ñ2 V2.3 विशीर्यमाणैर् (for निपात्यमानैर्).

Colophon. —*Sarga name*: Ś D1–5.8.9.12 राक्षसभंगः; Ñ1 मालिवधो राक्षसभंगः; Ñ2 V2 B D7 मालिवधः; V1 राक्षसवधः; V3 राक्षसोत्सादनं. —*Sarga no.* (figures words or both): Ś Ñ1 V2.3 B1.2 D2.4.12 om.; V1 5; D3.9 6. —After colophon, G M1.5.8 conclude with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

Arya Research Team

८

G. 7 8. 1
B. 7 8. 1
L. 7 7. 1

हन्यमाने बले तस्मिन्पद्मनाभेन पृष्ठतः ।
माल्यवान्संनिवृत्तोऽथ वेलातिग इवार्णवः ॥ १
संरक्तनयनः कोपाच्चलन्मौलिर्निशाचरः ।
पद्मनाभमिदं प्राह वचनं परुषं तदा ॥ २
नारायण न जानीषे क्षत्रधर्मं सनातनम् ।
अयुद्धमनसो भग्नान्योऽस्मान्हंसि यथेतरः ॥ ३
पराङ्मुखवधं पापं यः करोति सुरेश्वर ।
स हन्ता न गतः स्वर्गं लभते पुण्यकर्मणाम् ॥ ४
युद्धश्रद्धाथ वा तेऽस्ति शङ्खचक्रगदाधर ।
अहं स्थितोऽस्मि पश्यामि बलं दर्शय यत्तव ॥ ५
उवाच राक्षसेन्द्रं तं देवराजानुजो बली ।
युष्मत्तो भयभीतानां देवानां वै मयाभयम् ।
राक्षसोत्सादनं दत्तं तदेतदनुपाल्यते ॥ ६

8

☞ T4 missing for Sarga 8 (cf. v.l. 7.1). D12 begins with ॐ.

1 ^{a}) Ñ1 हन्यमान-. B2 चैव; M4.7 तूर्णं (for तस्मिन्). —^{b}) B1 युध्यता (for पृष्ठतः). —^{c}) Ś2.3 B3 D3.5.6 M6 स (for सं-). V1 D2 -प्रवृत्तो (for -निवृत्तो). Ś D2.8.9.12 [ऽ]भूद् (for ऽथ). B2.4 अपि संवृत्तो; G (ed.) संनिवृत्याथ. —^{d}) V3 D7.10.11 T1.2 G3 M5 Ck.t (all except T1 with hiatus) वेलामेत्य; B2 °भिग; D6 °गतिर्; G2 M10 °तीत (for वेलातिग). T1 यथा (for इव). G1 वेलामिव महार्णवः. ❀ Ck: एत्य इवेति। असंधिश्छान्दसः।; so also Ct. ❀

2 T3 om. 2^{ab}. —^{a}) M1 स (for सं-). D3 -नयनं. Ś2 D6–7.10.11 M5 क्रोधाच् (for कोपाच्). —^{b}) D1.4 चलन्मूर्तिर्; D5.7 T1.2 G2 M2.5–9 चलमौलिर्. B2 निशाचरैः. —^{d}) D5 तथा (for तदा). D1.3.4.6.7.10.11 T1.2 G M पुरुषोत्तमं; T3 परुषाक्षरं (for परुषं तदा).

3 ^{b}) Ñ2 क्षात्रं; V1.3 B1 D10.11 G1 क्षात्र-; B2 D5 क्षेत्र-. D6.7.10.11 पुरातनं (for सनातनम्). —^{cd}) M3 अयत्न- (for अयुद्ध-). Ck.t योस्मान् (as in text). Ś1 B1 D8 यस्माद्भग्नान्; Ś2.3 D12 [ऽ]प्यस्मान्भग्नान्; Ñ1 V1.3 D2.5.9 T3 M9 योस्मान्भग्नान् (by transp.); Ñ2 V2 B2–4 D1.3.4 M6 यन्नो(D1.3.4 यस्त्वं) भग्नान्; D6.7.10.11 T1.2 G1.3 M3.5 भग्ना(D6.7.10.11 भीता)नस्मान्; G2 M10 भग्नान्हंसि. V1.3 D1.2.4.9 M6 हिंसि (sic); G2 M10 त्वं हि; Ck.t as in text (for हंसि). Ś2.3 B3 M6.7 यथेतराः(B3 °रे; M6 °रान्); D1 यथा नरः; M1 सुरेतरान्; M2 यथेरतः (meta.); M9 यथागतः; Cg.t as in text (for यथेतरः). G3 हिंसयसेतरां.

4 ^{ab}) Ś V1.3 D1.2.4.5.8.9.12 T3 नामः; D7 प्रायो (for पापं). Ñ2 B1.2 स हीतरः; T1.2 G1.2 M1–4.6–10 Ck [अ]सुरेतरः(M2.6 °र) (for सुरेश्वर). D3 पराङ्मुखान्वधस्यैतान्प्रचरोथ सुरेतर (sic). —V3 repeats 4^{cd} consecutively in marg. —^{c}) Ś Ñ V3 B D1–5.8.9.12 T3 G3 M4.6 न; V2 (second time) अ-; Ck.t as in text (for स). M8 om. न (subm.). Ś V1.3 D1.2.4 5.8.9.12 T3 M6 लभते; Ñ V2 (second time) B D3 T1 G2 M3.5 न(B1 ना-) हतः; G1 न गतिं; G3 निहतः (for न गतः). —D3 om. from स्वर्गं up to माल्यवन्तं in 131*. V1 पापं; G1 स्वर्ग्यां (for स्वर्गं). V2 (first time) न हंता स्वर्गं लभते. —^{d}) Ñ V2 (second time) B2–4 ते(B3 ये)न कर्मणा (for पुण्यकर्मणाम्). Ś V1.2(first time).3 D1.2.4.5.8.9.12 T3 कृतपुण्योपि नः श्रुतं; M6 पुनः पुण्येन कर्मणा. ❀ Cv: स हन्ता न गतः स्वर्गं लभते पुण्यकर्मणामिति पाठः। गतः मृतः।; Ck: स हन्ता पराङ्मुखहन्ता कालान्तरे.....हतः।; Ct: स हन्ता इतो देहाद्गतः सन्स्वर्गं न लभते। 'स हन्ता न हतः' इति पाठे हतः। दैवहत इत्यर्थः. ❀

5 D3 om. up to माल्यवन्तं in 131* (cf. v.l. 4). —^{a}) B3 युद्ध एव; D8 T3 युद्धे श्रद्धा. B3 (also) हि (for ते). V1 D7 M1 यथा(D7 °दा) तेः; D5 [अ]थ ते वा (by transp.) (for [अ]थ वा ते). Ñ1 युद्धाय ते यदि श्रद्धा. —^{b}) Ñ V2 M6 चक्रशार्ङ्ग-; B1–3 चक्रशंख- (by transp.). —^{c}) M1 स्थिरो (for स्थितो). B1 [ऽ]यं (for ऽस्मि). Ś Ñ V B3.4 D1.2.4.5.8.9.12 T3 M6 अयं(B3 स्वयं; D5 अत्र) स्थितोहं. Ś D2.8.9.12 देवेश; D1.4 पश्य त्वं; M6 पश्याद्य (for पश्यामि). —^{d}) Ś1 नः पुरः; Ś2.3 D12 सत्तमः; Ñ1 D2.9 यत्नतः; V1 तत्त्वतः; D5 G3 मे(G3 तु) तव; D8 नः पुनः; G1 तत्तव (for यत्तव). V3 बलं संदर्शयात्मनः; B1 बलं यत्तव दर्शय. —After 5, Ś1 Ñ V B D1.4.6.7.10.11 T1–3 G M ins.; D3 ins. before 6:

131* माल्यवन्तं स्थितं दृष्ट्वा माल्यवन्तमिवाचलम् ।
[D3 om. माल्यवंतं. D6 श्रीमान् (for दृष्ट्वा).]

6 Before 6, D3 ins. 131*. —^{b}) Ś V1.2 B D1–5.8.9.12 दै(V2 B1 D1–5 दे)वतेंद्र-; Ñ1 देवेंद्रस्य (for देवराज-). Ñ2 देवेंद्रावरजो बली. —^{c}) Ś Ñ1 V1.3 D2.5.8.9.12 T3 भवद्भयो (for युष्मत्तो). —The portion of the text from 6^{d} up to गान in 7.9. 6^{b} is lost in T2 on a missing folio. —^{d}) V1 तु; T1 G3 च (for वै). Ś Ñ1 V3 D2.5.8.9.12 T3 देवतानां; Ck.t as in text (for देवानां वै). Ś3 V1.3

प्राणैरपि प्रियं कार्यं देवानां हि सदा मया ।
सोऽहं वो निहनिष्यामि रसातलगतानपि ॥ ७
देवमेवं ब्रुवाणं तु रक्ताम्बुरुहलोचनम् ।
शक्त्या बिभेद संक्रुद्धो राक्षसेन्द्रो ररास च ॥ ८
माल्यवद्भुजनिर्मुक्ता शक्तिर्घण्टाकृतस्वना ।
हेरुरसि बभ्राज मेघस्थेव शतह्रदा ॥ ९
ततस्तामेव चोत्कृष्य शक्तिं शक्तिधरप्रियः ।
माल्यवन्तं समुद्दिश्य चिक्षेपाम्बुरुहेक्षणः ॥ १०
स्कन्दोत्सृष्टेव सा शक्तिर्गोविन्दकरनिःसृता ।
काङ्क्षन्ती राक्षसं प्रायान्महोल्केवाम्बनाचलम् ॥ ११
सा तस्योरसि विस्तीर्णे हारभासावभासिते ।
अपतद्राक्षसेन्द्रस्य गिरिकूट इवाशनिः ॥ १२
तया भिन्नतनुत्राणः प्राविशद्विपुलं तमः ।
माल्यवान्पुनराश्वस्तस्तस्थौ गिरिरिवाचलः ॥ १३
ततः काञ्चनायसं शूलं कण्टकैर्बहुभिश्चितम् ।
प्रगृह्याभ्यहनद्देवं स्तनयोरन्तरे दृढम् ॥ १४

G. 7. 8. 15
B. 7. 8. 15
L. 7. 7. 14

D1.3.4 M2 महा- ; Ck.t as in text (for मया). Ñ2 V2 B अभयं मया (for वै मयाभयम्). —e) Ś1 D8 L (ed.) -[उ]च्छेदनाद् (L [ed.] °नं) ; Ś2.3 V2 B1.4 D12 -[उ]च्छादनाद् (V2 °नं) ; Ñ1 B2.3 D2.3 -[उ]त्सादनाद् ; D1.4.5 9 T3 M9 -[उ]त्साद्ने (for -[उ]त्सादनं). Ś1.2 Ñ1 भूतं; D3 वृत्तं; M7 दत्तं (for दत्तं). G3 राक्षसेभ्यो वरं दत्तं. ❀ Cv : देवानां वै.....भयमिति पाठः। भयविशेषणं राक्षसोत्सादनमित्येतत्. ❀ —f) D10 तदेव तद् (hypm.) ; T1 G1.3 M1.3 तथा तद्; Ct as in text (for तदेतद्). B2 न च (for अनु-) G2 M8 -बध्यते; Ck.t as in text (for -पाल्यते).

7 T2 missing for 7 (cf. v.l. 6). —a) B2 बाणैर् (for प्राणैर्) and हितं (for प्रियं). —b) Ś1.3 Ñ V B D1-5.8.9.12 T3 देवतानां. Ś1.3 Ñ1 V1.3 D1-4.8.9.12 T3 G1.3 मया सदा (by transp.) ; D5 T1 मया सह; M7 सदा मम (for सदा मया). M6 देवानां हितकाम्यया. —c) M7 यो (for सो). Ś2.3 [ऽ]यं (for ऽहं). Ś D8.12 चाद्य; D2 वोद्य; D6 वोभि- ; D9 त्वाद्य (for वो नि-).

8 T2 missing for 8 (cf. v.l. 6). —a) Ś2.3 V1.3 D2.9.12 T3 एवं विष्णुं; Ñ1 B1 T1 एवमेवं; Ñ2 V2 B2.3 D6.10.11 देवदेवं; G (ed.) विष्णुमेवं (for देवमेवं). V2 B D6.7.10 11 T3 M9 तं (for तु). Ś1 D5.8 एवं ब्रुवाणं विष्णुं तु. —b) D1.3.4 सित- (for रक्त-). Ñ2 V2 B स तदा (B2 रुषा हि) पुरुषोत्तमं. —c) T1 G1.3 शक्तिं मुमोच; M1.3 शक्त्या जघान. —d) Ś D2.5.9.12 T1 ह (for च). Ñ V2 B1.3.4 ननाद च; B2 नरोत्तमं; D6.7.10.11 M3 भुजांतरे; D8 रराम ह (for रराद च). M7 रराद च स माल्यवान्.

9 T2 missing for 9 (cf. v.l. 6). T3 om. (hapl.) 9-10b. —a) D2 माल्यवान् (sic) (for माल्यवद्-). —b) D5 -समन्विता; D8 -कृतस्वरा. —c) Ś Ñ1 V1.3 D2.5.8.9.12 संलग्ना (for बभ्राज). —d) Ś Ñ1 V2 मेघस्थेव.

10 T2 missing for 10 (cf. v.l. 6). T3 om. 10ab (cf. v.l. 9). —a) B1.4 अभि- (for एव). Ś1 Ñ2 V3 D9 M6 निष्कृष्य; Ś2.3 B D8 निष्कम्य; V1 D1-5 निःकृष्य; D12 निःक्रम्य (for चोत्कृष्य). Ñ1 एवमाकृष्य. —b) V1 D1.3.4 6.7 शक्तिधरः प्रभुः (D1.3.4. °रं प्रति). —c) V2 B3.4 स निर्दिश्य (for समुद्दिश्य).

11 T2 missing for 11 (cf. v.l. 6). —a) Ś D2.8.9 स्कंद् (Ś2.3 धातृ; D2 स्कंदात्) सृष्टा; D1.3.4 स्कंदमुक्ता; D12 दारुसृष्टा; G2 M3.7 स्कंदोत्कृष्टा. —b) Ś Ñ1 D2.5.8.9.12 T3 -नो (Ñ1 T3 -चो) दिता; V1 -विच्युता; T1 G2.3 M1.5 -निसृ (T1 °स्रु) ता. —c) Ś Ñ1 V1.3 D2.5.8.9.12 T3 याति (for प्रायान्). D6.7 M6.7 राक्षसप्राणान्. —d) T1 G1.3 M3 माहेंद्रीव (for महोल्केव).

12 T2 missing for 12 (cf. v.l. 6). —a) M7 तत्र (for तस्य). —b) Ś Ñ1 V1.3 D1.2.4.8-12 M5 Ck.t हारभार- ; D3 T3 महा (T3 तार) हार- ; Cg as in text (for हारभासा). Ś Ñ1 V1 D2.3.5.6.8.12 T3 -समन्विते; D1.4 -प्रभाविते; D9 -समर्पिते; M4 विभासिते (for [अ]वभासिते). Ñ2 V2 B M6 हारभाभिः (M6 मुक्ताहार-) प्रभासि (B2 °काशि)ते. —c) Ś Ñ2 V B2 D5.10 G1 M1.2 आपतद्. —d) Ś V1.3 D2.5.8.9.12 T3 गिरेः ; Ct as in text (for गिरि-). Ś V1.3 D5.8.12 कुद्ध; D2 कुड्य; D9 कुंज (for -कूट). Ñ V2 B -कूटे यथा.

13 T2 missing for 13 (cf. v.l. 6). —b) Ś2.3 प्रविष्टो; D5.9 प्रविश्य (for प्राविशद्). Ś1 D2.8.12 प्रविष्टोवि (D2 °श्यावि)रलं. —For 13ab, D1.3.4 subst. :

132* हतस्तु स तदा शक्त्या विह्वलोऽथावनिं गतः ।
[D8 तया (for तदा).]

—c) Ś D2.5.8.9.12 T3 मुहुर् (for पुनर्). —d) Ś V1.3 D2.5.8.9.12 यथा राम जलोक्षि (D2.9 °षि)तः.

14 T2 missing for 14 (cf. v.l. 6). —a) Ñ1 कार्षायनं (sic) ; D6.7.10.11 G2 कालायसं; M4 कृष्णायसं. —b) M5 घंटाकैर् (for कण्टकैर्). V2 B2 T1 G1 M3.4 वृतं; D4 श्रितं; M5 युतं (for चितम्). Ś Ñ1 V3 D2.5.8.9.12 T3 किंकिणीशतभूषितं (V3 °कृतभूषणं). —c) Ś1 D2.9 [अ]भ्याहनद्; Ñ1 [अ]भ्यद्रवद् ; V2 B न्यवधीद्; T3 [अ]भ्यर्दयद्. —d) Ś2 Ñ1 D5.9 अंतरं (for अन्तरे). V1 D5 T1 M3.6 भृशं.

Arya Research Team

G. 7. 8. 16
B. 7. 8. 16
L. 7. 7. 15

तथैव रणरक्तस्तु मुष्टिना वासवानुजम् ।
ताडयित्वा धनुर्मात्रमपक्रान्तो निशाचरः ॥ १५
ततोऽम्बरे महाञ्शब्दः साधु साध्विति चोत्थितः ।
आहत्य राक्षसो विष्णुं गरुडं चाप्यताडयत् ॥ १६
वैनतेयस्ततः क्रुद्धः पक्षवातेन राक्षसम् ।
व्यपोहद्बलवान्वायुः शुष्कपर्णचयं यथा ॥ १७
द्विजेन्द्रपक्षवातेन द्राविते दृश्य पूर्वजम् ।
सुमाली स्वबलैः सार्धं लङ्कामभिमुखो ययौ ॥ १८
पक्षवातबलोद्धूतो माल्यवानपि राक्षसः ।
स्वबलेन समागम्य ययौ लङ्कां ह्रिया वृतः ॥ १९
एवं ते राक्षसा राम हरिणा कमलेक्षण ।
बहुशः संयुगे भग्ना हतप्रवरनायकाः ॥ २०
अशक्नुवन्तस्ते विष्णुं प्रतियोद्धुं भयार्दिताः ।
त्यक्त्वा लङ्कां गता वस्तुं पातालं सहपत्नयः ॥ २१

15 T2 missing for 15 (cf. v.l. 6). —^{a}) V2 B1.4 -शक्तस्; D3 -सक्तस्; D6 -युक्तस्; G3 M1.4 -रक्तं; M8 -मुक्तश्; Cg.k.t as in text (for -रक्तस्). T1 G2.3 M1–5.7–9 Cg.k च (for तु). Ś V3 D1.2.4.5.8.9.12 T3 तु रणे स (D2.5 T3 श)क्तो; V1 बाणं शक्तिं च; G1 तेन युक्तिश्च (for रणरक्तस्तु). —^{b}) Ś Ñ V B D1–5.8.9.12 सोरुणानुजं. —^{c}) Ś D2.8.12 विचिक्षिप्य (sic); V1 D9 विनि(V1 °निः)क्षिप्य (for ताडयित्वा). —^{d}) D3.4 व्य(D4 ह्य)पक्रांतो; D5 M6 अपाक्रांतो.

16 T2 missing for 16 (cf. v.l. 6). —^{a}) B3 D1.3.4.6 M5 महाशब्दः(D1.4 °ब्दं); D6 महानादः. —^{b}) Ñ B2.4 D3 M6 [अ]थोत्थितः; B3 D9 T1 चोदितः (for चोत्थितः). D1.4 चकार रणदुर्मदः. —^{c}) Ś1 D8 स हत्वा; Ś2.3 D2.9.12 हत्वा च; V1 D3 आहत्वा; B4 आगत्य (for आहत्य). —^{d}) Ś Ñ V D1–5.8.9.12 T3 M6 यद्(T3 M6 सम)ताडयत्; T1 **ताडयत् (damaged); G2 M5.10 चाभ्यताडयत्; M8 चाप्यपातयत्.

17 T2 missing for 17 (cf. v.l. 6). —^{a}) D5.12 वैनतेयं(sic). Ñ B2–4 तदा; D5 अतः (for ततः). M6 क्रुद्धं. —M4 mostly damaged for ^{b}. —^{b}) M6–8 -पातेन; Cg.k.t as in text (for -वातेन). —After 17^{ab}, T3 ins.:

133* निर्धावमानमकरोत्तदा विष्णुश्च संयुगे ।
अभ्यधावत वेगेन ततो विष्णुर्निशाचरम् ।

—^{c}) Ś Ñ V1.3 B1.4 D1.2.4.5.8.9.12 उवाह; V2 B2 D3 व्युवाह; B3 स चिक्षेप(hypm.) (for व्यपोहद्). Ñ1 राक्षसान् (for बलवान्). Ś V1 D2.8.12 T3 वीरः; D9 घोरः (for वायुः). G2 M1 व्यपोथयद्(M1 °हत ब)लाद्वायुः; Ck.t as in text (for ^{c}). —^{d}) B2 D1.4 G2 M4.7.9.10 शुष्कं (for शुष्क-). B4 तथा (for यथा). ❀ Cg.t: वायुः शुष्कपर्णं (Ct °र्णचयं) यथा व्यपोहति तथा पक्षवातेन राक्षसं व्यपौहत्(Ct °पोहयत्). ❀

18 T2 missing for 18 (cf. v.l. 6). —^{a}) Ś D2.8.9.12 द्विजस्य; Ñ V1 B D1.3–5 द्विजेश- (for द्विजेन्द्र-). M1 -वातेन; M4.6.7 -पातेन (for -वातेन). —^{b}) G1 त्रासितं; M9 द्राविणं. G1 पश्य; M10 वीक्ष्य; Cg.k.t as in text (for दृश्य). M5 राक्षसं; M6 भ्रातरं (for पूर्वजम्). Ś V1.3 D2.5.8.9.12 T3 यदा(T3 यथा) क्षितौ निशाचरः; Ñ V2 B वीक्ष्य द्रावि(Ñ1 त्रासि; Ñ2 ताडि)तमग्रजं; D1.3.4 निर्धूतं वीक्ष्य(D3 दृश्य) भ्रातरं. —V3 om. 18^{c}–19^{b}. —^{c}) T1 G M1–5.8.9 प्रययौ (for सुमाली). —^{d}) B1 प्रतिमुखं; D4 स्वभिमुखो; D7 M6 अभिमुखं. T1 G M1–5.8.9 द्रुतं (for ययौ). Ñ1 लंकामेव विवेश ह. —For 18^{cd}, Ś V1 D2.5.8.9.12 T3 subst.:

134* प्रययौ स तदा लङ्कां स्वबलेन समावृतः ।

[D5 च (for स). Ś2.3 समाहतः.]

19 T2 missing for 19 (cf. v.l. 6). V1.3 om. 19^{ab} (for V3, cf. v.l. 18). —^{a}) B2 M4.6.7 पक्षपात- . Ś Ñ1 D2.8.9.12 T3 -भया(T3 -चया)द्भीतो; Ñ2 V2 B1.3.4 D3.6 M6 -समु(D3.6 -चलो; M6 -मुखो)द्भूतो; D5 -भयाद्वीरो (for -बलोद्भूतो). —^{b}) Ś D2.5.8.9.12 T3 स निशाचरः (for अपि राक्षसः). —^{c}) V2 B2 सुबलेन; B3 स्वबलेन च (hypm.); D1 स्वबलानि. Ś2.3 Ñ1 V1 D2.5.8.9.12 T3 समाविष्टो; V3 तथा युक्तो; B1 समागत्य; T1 स***(damaged) (for समागम्य). —^{d}) Ś2.3 D2.8.9.12 M7 ह्रिया वृतः; V3 तदा वृतः; D5 समन्वितः; T3 M8 ह्रियान्वितः; G1 समावृतः; L (ed.) ह्रियावृतः (for ह्रिया वृतः).

20 T2 missing for 20 (cf. v.l. 6). —^{a}) Ñ1 V1 तदा; V3 एते (for एवं). T1 G3 M3 तेन (for राम). —^{b}) Ś Ñ V B D1–5.8.9.12 T3 हरिणेक्षण (D8 °या [sic]); M5 कलुषेक्षणाः (for कमलेक्षण). —^{c}) Ñ V2 B1.3.4 G1.2 समरे. Ś2.3 D12 लग्ना (for भग्ना). —^{d}) D9 G1 बहु- (for हत-). Ñ1 B4 -प्रबल- (for -प्रवर-).

21 T2 missing for 21 (cf. v.l. 6). —^{a}) Ñ2 B1.3 तं; D5 om. (subm.) (for ते). Ś D2.8.12 योद्धुं (for विष्णुं). —^{b}) Ñ1 बलान्वितं; V1.3 D6.7.9–11 T3 बलार्दिताः; D5 महाबलः; G1.2 M4.5 भयान्विताः; M6.7 निशाचराः (for भयार्दिताः). Ś D2.8.12 विष्णुं प्रति बलान्विताः. —^{c}) D3 त्यक्तुं; M6 त्यज्य (for त्यक्त्वा). D6.7 M10 भयाद् (for गता). Ñ2 सर्वे (for वस्तुं). —^{d}) Ś V(V2 marg. also as in Ñ) D2.5.8.9.12 T3 तु(V1.3 T3 च; D5 ते) सयोषितः;

Anna Research Team

सुमालिनं समासाद्य राक्षसं रघुनन्दन ।
स्थिताः प्रख्यातवीर्यास्ते वंशे सालकटङ्कटे ॥ २२
ये त्वया निहतास्ते वै पौलस्त्या नाम राक्षसाः ।
सुमाली माल्यवान्माली ये च तेषां पुरःसराः ।
सर्वे एते महाभाग रावणाद्बलवत्तराः ॥ २३

न चान्यो रक्षसां हन्ता सुरेष्वपि पुरंजय ।
ऋते नारायणं देवं शङ्खचक्रगदाधरम् ॥ २४
भवान्नारायणो देवश्चतुर्बाहुः सनातनः ।
राक्षसान्हन्तुमुत्पन्नो अजेयः प्रभुरव्ययः ॥ २५

G. 7. 8. 27
B. 7. 8. 26
L. 7. 7. 26

इति श्रीरामायणे उत्तरकाण्डे अष्टमः सर्गः ॥ ८ ॥

Ñ B पन्नगालयं; D1.3.4 सह पत्निभिः; M3 वै सदारकाः; M6 ते सपत्नयः; Cg.k.t as in text (for सहपत्नयः).

22 T2 missing for 22 (cf. v.l. 6).—[a]) M6 सुमालिं तु. M8 समागम्य (for °साद्य). Ś V3 D2.5.8.9.12 T3 सुमाली (D5.12 T3 °लि)कुलमासाद्य.—[b]) Ś V3 D2.5.8.9 T3 राक्षसो; B2 D12 G3 M6-9 राक्षसा. Ś2.3 नंदनास्थितः; Ñ2 D1.4.6.7.10.11 T1 G1.3 M1-3.6.8-10 रघुसत्तम; D12 नंदना: स्थिता: (for रघुनन्दन).—[c]) Ñ V B D2.5.9 T3 स्थितः (for स्थिताः). Ś1 D8 -वीर्या ये; Ñ1 V2 D1-5.9 -वीर्याढ्या (Ñ1 V2 D5 °ढ्यो; D2.9 °ढ्यो); Ñ2 V1.3 B T3 -वीर्यौ(T3 °सौ); G (ed.) -वीर्यौ वै (for -वीर्यास्ते). Ś2.3 D12 प्रख्यातवीर्या ये वंशे.—[d]) Ś2.3 D12 स्थिताः (for वंशे). Ś2.3 D4 G2 M4 8.9 -कटंकटाः. Ñ V2.3 B वंशः शा(Ñ1 B2 सा)लकटंकटः(V2.3 °टैः). ❀ Cg: सालकटङ्कटे सालकटङ्कटा मालयवदादीनां पितामही विद्युत्केशपत्नी तस्याः सम्बन्धी सालकटङ्कटः तस्मिन्वंशे प्रख्यातवीर्याः। बृद्वाच्छाभाव आर्षः।; so also Ck.t. ❀ —After 22, Ś Ñ V1.3 D1-3.5.8.9.12 T3 ins.:

135* ये वै ते राक्षसा राम एते शालकटङ्कटाः ।

[Note hiatus between the two halves. Ñ1 एते ते; Ñ2 कथिता; V1.3 यत्र ते; D1.3.5 T3 य एते; D2 ये चैते (for ये वै ते). D5 ते वै; T3 सर्वे (for एते). V1.3 -कटंकटे.].

23 T2 missing for 23 (cf. v.l. 6).—[a]) D6.7 [अ]भिहतास्. Ñ1 D5 रामः V D7.10.11 ते तु; D6 तेपि; M6 ये वै (for ते वै).—[b]) B1.3.4 राम राक्षसाः; D5 राक्षसेश्वराः.—[d]) B3 ते; D1.4 त्वं (sic) (for ये). T1 एषां चैव (with hiatus); G1.3 M8 ये चैषां च (for ये च तेषां).—D1.4 om. (hapl.?) 23[ef].—[e]) Ś Ñ V B D2.3.5.8.9.12 T3 ह्येते; K (ed.) तेभ्यो (for एते). Ś Ñ V B2 D2.5-12 M1.4.6.7 महाभागाः; T1 G3 M3.8 °वीर्याः; M5 °बाहो (for °भाग).—[f]) V2 बलिनां (for रावणाद्).

24 T2 missing for 24 (cf. v.l. 6).—[a]) T1 G3 M3 नान्योस्ति; Cg.k.t as in text (for न चान्यो). Ñ1 V3 D6.7.10.11 T3 G M1.2.4.5.8-10 Cg.k.t राक्षसान् (for रक्षसां). M8 हंतुं.—V3 illeg. for [b].—[b]) V2 B2-4 [अ]स्ति; D1.3.4 M6 [अ]रि- (for [अ]पि). B1 शूरोप्यस्ति. Ñ1 D8.9.12 पुरंजयः; Ñ2 V2 B रिपुंजय(V2 B2.3 °यः); V1 D1.4 T3 पुरंदरः(D1 °र) (for पुरंजय). D6.7.10.11 T1 G M1.2.4.5.8-10 सुरारीन्देवकंटकान्; M3 सुरारिबलसूदनं.—[c]) Ś Ñ V B D1-5 8.9.12 T3 M6.7 ऋते नारायणाद्देवाच्; Ck.t as in text (for [c]). ❀ Ck: ऋते योगेऽपि पञ्चम्यभाव आर्षः. ❀ —[d]) Ñ V2.3 B1.3 D1.3.4 M6 चक्रशार्ङ्ग- (for शङ्खचक्र-). Ś Ñ V B D1-5.8.9.12 T3 M6.7 -गदाधरात्; Ck.t as in text (for -गदाधरम्).

25 T2 missing for 25 (cf. v.l. 6).—[a]) Ś3 भगवान् (hypm.); D1 त्वं तु; D4 तुभ्यं(sic) (for भवान्). Ś V3 D3.8.9.12 नाम; D1.2.4.5 T3 राम; G2 देव (for देवश्).—[b]) Ñ2 V2.3 B -मूर्तिः D1.3.4 -व्यूहः; D5 -वक्त्रः; M6 -भागः (for -बाहुः). D4 सनातन. Ś D2.8.9.12 शंखचक्रगदाधरः.—Note hiatus between [c] and [d].—[c]) D5 रक्षसां (for राक्षसान्).—[d]) Ś1 Ñ V2.3 B D1.2.4-6.8.9 T1.3 G2.3 M1-4.6-10 ह्यजेयः (to avoid hiatus); Ś2.3 D12 त्वजेयश् (to avoid hiatus); D7.10.11 G1 M5 ह्यजय्यः (to avoid hiatus). Ś Ñ1 V3 D2.5.8.9.12 T3 च वरप्रदः (for प्रभुरव्ययः). V1 (to avoid hiatus) ह्यजोमरवरप्रदः.—After 25, D1.4 ins.:

136* अनादिनिधनो राम सर्वात्मा प्रभुरव्ययः ।

—Thereafter D1.4 cont.; Ś Ñ V B1-3 D2.3.5-8.10-12 T3 ins. after 25; D9 cont. after 138*:

137* नष्टधर्मव्यवस्थाता काले काले प्रजाकरः ।
नित्योद्यतो दस्युवधे शरणागतवत्सलः ।

[(l. 1) B1 न हि (for नष्ट-). D8 नष्टे धर्मे. Ñ1 D7.10.11 -व्यवस्थानां; D1.4 -व्यवस्थे च (for -व्यवस्थाता). Ś1 नष्टधर्मेष्वव-स्थाता; Ś2.3 D12 नष्टे धर्मे प्रजास्थाता; D2 नष्टधर्मस्य च स्थाता (for the prior half). T3 प्रजां गतः (for प्रजाकरः).—(l. 2) Ś Ñ2 D1-4.8.9.12 नित्योदितो; V1 नियोज्यते; B3 नित्योद्युक्तो; D7.10.11 उत्पद्यते; T3 सतोद्यतो(sic). V3 शत्रुजये (for दस्युवधे).]

—Then D1.4 further cont.; while Ñ V2 B1-3 D6 7.10.11 cont. after 137*; whereas B4 D9 ins. after 25:

९

G. 7. 9. 1
B. 7. 9. 1
L. 7. 8. 1

कस्यचित्त्वथ कालस्य सुमाली नाम राक्षसः ।
रसातलान्मर्त्यलोकं सर्वं वै विचचार ह ॥ १
नीलजीमूतसंकाशस्तप्तकाञ्चनकुण्डलः ।
कन्यां दुहितरं गृह्य विना पद्ममिव श्रियम् ।
अथापश्यत्स गच्छन्तं पुष्पकेण धनेश्वरम् ॥ २
तं दृष्ट्वामरसंकाशं गच्छन्तं पावकोपमम् ।
अथाब्रवीत्सुतां रक्षः कैकसीं नाम नामतः ॥ ३

138* एषा मया तव नराधिप राक्षसाना-
मुत्पत्तिरद्य कथिता सकला यथावत् ।
भूयो निबोध रघुसत्तम रावणस्य
जन्मप्रभावमतुलं ससुतस्य सर्वम् ।
चिरात्सुमाली व्यचरद्रसातले [5]
स राक्षसो विष्णुभयार्दितस्तदा ।
पुत्रैश्च पौत्रैश्च समन्वितो बली
ततस्तु लङ्कामवसद्धनेश्वरः ।

[(l. 1) B1 [अ]भवत् * * (for मया तव). D1.4 एषामपातक (for एषा मया तव).—(l. 2) D1 एव (for अद्य). D6.7 सकला कथिता (by transp.). D1.4 मया ते (for यथावत्). —(l. 3) Ñ1 च रघूत्तम; B1.3.4 रघुनंदन (for रघुसत्तम). —(l. 4) D1.4.9 ननु (D9 खलु) तस्य (for ससुतस्य). Ñ1 सार्धं (for सर्वम्). —(l. 5) Ñ2 D6.7.10.11 रसातले.—(l. 6) B2 तथा (for तदा).—(l. 7) B1 योधैश् (for पौत्रैश्). V2 B D9 [ऽ]भवत्; D1.4 [ऽ]वसत् (for बली).—(l. 8) V2 B D9 अविशद् (for अवसद्). D1.4 स तत्र लंकामपविध्य शूरः.]

Colophon: T2 missing (cf. v.l. 6).—*Kāṇḍa name*: Ś1 D2.9 om.—*Sarga name*: Ś V1.3 D1–4.8.9.12 राक्षसप्रवासः; Ñ V2 B G (ed.) प्रहे(G [ed.] °हु)त्याख्यानं; D5 राक्षसवधः.—*Sarga no.* (figures, words or both): Ś Ñ1 V2.3 B1.2 D2.12 om.; V1 6; D8 9 7.—After colophon, D2 concludes with राम; G M1.5.8 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

९

☞ T4 missing up to st. 15 (cf. v.l. 7. 1). T2 missing up to मान in 6^b (cf. v.l. 7. 8. 6). D12 begins with ॐ.

1 ^{a}) D6 T1 G M1–5.7.9.10 Ck केनचित्त्वथ कालेन; Cg as in text (for ^{a}).—^{b}) D12 माल्यवान्; G1 स माली (for सुमाली). Ñ1 B स तु (for नाम). D1.3.4 स निशाचरः (for नाम राक्षसः).—^{c}) D5 मृत्यु- (for मर्त्य-).—^{d}) D1.3.4 सर्वशो (for सर्वं वै). T1 G1.3 M2–4.7–9 सं-; M6 प्र- (for वि-). Ś V1 D2.5.8.9.12 T3 चचार पिशिताशनः.—After 1, D1.3.4 read 2^e–3^b (including star passages).

2 T2 missing for 2 (cf. v.l. 1). Ś1 om. 2^{ab}. D6.7.10.11 repeat 2^{ab} (followed by 139* [r.]) before 3^{cd}.—^{b}) Ñ2 B3 D5 भूषणः (for कुण्डलः).—^{c}) Ś V1.3 D2.5.8.9.12 T3 कन्यां गृहीत्वा तनयां; Ñ V2 B सुतामादाय कल्याणीं (Ñ1 B3.4 °न्यां तु); D1.3.4 अपश्यत्तनयां तत्र.—^{d}) Ś V1.3 D2.5.8.9.12 M3 पद्म (D6 पुष्प)हीनाम्; Cg.k.t as in text (for विना पद्मम्).—After 2^{cd}, Ñ V2.3 B D6.7.10.11 T1 G M1–5.7–10 ins., D6.7.10.11 repeating it after 2^{ab} (r.); D1.3.4 ins. after 2^{ab}; M6 ins. after 2:

139* राक्षसेन्द्रः स तु तदा विचरन्वै महीतलम् ।

[M6 ददर्शाथ (for स तु तदा). T1 G2 विचरंतं; G1 व्यचरत्तं. Ñ V2.3 B D7.10.11 M1 (D7.10.11 first time) महीतले; M9 महावने (for महीतलम्). D1.3.4.6.7.10.11 (D6.7.10.11 second time) चिंतयन्सुमहाम (D6 °ग)तिः; M6 विचरंतं महाबलं (for the post. half).]

—After 2^{cd}, D3 ins. l. 2 only of 143*.—D1.3.4 read 2^e–3^b (including star passages) after 1. V3 repeats 2^{ef} (followed by l. 2 of 143*) before 3^{cd}.—^{e}) D6.7.10.11 तदा (for अथ). M3 हि (for स). M1 [अ]पश्यत. Ś V1.3 (second time) D2.5.8.9.12 T3 सोपश्यद्वित्तदं (V3 °***; D9 °द्धनदं; T3 °द्वित्तपं) देवं; Ñ V2.3 (first time) B गच्छंतं गगनेपश्यत्; M6 कस्यचित्त्वथ कालस्य (=1^a).—^{f}) Ś V1 D2.5.8.9.12 T3 महौजसं; V3 (second time) महायशाः (for धनेश्वरम्). B2 पुष्पके धनदेश्वरं. —After 2, Ñ2 V2 B1.3.4 ins.; while B2 ins. after 3^{ab}:

140* पितरं द्रष्टुमाकाशे मातरं च निशाचरः ।

[B1 द्रष्टुकामः स (for द्रष्टुमाकाशे) and रघूद्वह (for निशाचरः).]

—Thereafter B2 cont. 142* and 143*.

—After 2, D3.5.7.10.11 ins. 141*.

3 T2 missing for 3 (cf. v.l. 1). D1.3.4 read 2^e–3^b (including star passages) after 1.—^{a}) Ñ2 B2 [अ]नल-; V3 सर्व- (sic); B1 D5–7 सुर- (for [अ]मर-). M6 तं दृष्ट्वाचिंतयद्राम.—^{b}) Ñ V2.3 B विमाने; M3 स्वच्छं तं; Ck स्वच्छंदं (for गच्छन्तं). K (ed.) तपनोपमं. D1.3.4 पावकोपमतेजसं.—For 3^{ab}, Ś V1 D2.8.9.12 T3 subst.; while D3.5.7.10.11 ins. after 2; whereas M3 ins. after 3^{ab}:

141* गच्छन्तं पितरं द्रष्टुं पुलस्त्यतनयं द्विजम् ।

[Ś2.3 दृष्ट्वा. D12 M3 पौलस्त्य-. D7.10.11 विभुं (for द्विजम्).]

—Thereafter D9 T3 M3 cont.; while Ñ V2.3 B1.3.4

पुत्रि प्रदानकालोऽयं यौवनं तेऽतिवर्तते ।
त्वत्कृते च वयं सर्वे यत्रिता धर्मबुद्धयः ॥ ४
त्वं हि सर्वगुणोपेता श्रीः सपद्मेव पुत्रिके ।
प्रत्याख्यानाच्च भीतैस्त्वं न वरैः प्रतिगृह्यसे ॥ ५
कन्यापितृत्वं दुःखं हि सर्वेषां मानकाङ्क्षिणाम् ।
न ज्ञायते च कः कन्यां वरयेदिति पुत्रिके ॥ ६
मातुः कुलं पितृकुलं यत्र चैव प्रदीयते ।
कुलत्रयं सदा कन्या संशये स्थाप्य तिष्ठति ॥ ७

G. 7. 9. 11
B. 7. 9. 11
L. 7. 8. 8

D1.3–7.10.11 T1 G M1.2.4–10 ins. after 3^{ab}; B2 ins. 140* after 3^{ab} and then cont:

140* रसातलं प्रविष्टः स मर्त्यलोकात्सविस्मयः ।
हितार्थं चिन्तयामास राक्षसानां महामतिः ।
किं कृतं श्रेय इत्येवं वर्धेमहि कथं वयम् ।

[Ñ V2.3 B D9 om. l. 1. —(l. 1) D6 -तल-. D1.3–7.10.11 M6 सन्; T1 G1.3 [ऽ]सौ; T3 वै; M1.3 [ऽ]थ (for स). T3 मर्त्यलोकं. D3 M6 सविस्मयं. ❀ Ct: तं दृष्ट्वा पुना रसातलं प्रविष्ट इत्यर्थः। 'रसातलात्प्रविष्टः सन्मर्त्यलोकम्' इति पाठे उक्तानुवाद एवायम्. ❀ —(l. 2) D10.11 Ct इत्येवं; M9 पिता तच् (for हितार्थं). Ñ V2.3 B D9 निशाचरः; M1 महाद्युतिः (for महामतिः). —(l. 3) D5–7.10.11 G3 M2.9.10 कृत्वा; T1 M1.3.8 कृत्यं (for कृतं). D1.3–5.7 M6 इत्येव. Ñ V2.3 B D9 किं नु (D9 तु) कृत्वा भवेच्छ्रेयो (for the prior half). D1.3.4.7 वर्धामश्च; G1 वर्तेमहि. M5 यथा (for कथं).]

—Thereafter Ñ V2 B D5.9 T3 cont.; while Ś2.3 V1 D2.8.12 cont. l. 5 only after 141*; V3 cont. l. 1 after 142* and ins. l. 2 after 2^{ef} (r.); D3 ins l. 2 only after 2^{cd}:

143* सुतां विश्रवसे दद्यां राक्षसीं वरवर्णिनीम् ।
सोऽथ राक्षसशार्दूलः शार्दूलसमविक्रमः ।

[D5 T3 om. l. 1. —(l. 1) G (ed.) वैश्रवणे. —Ñ B2–4 om. l. 2. —(l. 2) V1 T3 [ऽ]च; V2 B1 च; G (ed.) तु (for अथ). D3 शार्दूलसंकाशः (for राक्षसशार्दूलः). Ś2.3 D2.8.12 पाकशासन- (for शार्दूलसम-).]

—Before 3^{cd}, V3 repeats 2^{ef} (followed by l. 2 of 143*; while D6.7.10.11 repeat 2^{ab} (followed by 139* [r.]) before 3^{cd}. —^{c}) D1.3.4 ताम् (for अथ). Ñ1 तां तु; Ñ2 V2 B1.3.4 तत्र; B2 भद्रां (for रक्षः). Ś1 (with hiatus) सोऽथ उवाच तनयां; Ś2.3 V1.3 D2.5.8.9.12 T3 उवाच तनयां तत्र. —^{d}) Ś1 V2 D6.8 केकसीं (D6 °शीं); Ñ B3.4 नैकसीं (B3.4 °शीं); V1.2 D1.3.5 कैकशीं; B2 निकसां (also m. मालिनीं) (for कैकसीं).

4 T2 missing for 4 (cf. v.l. 1). —^{a}) D10 G1 पुत्री- (for पुत्रि). Ñ V B D1.3–5 T3 ते (for [ऽ]यं). Ś D2.8.9.12 पुत्रिके दानकालोयं. —^{b}) Ś Ñ2 V1.2 B D2.3.8.9.12 T3 चाति-; Ñ1 V3 D6.7.10.11 व्यति-; D5 चाभि-; G2 ते नि-; M6 तेभि- (for तेऽति-). —After 4^{ab}, Ś V1 D2.5.8.9.12 T3 read 5 (^{ab} and ^{cd} transp.); while B3 D6.7.10.11 read 5^{cd}. —B1 transp. 4^{cd} (followed by 144*) and 5. —^{c}) Ñ V B1 D9 G3 M10 तत्; D1.4 यत्; Cg.t as in text (for त्वत्-). B3 हि (for च). —^{d}) B4 मंत्रिता. D7 मंत्र- (for धर्म-). ❀ Cv: त्वत्कृते च वयं सर्वे यत्रिता धर्मबुद्धय इति। त्वत्कृते तव विशिष्टवरपरिग्रहार्थं यत्रिता नि*** धार्मिकाश्च वयं वर्तामहे. ❀ —After 4, Ñ V2 B ins.:

144* त्वयि पुत्रि समासक्तः कामः संपरत्स्यतेऽचिरात् ।

[V2 B1 प्रति- (for पुत्रि). Ñ1 B2 समास(Ñ1 °यु)क्तं. Ñ1 B2 कर्मं; B3 कामं (for कामः). V2 B2 संपद्यते.]

5 T2 missing for 5 (cf. v.l. 1). Ś V1 D2.5.8.9.12 T3 read 5 (^{ab} and ^{cd} transp.) after 4^{ab}. B1 transp. 4^{cd} (followed by 144*) and 5. —^{a}) Ś D2.8.9.12 च (for हि). —^{b}) Ñ2 V1.2 त्वं (V2 सा) पद्मेव; V3 D6.7.10.11 साक्षादिव; B4 सतामेव (for सपद्मेव). Ñ2 V2 B1.3.4 नः कुले (for पुत्रिके). B2 सपद्मेव च नः कुले. —Ñ1 om. 5^{cd}. B3 D6.7.10.11 read 5^{cd} after 4^{ab}. —^{c}) Ś D2.5.8.9.12 M6 प्रत्याख्यातैश्च (D5.12 M6 °ता च); Cg.k.t as in text (for प्रत्याख्यानाच्च). Ś D2.5.8.12 भीरु त्वं; V3 भीतैश्च; D9 नीचैश्च (for भीतैस्त्वं). —^{d}) Ñ2 V2 B1.2 [अ]सुरैर्; B3.4 [अ]मरैः; D6.7 [अ]परैः; M4.6 परैः (for वरैः). Ś2.3 प्रतिगृह्यते; D6.10.11 परिगृह्यसे (D6 °ते); Ñ2 V2 B G (ed.) त्रि(V2 B3 श्रि; G [ed.] हि)यसे शुभे. ❀ Ct: प्रत्याख्यानाद्भीतैः प्रत्याख्यानशङ्कया भीतैर्न वरैः प्रतिगृह्यसे याच्यसे, यद्वा प्रत्याख्यानभीतैरस्माभिस्त्वं वरैर्न परि(N.S.P. [ed.] °रैर्न प्रति)गृह्यसे प्रतिग्रहं न कार्यसे. ❀

6 T2 missing up to मान in 6^b (cf. v.l. 1). Ñ2 B2 transp. 6^{ab} and 6^{cd}. —^{a}) M9 दुःखानि (for दुःखं हि). D1.3.4 अस्माकं त्वत्कृते दुःखं. —^{b}) V1 एव मानिनां; T1 वरकांक्षिणां. —V3 om. 6^{cd}. —^{c}) B2 दीयते. Ś D2.8 M7 वरं पुत्रि(M7 कन्यां) (sic); Ñ V1.2 B D5.9.12 T3 वरः पुत्रि; D1.4 तु कं कन्या; D7 G1.2 M6.10 च यः(G2 M10 वरः) कन्यां (for च कः कन्यां). —Ś1 om. (hapl.) 6^d–8^c. —^{d}) D6.7.10.11 M1 कन्यके (for पुत्रिके). Ś2.3 Ñ V1.2 B D2.5.8.9.12 कन्यायै(Ñ1 °यां; Ñ2 V1.2 B D5 °नां) चारुदर्शने (Ñ2 B1 D12 °नः; B3.4 °नं); T3 कः कन्यां वरयेदिति.

7 Ś1 om. 7 (cf. v.l. 6). —^{a}) B4 मातृकुलं. Ñ2 पितुश्चैव; T2 om. (hapl.) (for पितृकुलं). D5 पितुः कुलं कुलं मातुर्. —^{b}) B3 कन्या; D4 चैकं (for चैव). Ñ2 V B2 D6.10.11 T1 M6 च (for प्र-). G1 स्वपत्युः कुलमेव च. —^{c}) D2.11 G2 यदा; T1.2 G1.3 हि सा; M1 च सा (for सदा). Ñ V D1.3.11 कन्यां; B3 पुण्या (for कन्या). —^{d})

G. 7. 9. 12
B. 7 9. 12
L. 7. 8. 9

सा त्वं मुनिवरश्रेष्ठं प्रजापतिकुलोद्भवम् ।
गच्छ विश्रवसं पुत्रि पौलस्त्यं वरय स्वयम् ॥ ८
ईदृशास्ते भविष्यन्ति पुत्राः पुत्रि न संशयः ।
तेजसा भास्करसमा यादृशोऽयं धनेश्वरः ॥ ९
एतस्मिन्नन्तरे राम पुलस्त्यतनयो द्विजः ।
अग्निहोत्रमुपातिष्ठच्चतुर्थ इव पावकः ॥ १०
सा तु तां दारुणां वेलामचिन्त्य पितृगौरवात् ।
उपसृत्याग्रतस्तस्य चरणाधोमुखी स्थिता ॥ ११
स तु तां वीक्ष्य सुश्रोणीं पूर्णचन्द्रनिभाननाम् ।
अब्रवीत्परमोदारो दीप्यमान इवौजसा ॥ १२
भद्रे कस्यासि दुहिता कुतो वा त्वमिहागता ।
किं कार्यं कस्य वा हेतोस्तत्त्वतो ब्रूहि शोभने ॥ १३
एवमुक्ता तु सा कन्या कृताञ्जलिरथाब्रवीत् ।
आत्मप्रभावेन मुने ज्ञातुमर्हसि मे मतम् ॥ १४

D1.3.4 गच्छति (for तिष्ठति). Ś2.3 N1 V1.3 D2.5.8.9.12 T3 कृत्वा तिष्ठति संशये; Ñ2 V2 B संशयस्थं करोति हि.

8 Ś1 om. 8^{ab} (cf. v.l. 6). —^{a}) Ś2.3 Ñ V B2–4 D2.5–9.12 T3 M1.3 मुनिवरं. Ś2.3 Ñ1 V1 D2.5.8.9.12 T3 पुत्रि; B3 ज्येष्ठं (for -श्रेष्ठं). —^{b}) Ś2.3 D2 5.8.12 -कुलोद्भवं. —^{c}) Ñ1 D6.7.10.11 Ct भज (for गच्छ). Ñ1 V1 T3 शीघ्रं (for पुत्रि). —^{d}) V2 सुतं (for स्वयम्).

9 ^{a}) D6.7 तादृशास्. —^{b}) D5 पुत्र- (for पुत्राः). M5 संशयं. Ś Ñ V1.3 D2.5.8.9.12 T3 पौत्रा महौजसः (Ñ1 भविष्यति [sic]) (for पुत्रि न संशयः). —^{c}) Ñ V2 B D1.3.4 M6 -[उ]दग्रा; D6 7.10.11 T1.2 G2.3 M1.2.4.5.7.9.10 -समो; G (ed.) -[उ]दग्रा (for -समा). Ś V1.3 D2.5.8.9.12 T3 श्रिया परमया जुष्टा (Ś2.3 D12 T3 °ष्टो). —^{d}) Ś D1–4.8.9.12 [ऽ]सौ (for ऽयं). —After 9, Ñ V2.3 B D1.3.4.6.7.10.11 T1 G M ins.; Ś V1 D2.5.8.9.12 T3 ins. l. 2 only after 9; T2 ins. l. 1 after 11^{ab} and l. 2 after 9:

145* सा तु तद्वचनं श्रुत्वा कन्यका पितृगौरवात् ।
तत्रोपगम्य सा तस्थौ विश्रवा यत्र तप्यते ।

[D3 transp. l. 1 and 2 and repeats l. 2 after l. 1 (transp.). —(l. 1) M3 [अ]पि (for तु). D1.3.4 पितुरीरितं (for पितृगौरवात्). —B1 reads l. 2 in marg. D4 repeats consecutively from l. 2 up to 10^b. —(l. 2) Ś Ñ V B D1–5.8.9.12 M6 (D3.4 both times) गत्वाश्रमपदं; D6.7.10.11 तत्र गत्वा च सा; T2 गत्वा विश्रवसं; T3 गत्वोत्तमपदं; M1.5 K (ed.) तत्रोपा (M1 °त्राभि; M5 °तोप)गम्य सा (for तत्रोपगम्य सा). Ś V1 D2.3 (second time).8.9.12 T2.3 तिष्ठ; D5 तत्र (for तस्थौ). T2.3 ते पतिः (for तप्यते). Ñ V2 B य (Ñ2 त)त्रातप्यत विश्रवाः; D1.3 (first time).4 (both times) मुनिर्यत्र स विश्रवाः; G (ed.) यत्रास्ते स तु विश्रवाः (for the post. half).]

10 D4 repeats 10^{ab} (cf. v.l. 145*). —^{b}) T2 महान् (for द्विजः). —^{c}) D5 उपाविष्टश् (for उपातिष्ठच्). ❀ Ck: उपातिष्ठत् उपातिष्ठतेति यावत्. ❀

11 ^{a}) G1 तदा (for तु तां). Ś V1.3 D2.5–8.10–12 T2.3 Cg अविचिंत्य तु सा कालं (D6 तं कालं; D7 कालं सा; D10.11 तां वेलां); Ñ V2 B सा तु (B3 °पि) तं दारुणं कालम्;
D9 अबुद्ध्वा तु सा तत्कालं. —^{b}) Ś V1.3 D2.5–9.12 T2.3 दारुणं; Ñ V2 B अबुद्ध्वा; D10.11 दारुणां; T1 M5 विचिंत्य; G2 अचिरं (for अचिन्त्य). ❀ Ck: दारुणां तां वेलामिति। प्रदोषकालमित्यर्थः; so also Ct. ❀ —After 11^{ab}, T2 ins. l. 1 of 145*. —^{c}) V1 उपस्थिता; M5 उपसृता; Ck.t as in text (for उपसृत्य). Ś1 D8 [आ]गता (for [अ]ग्रतस्). —^{d}) Ś D1–5.8.9.12 कन्यका; Ñ2 B चरणे; D6.7 M6 स्थिता सा; Cg as in text (for चरण-). D5 -[अ]भिमुखी. B2 D6.7 M6 तदा; Ct as in text (for स्थिता). ❀ Cg: चरणाधोमुखी चरणसमीपाधोमुखी।; Ct: अङ्गुष्ठाग्रेण मुहुर्भूमिं विलिखन्त्यधोमुखी स्थितेति संबन्धः. ❀ —After 11, D1.3.4.6.7.10.11 S ins.:

146* विलिखन्ती मुहुर्भूमिमङ्गुष्ठाग्रेण भामिनी ।

[D1.3.4 आलिखंती. T3 मुदा (for मुहुर्).]

12 ^{a}) K (ed.) प्रेक्ष्य (for वीक्ष्य). Ñ2 V2 B धर्मात्मा (for सुश्रोणीं). —^{c}) D5 T3 -[उ]दारं; G2 M4.5.7 -प्रीतो (for -[उ]दारो). —^{d}) V1.2 D6 7.10.11 T3 G2 M2.4.7–10 दीप्यमानां (for दीप्यमान). V2 D6.7.10.11 स्वतेजसा; M1 इव श्रिया (for इवौजसा). —After 12, D1.3.4 ins.:

147* कस्य त्वं चारुसर्वाङ्गि संसितायतलोचने ।

[D3 शंस च (for संसित-).]

13 ^{a}) D1–4 कस्यापि; G1 कन्यासि (for कस्यासि). D5 कस्यासि दुहिता भद्रे. —^{b}) T1.2 G1.3 नु (for वा). —^{c}) D3 किंकार्ये. —^{d}) Ś Ñ V1.3 B1–3 D5.8.9.12 T3 तच्छुभे; V2 (marg. also as in Ś and also as in text) सुव्रता; B4 पृच्छते; M6 मे शुभे (for शोभने). D2 त्वत्तो ब्रूहि ततः शुभे.

14 V2 om. 14^{ab}. G2 damaged from कन्या in ^{a} up to ब in ^{b}. —^{a}) Ś D2.8.9.12 च (for तु). —^{b}) G2 M10 अभाषत (for [अ]थाब्रवीत्). —B4 om. 14^{cd}. Ñ1 repeats 14^{cd} and 15^{cd} after 15. Ñ2 V2 B1–3 read 14^{cd} after 15. —^{c}) Ñ1 (second time).2 V2 B1–3 तपः- (for आत्म-). Ś1 Ñ2 V B D4.6.10.11 -प्रभावेण; D5 -स्व° (for -प्रभावेन). —^{d}) D9 दातुम् (for ज्ञातुम्). Ñ1 मते; D9 मतिं (for मतम्). Ñ1 (second time).2 V2 B1–3 यदर्थमहमागता.

किं तु विद्धि हि मां ब्रह्मन्शासनात्पितुरागताम् ।
कैकसी नाम नाम्नाहं शेषं त्वं ज्ञातुमर्हसि ॥ १५
स तु गत्वा मुनिर्ध्यानं वाक्यमेतदुवाच ह ।
विज्ञातं ते मया भद्रे कारणं यन्मनोगतम् ॥ १६
दारुणायां तु वेलायां यस्मात्त्वं मामुपस्थिता ।
शृणु तस्मात्सुतान्भद्रे यादृशाञ्जनयिष्यसि ॥ १७
दारुणान्दारुणाकारान्दारुणाभिजनप्रियान् ।
प्रसविष्यसि सुश्रोणि राक्षसान्क्रूरकर्मणः ॥ १८
सा तु तद्वचनं श्रुत्वा प्रणिपत्याब्रवीद्वचः ।
भगवन्नेदृशाः पुत्रास्त्वत्तोऽर्हा ब्रह्मयोनितः ॥ १९
अथाब्रवीन्मुनिस्तत्र पश्चिमो यस्तवात्मजः ।
मम वंशानुरूपश्च धर्मात्मा च भविष्यति ॥ २० G. 7. 9. 27 B. 7. 9. 27 L. 7. 8. 21

15 [a]) V1 च (for हि). D5 जानीहि (for विद्धि हि). Ñ V2.3 B राक्षसीं विद्धि मां ब्रह्मन्; D1.3.4.6.7.10.11 M6.7 किं तु मां विद्धि ब्रह्मर्षे. —[c]) Ś2.3 V1 D2.5.8.9.12 G2 M7 कै(D8 के)कसीं(D5 °शीं); Ñ1 (first time) नैकसी; Ñ1 (second time) नैकशी; D1.4 कैकशी (for कैकसी). Ñ2 V2 B नैकसीमि(B4 °षीरि)ति (for कैकसी नाम). Ś2.3 D12 च; Ñ2 V2 B वै (for [अ]हं). Ś1 D2.8.9 नामोक्तां; Ñ1 (first time) V1 नामाहं; D1.3.4 तन्नाम्ना (for नाम्नाहं). V3 नामतः प्रोक्तां (for नाम नाम्नाहं). —[d]) Ś Ñ1 (second time) V1.3 D1.2.5.8.9.12 श्रुतां (Ś2 V1 श्रुत्वा; D1 तथा) पुण्यो(D1.5.9 °प्यो)त्कटेति च (Ś1 Ñ1 V3 हि [sic] च; D5 °ति वै); T3 श्रुता पुण्योत्कटानुजा. —After 15, Ñ1 repeats 14[cd] and 15[cd]; while Ñ2 V2 B1-3 read 14[cd].

16 T4 resumes from 16. —[a]) Ñ2 V2 B1.3.4 ततो; B2 इतो; M5 स च (for स तु). B4 कृत्वा; D9 ज्ञात्वा (for गत्वा). M9 गत्वा तु (by transp.). T2 G3 M10 मुहुर् (for मुनिर्). —G3 damaged for 16[c] (except वि). —[c]) D5 G2 मे (sic) (for ते). D1.4 यथा (for मया). B1.4 सर्वं (for भद्रे). —[d]) V1 रावणं (for कारणं). B2 यन्मुहुर्गतं; D1.4 जन्मनो(D1 °तो) गतं; T2 त्वन्मनोगतं. —After 16, Ñ V B D1.3.4.6.7.10.11 S ins.:

148* सुताभिलाषो मत्तस्ते मत्तमातंगगामिनि ।

[D1.3.4 G1 M2.5-9 -[अ]भिलाषा(G1 M9 °षां; M2 °षान्; M8 °षं) (for -[अ]भिलाषो). D1.3.4.11 M5.6 त्वं (for ते).]

17 [a]) D6 संध्यायां (for वेलायां). —[b]) Ś2.3 V3 D2.5.9.12 T3.4 मां (for त्वं). Ś1 D8 त्वं यन्मां (for यस्मात्त्वं). Ś1 D1.3.4.8 समुपस्थिता; Ś2.3 D2.5.9.12 त्वमु°; V3 त्वमिहागता; T3.4 त्वमुपागता; M1 मामुपास्थिता (for मामुपस्थिता). —After 17[ab], D11 ins. श्रीरामाय नमः. —T4 damaged up to सुत in 17[c]. —[c]) B2 लभ (for शृणु). Ś Ñ1 V1.3 D2.5.8.9.12 T3 सुतो (for सुतान्). —[d]) G1 दारुणाञ् (for यादृशान्). M4 जनयिष्यति. Ś Ñ1 V1.3 D2.5.8.9.12 T3.4 यादृशस्ते भविष्यति.

18 [a]) Ñ2 B1.3.4 -[आ]चारान्; D1.3.4 -[आ]हारान् (for -[आ]कारान्). —[b]) D1.3.4 भद्रे त्वं जगदप्रियान्. —[c]) Ñ2 V2 B जनयिष्यसि; G3 ****सि (for प्रसविष्यसि). —For 18, Ś Ñ1 V1.3 D2.5.8.9.12 T3.4 subst.:

149* दारुणो दारुणाचारो दारुणाभिजनप्रियः ।
साक्षाद्दारुणकर्मा च न चिरात्प्रसविष्यति ।

[(l. 1) Ś1 Ñ1 V1.3 D8 दारुणोभि- (for दारुणाभि-). —(l. 2) Ś2.3 D12 सुतो; D5 T3.4 रक्षो (for साक्षाद्). Ñ1 V3 D2.5 T3.4 प्रभविष्यति; D9 प्रसविष्यसि.]

19 [a]) Ś D2.9.12 [अ]पि (for तु). —[b]) D1.3.4 इदं (for वचः). —[c]) Ś Ñ1 V1.3 D2.5.8.12 T3.4 नेदृशः पुत्रः; D3.6.7.10.11 M4.7 ई(D7 ता)दृशान्पुत्रांस्; D9 सदृशः पुत्रः; T1.2 ईदृशाः पुत्रास् (for नेदृशाः पुत्रास्). —[d]) Ś D2.5.8.9.12 [ऽ]हों; Ñ1 [ऽ]यं; V1 T3.4 [ऽ]हं; D6.7.10.11 G1.2 M4.7 [ऽ]हं; T1.2 वै (for ऽर्हा). Ś Ñ1 V1 D2.5.8.9.12 T3 ब्रह्मयोनिजः; D6.7.10.11 T1.2 G M1-5.7-10 Ct °वादिनः; T3 ब्रह्म ***(damaged) (for ब्रह्मयोनितः). Ñ2 त्वत्तो ब्राह्मणयोनितः. —After 19, V2.3 ins.:

150* आत्मवन्तं गुणैर्युक्तं दातुमर्हसि मे सुतम् ।

[V2 कुलानुरूपतरं धर्म(hypm.) (for the prior half) and कर्तुम् (for दातुम्).]

—Thereafter V2.3 cont.; Ñ B D1.3.4 T2 G1.3 M1.3.6 ins. after 19 while D6.7.10.11 cont. after 152*:

151* कन्यया चैवमुक्तस्तु विश्रवा मुनिपुंगवः ।
उवाच कैकसीं भूयः पूर्णेन्दुरिव रोहिणीम् ।

[(l. 1) Ñ1 स रक्ष एवम् (sic); Ñ2 V2.3 B स कन्ययैवम्; D1.3.4 (all with hiatus) कन्यया एवम् (for कन्यया चैवम्). —(l. 2) Ñ1 V2 B नैकसीं(B4 °षीं); V3 D6 केकसीं; D3.4 कैकशीं; G3 कैकयीं (for कैकसीं). D1 चंद्रो वै रोहिणीं च वा (for the post. half).]

—After 19, D6.7.10.11 ins.:

152* नेच्छामि सुदुराचारान्प्रसादं कर्तुमर्हसि ।

20 [ab]) Ś V1.3 D2.8.9.12 T3.4 ततो (for अथ). Ś V1.3 D2.5.8.9 12 T3.4 तां तु (for तत्र). M3 भद्रे बुद्धिमतां श्रेष्ठः (for [a]). Ś V1.3 D2.8.9.12 M2.7.9 [ऽ]यं (for यस्). Ś V1.3 D2.8 [अ]नुजः (for [आ]त्मजः). Ñ V2 B D1.3.4. 6.7.10.11 M6 पश्चिमो यस्त(Ñ1 °यं त)व सुतो(D1.3.4 यः सुतो भद्रे) भविष्यति शुभानने. —[c]) Ś1 D8 [ऽ]सौ; Ś2.3 Ñ2 V3 B D1.3-5.7.10-12 स (for च). Ñ1 -रूपेण; D2 -रूपं सः (for -रूपश्च). —[d]) Ś2.3 V1 G2 M6 सः; D1.3.4 M5 सं- (for च). Ñ1 V2 D9 स धर्मात्मा; B1 धर्माचारो; M1 धर्मवांश्च

G. 7. 9. 28
B. 7. 9. 28
L. 7. 8. 22

एवमुक्ता तु सा कन्या राम कालेन केनचित् ।
जनयामास बीभत्सं रक्षोरूपं सुदारुणम् ॥ २१
दशशीर्षं महादंष्ट्रं नीलाञ्जनचयोपमम् ।
ताम्रोष्ठं विंशतिभुजं महास्यं दीप्तमूर्धजम् ॥ २२
जातमात्रे ततस्तस्मिन्सज्वालकवलाः शिवाः ।
क्रव्यादाश्चापसव्यानि मण्डलानि प्रचक्रिरे ॥ २३
ववर्ष रुधिरं देवो मेघाश्च खरनिस्वनाः ।
प्रबभौ न च खे सूर्यो महोल्काश्चापतन्भुवि ॥ २४
अथ नामाकरोत्तस्य पितामहसमः पिता ।
दशशीर्षः प्रसूतोऽयं दशग्रीवो भविष्यति ॥ २५
तस्य त्वनन्तरं जातः कुम्भकर्णो महाबलः ।
प्रमाणाद्यस्य विपुलं प्रमाणं नेह विद्यते ॥ २६
ततः शूर्पणखा नाम संजज्ञे विकृताननाः ।
विभीषणश्च धर्मात्मा कैकस्याः पश्चिमः सुतः ॥ २७

(for धर्मात्मा च). Ñ2 V2(marg. also as in text) B D6.7.10.11 न संशयः (for भविष्यति).

21 [a]) D5 च (for तु).—[b]) V2(also) कुत्रचित् (for केनचित्).—[c]) D5 G3 M7.9 बीभत्सुं.—[d]) Ś1 D8 रजोरूपं. B2 भयावहं (for सुदारुणम्).

22 [a]) Ñ2 V2 B4 D6.7.10.11 G1 -ग्रीवं(B4 °व-) (for -ग्रीवं).—[c]) Ñ1 V1 D5 9 T3.4 लंबोष्ठं; B1.4 ताम्रौष्ठं (for ताम्रोष्ठं). Ś D2.8.12 लंबोद(D2 °बाध)रं विंशभुजं.—[d]) B3 सहास्यं; G3 दशास्यं (for महास्यं). Ś Ñ1 V1.3 D1–5.8.9.12 T3 4 -लोचनं; G1 -तेजसं (for -मूर्धजम्).

23 [a]) D6.7.10 11 तस्मिञ्जाते (for जातमात्रे). Ś Ñ1 V1.3 D2.5.8.9 12 T3.4 तस्मिञ्जातेथ(T4 °ते तु) भव(Ñ1 V1 D5 T3.4 गग)ने; M7 जातमात्रेण ते तस्मिन्; K(ed.) तस्मिञ्जाते तु तत्काले.—[b]) Ś Ñ1 V3 D8.12 सज्वाला-; D7 प्रज्वाल-(for सज्वाल-). B2 जज्वलुः सकलाः शिवाः.—[d]) Ś D2 8.12 प्रव्यथानि (for मण्डलानि). Ñ V2 B D6.7.10.11 G(ed.) प्र(G[ed.] वि)चक्रमुः (for प्रचक्रिरे). V1 प्रापतंस्ते भयंकराः.

24 [a]) Ś D2.8 9.12 ववृषुः; T1.2 G3 M3.6 ववर्षुं (for ववर्ष). Ś V3 D2.5 8.9.12 तत्र; V1 देवाः; T1.2 G3 M3.6 मेघाः; G1 देव (for देवो). T3.4 देवो ववर्ष रुधिरं (by transp.).—[b]) T1.2 G3 M3 घोराश्च; G1 घनाश्च; M6 दारुणाः (for मेघाश्च). M7 घन- (for खर-). D1.3.4 दारुणं खरनिश्चयः(D3 °स्वनः).—[c]) Ś Ñ1 V1.3 D2.5 8 9.12 T3.4 न दीप्यते; D1.3.4 T1.2 G M न प्रभाति (for प्रबभौ न). Ñ1 V B1.3.4 D2.5 9 T3.4 M5 वै (for खे). Ñ2 D6.7.10 11 सूर्यो वै; B2 सूर्योपि; G1 M1 सूर्यश्च (for खे सूर्यो).—[d]) Ś Ñ1 V1.3 D2.5 8.9.12 T1.2.4 G2.3 M2.4.5.7–10 च प्रपेदिरे; D6 प्राप°; T3 च प्रचक्रिरे (for चापतन्भुवि). G1 मेघादुल्काः प्रपेदिरे.—After 24, Ś Ñ V B D T3.4 M3 ins.:

153* पृथिवी प्रचकम्पे च ववुर्वाताः सुदारुणाः ।
अक्षोभ्यः क्षुभितश्चैव समुद्रः सरितां पतिः ।

[(l. 1) Ś V3D2.8.9.12 च; Ñ1 V1 सु-; M3 वि-(for प्र-). V3 D9 प्रकंपे. Ś2.3 [ऽ]थ; V3 तु (for च). Ñ2 V2 B D6.7. 10.11 चकंपे जगती(B3 वसुधा) चैव; D1.4 पृथिवी कंपसंयुक्ता (for the prior half). V2 B च (for सु-).—(l. 2) D2 स्व-(for अ-). Ś V1 D1–5.8.9.12 T3 [अ]पि; T4 M3 [आ]-सीत्(for [ए]व). Ñ2 om. समुद्रः.]

25 [ab]) D5 तत्र (for तस्य). M8 नामाकरोत्तस्य पिता महर्षिसहितस्तदा.—[c]) Ś Ñ V1.3 D2.6–12 Ct दशग्रीवः. D5 प्रभूतो; M1 प्रसिद्धो (for प्रसूतो). B2 [ऽ]पि (for ऽयं). D1.4 प्रसूतित्वाद् (for प्रसूतोऽयं). ❀ Ct: दशग्रीव इति। कामरूपत्वाच्चान्तःपुरादावेकवक्त्रत्वं द्विभुजत्वं चास्येति बोध्यम्. ❀—[d]) Ś Ñ2 V1 B1–3 D2.8.9.12 भवत्विति; Ñ1 भवेत्विति; B4 भवन्निति; D1.3.4 भवत्ययं (for भविष्यति).—After 25, Ñ1 ins.:

154* केनचित्त्वथ कालेन तस्य जातस्य रक्षसः ।

26 [a]) D1.4 [अ]नंतराज्; D3 T1.2.4 G1.3 M1.2.4.7. 8.10 [अ]नंतरो (for [अ]नन्तरं).—D9 repeats 26[cd] consecutively.—[c]) Ś D2.8.9(second time).12 T3.4 त(T3 अ)स्य वैपुल्यात् (for यस्य विपुलं). D1.3.4 T1.2 G2.3 M1–5.7–10 यस्य प्रमाणाद्विपुलं (by transp.); D5 यस्य प्रमाणस्तुल्यो वै.—[d]) Ñ1 T3.4 तुल्यो नैवेह; D5 बले नैव हि; D6 प्रमाणे नेह (for प्रमाणं नेह). Ś D2.8.9 (second time).12 L(ed.) स(Ś1 ता)दृशो वाथ(D2 °पि; D9 वा न) दृश्यते(L[ed.] °शो वाप्यदृश्यत).

27 [b]) Ñ1 संजाता; D1.3.4 G2.3 M2.7–10 सा जज्ञे (for संजज्ञे).—[c]) D5 T1–3 G1.3 M1.3 तु (for च). G2 M10 कैकस्याः; M5 कैकस्यां (for धर्मात्मा).—[d]) Ñ V2 B कैकस्याः(B4 °प्याः); D1.3–5 T2 कैकइयाः; D6 G3 केकस्याः; G1 कैकेय्याः (for कैकस्याः). T3 परमः (for पश्चिमः). G2 M5.10 पश्चि(M5 पंच-[sic])मश्च ततः सुतः.—After 27, Ñ2 V2.3 (l. 1 only) B1.2 D6.7.10.11 ins.:

155* तस्मिञ्जाते महासत्त्वे पुष्पवर्षं पपात ह ।
नभःस्थाने दुन्दुभयो देवानां प्राणदंस्तथा ।
वाक्यं चैवान्तरिक्षे च साधु साध्विति तत्तदा ।

[(l. 1) V2 -वृष्टिः (for -वर्षं).—(l. 2) Ñ2 V2 B1 नभःस्थाश्च (unmetric); D6 नभःस्थिता; D7 नभ° (for नभःस्थाने). V2 B1 तदा (for तथा).—(l. 3) V2 तं (for तत्). K(ed.) तथा (for तदा).]

Arya Research Team

ते तु तत्र महारण्ये ववृधुः सुमहौजसः ।
तेषां क्रूरो दशग्रीवो लोकोद्वेगकरोऽभवत् ॥ २८
कुम्भकर्णः प्रमत्तस्तु महर्षीन्धर्मसंश्रितान् ।
त्रैलोक्यं त्रासयन्दुष्टो भक्षयन्विचचार ह ॥ २९
विभीषणस्तु धर्मात्मा नित्यं धर्मपथे स्थितः ।
स्वाध्यायनियताहार उवास नियतेन्द्रियः ॥ ३०
अथ वित्तेश्वरो देवस्तत्र कालेन केनचित् ।
आगच्छत्पितरं द्रष्टुं पुष्पकेण महौजसम् ॥ ३१
तं दृष्ट्वा कैकसी तत्र ज्वलन्तमिव तेजसा ।
आस्थाय राक्षसीं बुद्धिं दशग्रीवमुवाच ह ॥ ३२
पुत्र वैश्रवणं पश्य भ्रातरं तेजसा वृतम् ।
भ्रातृभावे समे चापि पश्यात्मानं त्वमीदृशम् ॥ ३३
दशग्रीव तथा यत्नं कुरुष्वामितविक्रम ।
यथा भवसि मे पुत्र श्रीघ्रं वैश्रवणोपमः ॥ ३४

G. 7. 9. 43
B. 7. 9. 43
L. 7. 8. 36

---

28 ^{a}) Ś Ñ V B D2.5–12 T3.4 tau (for te). V1 ca (for tu). Ś1 mahāpuṇye. —^{b}) M5 -mahāyaśaḥ (for -mahaujasaḥ). Ś Ñ V B D2.5–12 T3.4 vavṛdhāte mahaujasau. —^{c}) Ś Ñ V B D2.5–12 T3.4 kumbhakarṇadaśagrīvau. —^{d}) Ś Ñ1 V B3.4 D2.5.8.9.12 T3.4 -karau sadā; Ñ2 B1 D6.7.10.11 -karau tadā; B2 -karāvubhau. —After 28, D11 ins. śrīrāmāya rāmacandrāya namaḥ.

29 ^{a}) Ś Ñ1 V1 D2.5.8.9.12 ca; T3.4 san (for tu). —D8 om. 29^{b}. —^{b}) Ś3 -saṃsthitān; Ñ2 V2 B D6.7.10.11 -varataḷān; D5 -saṃsthitaḥ; T1.2.4 G M1–5.7.10 -saṃhitān (for -saṃśritān). D1 trailokye nityamudyate; D3 maharṣīnsaṃhitāñchubhān. —D5 om. (hapl.) 29^{c}–30^{b}. —^{c}) M2.9 dārayandurṣṭo; K (ed.) bhakṣayatsvairya- (for trāsayandurṣṭo). Ś D2.8.9.12 mūlo(D8 °lāṃ)kaṃ ni(D9 °kaṃsi)tyasaṃtu(Ś1 D2.12 °saṃpu; Ś2.3 °mapū)ṣṭo; Ñ V2.3 B2–4 D6.7.10.11 T3.4 M6 Ct trailokye(B3 °ke) nitya(D10.11 T3 Ct °tyā)saṃ(V2 °śo)tuṣṭo(B4 °hṛṣṭo; T3.4 °tuṣṭān); V1 trailokyetyantasaṃhṛṣṭo; B1 D3.4 trailokye nityamuyukto(B1 °śaḥ kruddho); D1 atikrūro mahānādo. —^{d}) B2 bhayaṃ kurvaṃś; D7 bhīṣayanvi-; D9 bhakṣayitvā; K (ed.) -[a]saṃtuṣṭo vi- (for bhakṣayanvi-). T1.2 G1.3 M1.2.4.8.9 saḥ; T3 ca; T4 damaged (for hi).

30 D5 om. 30^{a,b} (cf. v.l. 29). —^{a}) Ś Ñ2 V2 B D2.8.9.12 T1.2 G3 ca (for tu). —^{b}) Ñ1 nitya- (for nityaṃ). Ñ1 B D6.9.11 dharmaḥ; D1 pathi (for dharma-). Ñ V2.3 B D6.7.10.11 -vyavasthitaḥ; D1 sthitaḥ satāṃ; D2–4.8.9.12 -pathi sthitaḥ; T3 -pade sthitaḥ (for -pathe sthitaḥ). —^{c}) Ś Ñ B1.3.4 D2.6.7.9.12 svādhyāyī (for svādhyāya-). B2 -niyatāhāre; M2 -niyatācāraḥ; Cg.k.t as in text (for -niyatāhāra). T3 °yāniyatāhāra. ❀ Cg: svādhyāyaṃ niyatam āhāraḥ aharaharīti svādhyāyaniyatāhāraḥ; Ck: svādhyāyaniyaṃ(ya)to niyatāhāraśca tathā | niyataśabdasyaikaśeṣa āvṛttirvā |; so also Ct. ❀ —^{d}) Ś1 Ñ2 V3 D6.7.10.11 vi(Ś1 ni)jitendriyaḥ; M6 parisāntvayan (for niyatendriyaḥ). Ñ1 V2 B1.3.4 upavāsa (V2 B3 °sī)jiḥ(Ñ1 °sī ya)tendriyaḥ.

31 ^{a}) Ś Ñ V2.3 B D6.7.11 M8 vaiśravaṇo; G1 viśveśvaro (for vitteśvaro). D1.3.4 tatra (for devas). —M1 transp. ^{b} and ^{d}. —^{b}) Ś V1 D2.5.9.12 tena; D1.3.4 tataḥ; D8 svena (for tatra). Ś D8 kasyacit (for kena°). —After 31^{a,b}, D5 reads 33^{c,d}. —^{c}) Ś V1 D2.5.8.9.12 T3.4 ā(D5.9 T3.4 ā)gamat; Ñ V2 B D6.7 āyātaḥ; V3 D10.11 āgataḥ; D4 G1 M2.5.6.8 agacchat (for āgacchat). M7 tatra (for draṣṭuṃ). —^{d}) Ñ D6.7.10.11 dhaneśvaraḥ; T1.2 G M mahaujasā (for mahaujasam).

32 D5 om. 32–33^{b}. M7 om. (hapl.?) 32^{a,b}. —^{a}) V1 dṛṣṭvā tu; T3.4 dṛṣṭvā taṃ (by transp.) (for taṃ dṛṣṭvā). Ś1 V3 D8 kekasī; Ñ V2 B naikasī(B4 °ṣī); V1 kaikaśī (for kaikasī). T1.2 G M1.3.4.9.10 rāja; M2.5.8 nāma (for tatra). —^{b}) V1 bhāskaraṃ (for tejasā). —^{c}) Ñ1 V2 B1.2 T4 āgamya (for āsthāya). V2 reads buddhiṃ in marg. Ś Ñ2 V1.3 B3.4 D2.6–12 T3 āgamya rā(Ś1 D8 agamadrā)kṣasīṃ tanu(Ś V1 D2.8.9.12 T3 buddhyā).

33 D5 om. 33^{a,b} (cf. v.l. 32). —^{a}) Ñ2 sutaḥ; M5 putraṃ(sic) (for putra). D1.4 paśyan (for paśya). —^{b}) V1 D9 dīptatejasaḥ; G2 M4.5.7.10 te mahābalaṃ(M7 °bhujaṃ) (for tejasā vṛtam). —D5 reads 33^{c,d} after 31^{a,b}. V3 lacuna for 33^{c}. —^{c}) D6.8.9 vā (for ca). G2 [s]pi ca same (by transp.) (for same cāpi). —^{d}) M1 īdṛśaḥ; Cg.k.t as in text (for īdṛśam). D5 M8 paśya tvātmān- (M8 jyeṣṭha tva)mīdṛśaṃ. ❀ Cg: ātmānamīdṛśaṃ kuberavadivyavaibhavarahitam | daridramityarthaḥ |; so also Ck.t. ❀

34 ^{a}) D1.3.4 daśaśīrṣa (for daśagrīva). D9 yathā (for tathā). S2 yuktaḥ; D5 [ā]yatta (for yatna). —^{b}) V2 D6 -vikramaṃ (for -vikrama). —^{c}) D5.7.9 tathā (for yathā). Ś Ñ V B D2.5–12 T3.4 tvamapi(Ñ1 °si); G1 gacchasi (for bhavasi). B3 T3 vai (for me). B1.3 M6 vatsa; M5 śīghraṃ (for putra). —^{d}) Ś D2.8.9.12 bhava; Ñ1 bhāsi; Ñ2 V B D6.7.10.11 bhaver; D5 T3.4 bhaved; G1 kṣipraḥ; M5 putra (for śīghraṃ). —For 34^{c,d}, D1.3.4 subst.:

156* tvāmapyeva yathā paśye hyevaṃbhūtaṃ samāhitaḥ |

[D3 [e]vaṃ (for [e]va).]

—After 34, D5 reads 37^{a,b} (followed by 157*).

Aryā Research Team

G. 7. 9. 44
B. 7. 9. 44
L. 7. 8. 37

मातुस्तद्वचनं श्रुत्वा दशग्रीवः प्रतापवान् ।
अमर्षमतुलं लेभे प्रतिज्ञां चाकरोत्तदा ॥ ३५
सत्यं ते प्रतिजानामि तुल्यो भ्रात्राधिकोऽपि वा ।
भविष्याम्यचिरान्मातः संतापं त्यज हृद्गतम् ॥ ३६

ततः क्रोधेन तेनैव दशग्रीवः सहानुजः ।
प्राप्स्यामि तपसा काममिति कृत्वाध्यवस्य च ।
आगच्छदात्मसिद्ध्यर्थं गोकर्णस्याश्रमं शुभम् ॥ ३७

इति श्रीरामायणे उत्तरकाण्डे नवमः सर्गः ॥ ९ ॥

---

35 [a]) D6 स तु (for मातुस्). Ñ1 T1.2 G3 M3 तु; D1.3.4 G1.2 M1.2.4.6.7.9.10 स; M8 सद्- (for तद्). —[b]) D1.3.4 सहानुजः (for प्रतापवान्). —[c]) M1 प्रहर्षम् (for अमर्षम्). T3.4 गत्वा (for लेभे). Ñ1 अमर्षवशमागत्वा. —[d]) Ś1 D2.8.9.12 सोकरोत्; Ñ1 D7 T G3 M1–3.9 अकरोत् (for चाकरोत्). T2 तथा (for तदा).

36 Ś V1 D2.5.8.12 om. 36. —[ab]) Ñ1 B2 भ्राता; Ñ2 V2.3 B3.4 D6.7.10.11 भ्रातृ-; B1 भ्रातुस् (for तुल्यो). D9 भ्रात्रा तुल्यो (by transp.) (for तुल्यो भ्रात्रा). Ñ1 तुल्यो यथा; Ñ2 V2.3 B D6.7.9–11 तुल्योधिको (for भ्रात्राधिको). —[c]) T4 damaged for विष्याम्य. Ñ V2.3 B D1.3.4.6.7.9–11 M6 [ओ]जसा चैव (B1 चैवं; D1.3.4 M8 चापि); M5 चिरान्मातः (for [अ]चिरान्मातः). —[d]) D9 मद्गतं; T3.4 मा चिरं (for हृद्गतम्).

37 D5 reads 37[ab] (followed by 157*) after 34. T4 repeats 37[ab] consecutively. —[a]) D4 तेनैवं; M6 महता (for तेनैव). T (T4 [first time] mostly damaged) G M1–5.7–10 इत्युक्त्वा मातरं रामः; K (ed.) ततस्तेनैव कोपेन. —[b]) V1 T4 (second time) महाभुजः (for सहानुजः). —After 37[ab], Ś Ñ2 V B1–3 D T3.4 (after the second occurrence of 37[ab]) ins.:

157* चिकीर्षुर्दुष्करं कर्म तपसे धृतमानसः ।

[T4 चिकीर्षन्, D6 दुस्तरं (for दुष्करं). B1 तपसा; D1.4 तपसि (unmetric) (for तपसे).];

while M8 ins. after 37[ab]; whereas M6.10 ins. after 37:

158* सिद्धचारणसम्पन्नं देवर्षिगणसेवितम् ।

—Ñ1 B4 S (except T3.4) om. 37[cd]. —[c]) D1.4 मनसा (for तपसा). —[d]) Ś2.3 D1.3.4 T3.4 बुद्ध्या (for कृत्वा). Ś2.3 D2.3.5.8.9.12 T3 व्यवस्य; D1.4 [अ]वबुद्ध्य; T4 वृतःस (for [अ]ध्यवस्य). V2 इति कृत्वा व्यवस्थितः. ❀ Ct: इति कृत्वा इति बुद्धिं कृत्वा। अध्यवस्य तथा निश्चित्य च. ❀ —[e]) T4 damaged for च्छदात्मसिद्ध्य. Ś2.3 D2.9 T1.2 M6.7 अगच्छद्; D5 अगमद् (for आगच्छद्). Ś1 V1.3 अथ; Ś2.3 D2.5.8.9.12 S अर्थ- (for आत्म-). D1.3.4 त्वरितो राम (for आत्मसिद्ध्यर्थं). —[f]) D1.3.4 S (except T3.4) गोकर्णं नाम चा(D1.3.4 सा[sic])श्रमं(G1 पर्वतं). —After 37, Ñ V2.3 B D1.3.4.6.7.10.11 ins.:

159* स राक्षसस्तत्र सहानुजस्तदा
तपश्चचारातुलमुग्रविक्रमः ।
अतोषयच्चापि पितामहं विभुं
ददौ स तुष्टश्च वराञ्जयावहान् ।

[(l. 1) B1 महानुभावस् (for सहानुजस्तदा). Ñ1 सहानुजस्तत्र महाभुजस्तदा. —(l. 2) B2 चकार (for चचार). —(l. 3) B4 प्रभुं; D1.4 विभुर् (for विभुं). D3 भृशं पितामहं (for पितामहं विभुं). —(l. 4) D3 सु- (for च). B2 वरं (for वराञ्). Ñ1 V2 B3.4 D1.4 महार्हान्; Ñ2 महात्मने; B1 महाबलान्; B2 महात्मा; D3 भयावहान् (for जयावहान्).];

while M7 ins. after 37:

160* गत्वा गोकर्णं राक्षसेन्द्रोग्रकर्मा
वक्त्रान्भीमाक्षांस्तत्र हुत्वा हुताशे ।
धृत्वा वागादीन्संनियोज्यात्मकृत्ये
भक्त्या युक्तोऽसौ निष्प्रकम्पो बभूव ।

[Second line unmetric.]

Colophon. T4 damaged up to उ. —*Sarga name*: Ś D2.8.9.12 (D2 विप्राद्)रावणादिजन्म; Ñ V2 B रावणोत्पत्तिः; V1 D1.3.4 रावणप्रतिज्ञा; V3 रावणादिप्रसूतिः; D5 दशग्रीवजन्मवर्णनं. —*Sarga no.* (figures, words or both): Ś Ñ1 V2.3 B1.2 D1.2.12 om.; V1 7; D8.9 8. —After colophon, D2 concludes with राम; T4 with श्रीरामार्पणमस्तु; G M1.5.8 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

Arya Research Team

१०

अथाब्रवीद्विजं रामः कथं ते भ्रातरो वने ।
कीदृशं तु तदा ब्रह्मंस्तपश्चेरुर्महाव्रताः ॥ १
अगस्त्यस्त्वब्रवीत्तत्र रामं प्रयतमानसम् ।
तांस्तान्धर्मविधींस्तत्र भ्रातरस्ते समाविशन् ॥ २
कुम्भकर्णस्तदा यत्तो नित्यं धर्मपरायणः ।
तताप ग्रैष्मिके काले पञ्चस्वग्निष्ववस्थितः ॥ ३
वर्षे मेघोदकक्लिन्नो वीरासनमसेवत ।
नित्यं च शैशिरे काले जलमध्यप्रतिश्रयः ॥ ४
एवं वर्षसहस्राणि दश तस्यातिचक्रमुः ।
धर्मे प्रयतमानस्य सत्पथे निष्ठितस्य च ॥ ५
विभीषणस्तु धर्मात्मा नित्यं धर्मपरः शुचिः ।
पञ्च वर्षसहस्राणि पादेनैकेन तस्थिवान् ॥ ६

G. 7. 10. 6
B. 7. 10. 6
L. 7. 9. 6

10

D12 begins with उ॰.

1 [a]) Ś D2.8.9.12 राघवस्तं; D6.7.10.11 M10 मुनिं रामः (for द्विजं रामः). G1 अब्रवीद्वचनं रामः. —[b]) D1.3.4 M6.7 गतास्ते; G2.3 M1.2.9.10 कथांते (for कथं ते). M4–7 वनं. D1.3.4 भ्रातुराश्रमं (for भ्रातरो वने). Ś D2.8.9.12 गत्वाश्रम-मनुत्तमं; Ñ V B D5 T3.4 तं (V3 ते) गत्वाश्रममंडलं (V1 D5 T3.4 °मुत्तमं). —[c]) D5 ते; G1 वा; M6–8 नु (for तु). G1.2 तथा (for तदा). Ñ2 V2 B आचक्ष्व कीदृशं ब्रह्मंस्. —[d]) Ñ2 V2 B2–4 D6.7.10.11 M10 तेपुर्; B1 तेपे (sic) (for चेरुर्). Ñ2 V2 B महौजसः; D6.7.10.11 G1.2 M2.4.5.7–10 महाबलाः (for महाव्रताः). Ś Ñ1 V1.3 D2.5.8.9.12 T3.4 तपो(Ś2 moth-eaten)कुर्वञ्शिशाचराः.

G. 7. 13. 38
B. 7. 13. 39
L. 7. 12. 38

34 ^{ab}) B$_4$ ज्ञातं तत्ते; D$_{5-7}$ विज्ञातं तु(D$_5$ हि); M$_6$ विज्ञायते. Ś$_1$ T$_{3.4}$ वाक्यं; M$_{10}$ चैव (for दूत). —Ś$_1$ om. (hapl.) from 34^b up to the prior half of 250*. Ś$_{2.3}$ Ñ V$_{1.3}$ B D$_{1-5.8.9.12}$ transp. दूत and वाक्यं. Ś$_{2.3}$ D$_{2.8.9.12}$ यच्च; B$_3$ यत्ते; D$_7$ T$_{1.2}$ G M$_{1-5.8-10}$ यस्य (for यत्त्वं). T$_{3.4}$ यस्त्वया दूत भाषितं (for ^{b}). —^{c}) Ś$_{2.3}$ D$_8$ M$_9$ नैवं त्वम्; M$_8$ देवत्वम्. B$_{1.2}$ D$_{12}$ अपि; M$_{2.5.8.9}$ अस्ति; Ct as in text (for असि). G$_1$ येनासौ. M$_{6.10}$ नैवाहमस्मि दासस्ते. —^{d}) T$_2$ damaged for भ्रात्रा येनासि. D$_6$ M$_8$ भ्राता; T$_1$ G$_1$ M$_{4.7}$ भर्त्रा; M$_6$ भर्तुर्; Ck.t as in text (for भ्रात्रा). D$_{7.10.11}$ T$_{1.2}$ G$_3$ M$_{1.3.5.10}$ Ct चोदितः (for प्रेषितः). Ś$_{2.3}$ Ñ V$_{1.3}$ B$_{1.2.4}$ D$_{1-5.8.9.12}$ T$_{3.4}$ येन त्वं(D$_{1-4.8.9}$ °नासि) ग्रहि(V$_1$ D$_5$ T$_{3.4}$ °नासि प्रेषि)तो मम; B$_3$ नैवं प्रतिहतो मम.

35 ^{a}) D$_6$ हितं स न (by transp.); D$_7$ हितबुद्ध्या; D$_{10.11}$ Ct हितं नैष. M$_8$ मम च (for स मम). —^{b}) M$_6$ यद्ब्रवीति धनेश्वरः. —For 35^{ab}, Ś Ñ V$_{1.3}$ B D$_{2.5.8.9.12}$ T$_{3.4}$ subst.:

250* हितबुद्ध्या न मे वाक्यमुक्तवान्धनरक्षिता ।

[Ś$_1$ om. up to the prior half (cf. v.l. 34). Ñ$_2$ V$_3$ B हितमेतत्; V$_1$ इति बुद्ध्वा. B$_{1.3.4}$ ते (for मे). B$_2$ उक्तिमुक्तरक्षिता (corrupt); T$_4$ धनदेन हि प्रेषितं (for the post. half).]

—^{c}) Ś$_1$ V$_3$ D$_{2.5.8.9}$ T$_4$ च; Ś$_{2.3}$ मां; Ñ V$_1$ B D$_{1.4}$ T$_3$ हि; D$_3$ किं; D$_{12}$ om. (subm.) (for तु). —^{d}) M$_{4.10}$ श्रावयते. Ś$_1$ Ñ V$_{1.3}$ B D$_{2.5.8.9.12}$ T$_{3.4}$ मां श्रावयति(B$_4$ D$_{5.9}$ °सि) विस्मितः; Ś$_{2.3}$ स श्रावयत्यविस्मितः; D$_{3.6.7.10.11}$ M$_6$ मूढः श्राव(M$_6$ श्लाघ)यते किल. —After 35, Ś D$_{2.8.9.12}$ ins.:

251* एतावन्तं मया कालं स्नेहात्तस्यैव मर्षितम् ।
[Ś$_1$ D$_8$ अहं कालं (sic); D$_{12}$ महाकालं.];

while Ñ V$_3$ B$_{1.2.4}$ ins. after 35:

252* यच्च दूत मया काल एतावांस्तस्य मर्षितः ।
[V$_3$ यदि तावन्; B$_2$ यस्तं दूत (sic). Ñ तव (for तस्य). Ñ$_1$ कर्षितः (for मर्षितः).];

whereas D$_{1.3.4}$ M$_6$ ins. after 35:

253* य इदानीं महाकालस्ततस्तस्य तु मर्षितः ।
[M$_6$ मया (for महा-). D$_3$ दूत (for ततस्). D$_4$ तु (for तु). M$_6$ तद्वचस्तस्य मर्षितं (for the post. half).]

—After 35, D$_{6.7.10.11}$ T$_{1-3}$ G M$_{1-5.7-10}$ ins.:

254* नैवेदं क्षमणीयं मे यदेतद्भाषितं त्वया ।
[K (ed.) न चेदं. T$_3$ रक्षणीयं; Ct as above (for क्षम°).]

—Then D$_{6.7.10.11}$ T$_3$ cont.; while V$_1$ D$_5$ T$_4$ ins. after 35:

255* यदेतावन्मया कालं दूत तस्य तु मर्षितम् ।
[V$_1$ D$_6$ T$_{3.4}$ यदि तावन्; D$_{5.7}$ यदिदानीं; Ct यदेतावन् (as above). V$_1$ D$_5$ वाक्यम्; D$_7$ कामम्; T$_4$ काल; Ct कालं (as above) V$_1$ D$_{5.6}$ T$_3$ एतावत्तस्य; D$_7$ तद्वचस्तस्य; T$_4$ एतावांस्तस्य. V$_1$ रक्षितं; T$_4$ मर्षितः (for मर्षितम्).]

36 ^{a}) Ś D$_{2.8.9.12}$ भ्राता किं तु(Ś$_1$ D$_{2.8}$ न; D$_{12}$ नु); Ñ$_1$ भ्राता मे च; Ñ$_2$ V$_{1.3}$ B$_{1.4}$ D$_{1.3-5}$ T$_{3.4}$ M$_6$ भ्राता किल; B$_3$ भ्राता गुरुर्; Cg.t as in text (for न हन्तव्यो). B$_3$ मम ज्येष्ठो; D$_6$ G$_{1.2}$ M$_{10}$ गुरुः श्रेष्ठो. —V$_3$ illeg. for ^{bcd}. —^{b}) Ś$_{1.2}$ B$_{1.3.4}$ D$_{2.3.6-8.10.11}$ T$_{1.3.4}$ G$_3$ M$_{1.4.10}$ मया; Cg.k as in text (for मम). Ś Ñ$_2$ B D$_{2.5.6.8.9}$ T$_{3.4}$ जानता; Ñ$_1$ मानितं; D$_{1.3.4}$ नान्यथा; G$_1$ M$_{10}$ मान्यते; M$_{1.3}$ मानितः; M$_{2.9}$ मन्यतां; M$_6$ मंदभात्; M$_7$ मन्यतः; Cg.k.t as in text (for मन्यते). —^{c}) Ñ B वाक्येन; D$_{10}$ वचनं; T$_{3.4}$ न क्षंस्ये; G$_2$ M$_{10}$ श्रुत्वा च (for श्रुत्वा मे). —^{d}) D$_{10}$ (with hiatus) श्रुत्वा (for वाक्यम्). V$_1$ एतत् (for एषा). M$_{4.7}$ धृता मतिः. Ś D$_{2.8.12}$ वाक्यमे-(Ś$_1$ °क्यान्ये)वं(D$_2$ °तत्) कृ(D$_{12}$ क्ष)तान्य(D$_{2.12}$ °न)पि; Ñ$_1$ B वरोन्मत्तस्य रोषितः; Ñ$_2$ वरोन्मत्तः सुरोषितः; D$_{1.3.4}$ वागेषाम्य(D$_{1.4}$ [with hiatus] °षा अ)कृता इति; D$_5$ तत्कृत्यमिति निश्चयः; D$_9$ वाक्यं मे क्रियतामिति; T$_3$ वाक्यं श्रुत्वा सुदुर्मतेः; T$_4$ श्रुत्वा वाक्यं सुदुर्मतेः; G$_3$ M$_{10}$ ममैषानुमता मतिः.

37 ^{a}) T$_3$ त्रिलोकान्. Ś Ñ$_2$ B$_{1.4}$ D$_{1.4.8.9.12}$ G$_3$ M$_{2.6.8-10}$ अव-; Ñ$_1$ एव; V$_1$ हि वि-; B$_2$ इह; B$_3$ अथ; D$_2$ न च; D$_3$ न वि-; D$_5$* वि-; T$_2$ अप- (for अपि). —^{b}) Ś V$_{1.3}$ D$_{2.5.9.12}$ T$_{3.4}$ बाहुवीर्यंव्यपाश्रयः(V$_1$ T$_{3.4}$ °यात्); Ñ$_1$ D$_{1.3.4}$ स्वबाहुबलगर्वितः(Ñ$_1$ °माश्रितः); B$_{1.3.4}$ बाहुबलसमाश्रितः(B$_3$ °समन्वितः); D$_8$ बाहुवीर्याद्यथा श्रियं. —^{c}) Ś D$_{2.8.12}$ एवं; D$_{6.7}$ M$_6$ इदं; D$_9$ अस्मिन् (sic); T$_1$ एतं (for एतत्). Ś D$_{2.5.8.9.12}$ एको; D$_{6.7.10.11}$ M$_4$ एव (for एषो). —^{d}) M$_9$ [ए]तस्य (for [ए]कस्य). Ś V$_{1.3}$

G. 7. 13. 39
B. 7. 13. 40
L. 7. 12 39

एवमुक्त्वा तु लङ्केशो दूतं खड्गेन जघ्निवान् ।
ददौ भक्षयितुं ह्येनं राक्षसानां दुरात्मनाम् ॥ ३८

ततः कृतस्वस्त्ययनो रथमारुह्य रावणः ।
त्रैलोक्यविजयाकाङ्क्षी ययौ यत्र धनेश्वरः ॥ ३९

इति श्रीरामायणे उत्तरकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

Arya Research Team

D1-5.7-9.12 T3.4 M6 कृतेन वै(V1 तु); D6 कृतस्य वै; D10.11 तु वै कृते (for कृते च वै). —For 37^{c-d}, Ñ B subst.:

256* अस्मिन्मुहूर्ते एकस्य कृते तस्याहमेष वै ।

[B3 तस्मिन्. B2 कृत्वा (for कृते). Ñ1 ह्यमर्षेण (for [अ]हमेष वै).]

—^{e}) D2.6.7 T1.2 G3 M3 च (for तान्). —^{f}) G2 नेष्यामि च (for नयिष्यामि). Ś Ñ V1.3 B D1-5.8.9.12 T3.4 G1 M6.10 नयामि(G1 नयिष्ये; M10 नेष्यामि) यमसादनं.

38 ^{a}) M1 दशग्रीवो (for तु लङ्केशो). Ś Ñ V3 B D2.8.9.12 हि(Ś3 D8 भि)त्वा(B2 हत्वा) स(Ñ1 तं) रोषरक्ता-(Ñ1 B1.3.4 °ताम्रा)क्षो; V1 छित्त्वा तमेव ताम्राक्षो; D1.3.4 M6 स छित्त्वा क्रोध(M6 रोष)दीप्ताक्षो; T3 क्षिप्त्वा सरोषं रक्ताक्षो. —^{b}) D1.3.4 क्रोधेन (for खड्गेन). Ś Ñ1 V1 B1.3.4 D1-4.8.9.12 T3 M6 राक्षसः; Ñ2 V3 B2 रावणः (for जघ्निवान्). —^{c}) Ñ2 B तत्र; D1.3.4 ह्येकं (for ह्येनं). Ś Ñ1 V1.3 D2.5.8.9.12 T3 भक्ष्या(D2.5.9 °क्षा)र्थं प्रददौ तत्र (V1 तं तु). —^{d}) Ś Ñ1 D2.5.8.9.12 राक्षसेभ्यो(D5 °सेंद्रो)-ऽकर्मकृत् ; Ñ2 V3 B2 राक्षसेभ्यो गतज्वरः ; V1 राक्षसेभ्यो दशाननः; B1.3.4 राक्षसेभ्यो निशाचरः ; D1.3.4 M6 रक्षोभ्यो ये समीपतः; T3 राक्षसेभ्यो नृशंसकः. —After 38, Ñ V3 B D3 ins.:

257* तत उत्थाय संक्रुद्धो मन्त्रिणस्तान्समागतान् ।
आज्ञापयामास तदा निर्यातेति महाबलः ।

[(l. 1) D3 व्याहरन्मंत्रिणः *कान् (for the post. half). —(l. 2) V3 D3 निर्यातं स(D3 सु-) (for निर्यातेति). G (ed.) निशाचरः (for महाबलः).]

39 ^{a}) G2 M6 कृतस्वस्त्ययनो राम. —^{b}) Ś1 Ñ V3 B D2.8.9.12 T3 M6 राक्षसः (for रावणः). V1 दशग्रीवो महाबलः; D1.3.4 रावणो राक्षसाधिपः. —B3 om. 39^{c-d}. —^{c}) Ś Ñ V1.3 B1.2 D2.8.9.12 त्रिलोक- (for त्रैलोक्य-). D1.3.4 अमात्यबलसंयुक्तो. —^{d}) V1 B1 D3.5 येन; B4 D2 तत्र (for यत्र). Ś2.3 D12 धनाधिपः ; Ñ2 निशाचरः ; D3 धनेश्वरं; M2 नरेश्वरः (for धनेश्वरः).

Colophon. —*Kāṇḍa name*: Ś1 V3 D9 om. —*Sarga name*: Ś V3 D12 रावणप्रस्थानं; Ñ1 V1 D2.8.9 रावण-प्रस्थानो; Ñ2 B1-3 धनदं प्रति यानं(B2.3 °त्रा) ; D1.3.4 दूत-प्रस्थानिको; D5 L (ed.) रावणप्रयाणो (L [ed.] °णं). —*Sarga no.* (figures, words or both): Ś Ñ1 V3 B1-3 D2 om. ; V1 11 ; D8.9.12 12. —After colophon, T4 concludes with श्रीरामार्पणमस्तु; G M1.5.8 with श्रीरामाय नमः ; M10 with श्रीरामचन्द्राय नमः .

१४

ततः स सचिवैः सार्धं षड्भिर्नित्यं बलोत्कटैः ।
महोदरप्रहस्ताभ्यां मारीचशुकसारणैः ॥ १
धूम्राक्षेण च वीरेण नित्यं समरगृध्नुना ।
वृतः संप्रययौ श्रीमान्क्रोधाल्लोकान्दहन्निव ॥ २
पुराणि स नदीः शैलान्वनान्युपवनानि च ।
अतिक्रम्य मुहूर्तेन कैलासं गिरिमाविशत् ॥ ३

तं निविष्टं गिरौ तस्मिन्राक्षसेन्द्रं निशम्य तु ।
राज्ञो भ्रातायमित्युक्त्वा गता यत्र धनेश्वरः ॥ ४
गत्वा तु सर्वमाचख्युर्भ्रातुस्तस्य विनिश्चयम् ।
अनुज्ञाता ययुश्चैव युद्धाय धनदेन ते ॥ ५
ततो बलस्य संक्षोभः सागरस्येव वर्धतः ।
अभूत्तैर्कृतराजस्य गिरिं संचालयन्निव ॥ ६

G. 7. 14. 7
B. 7. 14. 7
L. 7. 13. 7

14

☞ V2 missing for Sarga 14 (cf. v.l. 7.12.2).

1 B3 om. 1–4^{b}. —^{ab}) Ś Ñ1 V1.3 D2.5.8.9.12 T3.4 स ययौ; T1.2 M3 Ck ततस्तु (for ततः स). Ñ1 V1 D5 T3.4 ऋद्धः (for षड्भिर्). G1.2 M4.5.10 षड्भिः सार्धं (by transp.). Ś V3 D2.8.9.12 क्रुद्धो; Ñ1 V1 D5 T3.4 षड्भिर्; Ñ2 B1.2.4 क्रूरैर्; D4.6.7.10.11 G1.2 M3.5.7.10 नित्य- (for नित्यं). Ś Ñ1 V1.3 D2.8.9.12 T3.4 महारथैः; D5 महाबलैः; D6.7 M10 -बलोद्भटैः; D10.11 -बलोद्भतः (for बलोत्कटैः).

2 B3 om. 2 (cf. v.l. 1). —^{a}) V1 तु (for च). D9 G1.2 स धूम्राक्षेण. —^{b}) Ś Ñ1 V1.3 D1.2.4.5.8.12 -गृध्नि (D8 * *)णा; Ñ2 illeg.; B1.2.4 -सेविना; D3.6 M10 -बुद्धिना; D7.9–11 M4.7.8 -गर्धिना; G2 -गर्विणा; M1 -शालिना (for -गृध्नुना). —D5 om. 2^{cd}. —^{c}) Ś D2.8.9.12 G1 ततः स(D9 G1 सं-); Ñ B1.2.4 D3.4 T4 वृतः स; M3 संवृतः (for वृतः सं-). Ś Ñ V3 B1.2.4 D2.8.9.12 भीमाँल् (for श्रीमान्). —^{d}) M1 om. क्रान्दहन्निव. Ś1 V3 D2.8.9.12 लोकान्क्रोधाद् (by transp.); Ś2.3 लोकान्क्रुद्धो; B1.2 लोकान्सर्वान्; T1.2 G2 M9.10 क्रोधाल्लोकं (for क्रोधाल्लोकान्). Ñ B4 लोकानु (B4 जगदु)द्वर्तयन्निव; D1.3.4 क्रोधात्संप्रदह(D3 °हस)न्निव.

3 B3 om. 3 (cf. v.l. 1). —^{a}) Ś Ñ V1.3 B1.2.4 D2.5.8.9.12 T3 स पुराणि(by transp.). Ś2.3 Ñ1 D3.8.12 T1 G M1.3.5.9.10 नदीः; M8 दिशः (for नदीः). V1 (marg. also) रम्याः; G1 M1 -शैलः; M4 (after corr. *sec. m.* as in text).7 श्रीमान् (for शैलान्). —^{d}) Ś1 D8.12 G2 कैलासः. Ś V3 D2.6–12 T3.4 (also) M10 आगमत्; Ñ1 D6 आगतः; Ñ2 B1.4 आसदत्; V1 अभ्यगात् (for आविशत्). —After 3, T3 ins. 258*.

4 B3 om. 4^{ab} (cf. v.l. 1). —^{a}) Ñ B1.2.4 D1.3.4.6.7.10.11 T3 M6 संनिविष्टं. —^{b}) D3 M4 निशाम्य. T3 G1.2 च (for तु). —For 4^{ab}, Ś V1.3 D2.5.8.9.12 T4 subst.; D1.3.4 cont. l. 2–3 only after 260*; T3 ins. after 3 :

258* सोऽधिष्ठितान्गिरौ तस्मिन्यक्षान्रणविशारदान् ।
व्यद्रावयत शैलेन्द्रात्ते तमारुरुहुः क्षणात् ।
ते तु तत्र निशम्यैवं दशग्रीवं निशाचरम् ।

[(l. 1) V1.3 D5 सं(D5 स)निविष्टान्; T3.4 संनिविष्टो (for सोऽधिष्ठितान्). —(l. 2) D1.3.4 विद्रुता यांति; D2 विद्रावयत. D1.3–5.9 T3.4 शैलेंद्रं. D1.3.4 यक्षाश्चारुरुहुर्भयात्; D12 ते ततो दुद्रुवुः क्षणात् (for the post. half). —(l. 3) Ś1 V1.3 D2–5.9 निशाम्यैवं; T3.4 निशम्यैनं. D5 महाबलं (for निशाचरम्).]

—After 4^{ab}, Ñ B1.2.4 D1.3.4.6.7.10.11 S (except T4) ins. :

259* युद्धेऽत्यर्थकृतोत्साहं दुरात्मानं समक्षिणम् ।
यक्षा न शेकुः संस्थातुं प्रमुखे तस्य रक्षसः ।

[(l. 1) Ñ1 युद्धेष्वथ; Ñ2 D6.7.10.11 युद्धेष्वहं तं; B1.2.4 D1.3.4 G1 युद्धेत्यर्थं; T3 M1 युद्धेत्यंत-; M4.7 युद्धे नित्यं; M8 युद्धार्थं हि; M10 युद्धेत्यर्तं (for युद्धेऽत्यर्थ-). G2 M5 युद्धे कृतमहोत्साहं (for the prior half). B4 दुष्टात्मानं. G2 महाबलं; Ck.t as above (for समक्षिणम्). —(l. 2) Ñ1 योधा (for यक्षा).]

—Then D1.3.4 cont. :

260* निरुद्यमा दिशो राम रावणस्य दुरात्मनः ।
ते जवेन प्रधावन्तो भयत्रस्ता विचेतसः ।

[(l. 1) D3 द्रवमाणा दिशो मेजू (for the prior half).] —^{c}) Ś Ñ V1.3 B D2.5–12 T3.4 [इ]ति विज्ञाय (for [अ]यमित्युक्त्वा). —^{d}) B2 याता (for गता).

5 ^{a}) Ś Ñ V1.3 B1.2.4 D2.5–12 T3.4 M6 ते गत्वा; B3 तैर्गत्वा; D3 M2.4.5.7.9 गत्वा च; M10 ते राज्ञे (for गत्वा तु). Ś V1 D2.5.8.9.12 T3.4 आख्याय; B3 आख्यातं (for आचख्युः). —^{b}) M10 तत्र (for तस्य). Ñ1 विचेष्टितं; Ñ2 B D6.7.10.11 चिकीर्षितं; T1.2 सुनिश्चयं (for विनिश्चयम्). —^{c}) Ś Ñ V1.3 B D2.5–12 T3.4 हृष्टाः; M8 तेन (for चैव).

6 ^{a}) Ś Ñ V1.3 B D T3.4 M10 बलानां (for बलस्य). B3 संरक्षो (sic); T1.2 M1.4.8.10 संक्षोभः; Ct as in text (for संक्षोभः). —^{b}) G1 वर्धितः; M6.10 वर्धते (for वर्धतः). Ś V1.3 D2.5.7–12 T3.4 व्यवर्धत यथो(D10 11 इवो)दधेः; Ñ

Arya Research Team

G. 7. 14. 8
B. 7. 14. 8
L. 7. 13 8

ततो युद्धं समभवद्यक्षराक्षससंकुलम् ।
व्यथिताश्चाभवंस्तत्र सचिवास्तस्य रक्षसः ॥ ७
तं दृष्ट्वा तादृशं सैन्यं दशग्रीवो निशाचरः ।
हर्षान्नादं ततः कृत्वा रोषात्समभिवर्तत ॥ ८
ये तु ते राक्षसेन्द्रस्य सचिवा घोरविक्रमाः ।
ते सहस्रं सहस्राणामेकैकं समयोधयन् ॥ ९

ततो गदाभिः परिघैरसिभिः शक्तितोमरैः ।
वध्यमानो दशग्रीवस्तत्सैन्यं समगाहत ॥ १०
तैर्निरुच्छ्वासवत्तत्र वध्यमानो दशाननः ।
वर्षमाणैरिव घनैर्यक्षेन्द्रैः संनिरुध्यत ॥ ११
स दुरात्मा समुद्यम्य कालदण्डोपमां गदाम् ।
प्रविवेश ततः सैन्यं नयन्यक्षान्यमक्षयम् ॥ १२

B D6 ववृधे तोयधे(Ñ2 B2.3 °दै)रिव —^{c}) Ś Ñ V1.3 B D2.5-12 T3.4 M6.10 तस्य; D1.4 सैन्यं; D3 अतस्तन् (hypm.) (for अभून्). —^{d}) Ś Ñ V1.3 B D1.2.4-12 T3.4 शैलं; D3 सैन्यं; G1.2 M5 गिरीन् (for गिरिं). V1 D5 T3.4 संक्षोभयन्; V3 B2 D4.6.10 G1 संचलयन्.

7 ^{b}) M10 -सेनयोः (for -संकुलम्). —^{c}) B3 अर्दिताश्; D3 मथिताश्; D8 व्याघाताश् (for व्यथिताश्). —^{d}) Ś Ñ V1.3 B D2.5-12 T3.4 राक्षसस्य ते (for तस्य रक्षसः).

8 ^{a}) Ś V1.3 B1 D2.5.6.8-12 T3.4 Cg स; Ñ B2-4 G3 M2-4.6.10 तद् (for तं). D6 राक्षसं (for तादृशं). —^{b}) D1.3.4 सविस्मयः (for निशाचरः). —^{c}) M1.5 हर्ष; G1 सिंह-; Cg.k as in text (for हर्षान्). —^{d}) D1.3.4 M6 क्रोधात् (for रोषात्). D1.3.4 समभिधावत; T2 M5.10 समभिवर्ततेते; G2 M6.8 समभिवर्धते(M8 °त) (for समभिवर्तत). —For 8^{cd}, Ś Ñ V1.3 B D2.5-12 T3.4(repeats after 11^{ab}) subst. :

261* हर्षान्नादान्बहून्कृत्वा स क्रोधादभ्यधावत ।

[Ñ1 D5-7.10.11 T3.4(first time) हर्ष- (for हर्षान्). T4 (second time) नादं. Ś D2.8.9.12 T4 (second time) मुहुर् (for बहून्). Ś Ñ1 D2.5.8.9.12 मुक्त्वा; Ñ2 दृष्ट्वा; T3.4 (first time) श्रुत्वा (for कृत्वा). Ñ2 B3 D11 अभ्यभाषत (sic). Ś V1.3 D2.5 8.9.12 T3.4(both times) तदा(D9 °था) क्रोधाद्(V1.3 D5 T3.4 समभि)धावत (for the post. half). ❀ Ct: हर्षनादान्हर्षजसिंहनादान्. ❀]

9 ^{a}) B4 D5 T3.4 ये च; G1 येन (for ये तु). V1 राक्षसराजस्य (for ते राक्षसेन्द्रस्य). —^{b}) Ś V1 D2.8 9.12 T4 भीम- (for घोर-). T3 -दर्शनाः (for -विक्रमाः). —^{c}) Ś V1.3 D8.12 द्वि(V3 ते)सहस्र(Ś2.3 °स्रं; D8 °स्रे)सहस्राणाम्; Ñ B D6 7.10.11 तेषां सहस्रमेकैको. —^{d}) Ś V1.3 D4.5.8.12 T G M6 8.10 Ck.t समयोधयत्; M5 समयोजयत्; Cg as in text (for समयोधयन्). Ñ B D6 7.10.11 य(B3 द)क्षाणां समयोधयत्(Ñ1 ° येत्).

10 ^{a}) D2.8.9.12 गदासि- (for गदाभिः). Ś Ñ V1.3 B D2.5-12 T3.4 मुसलैर् (for परिघैर्). —^{b}) T3 यष्टिभिः (for असिभिः). V3 शक्तिभिस्तथा (for शक्तितोमरैः). Ś1 D8 शक्तिभिश्च स तोमरैः. —^{c}) Ś Ñ2 D6-8.10.11 हन्यमानोः B3 युध्यमानोः D2.12 मथ्यमानोः G2 M5 बाध्यमानो (for वध्यमानो). —V3 illeg. for 10^{d}. —^{d}) D1.3.4 M4.6.7 अवगाहत (for सम°). Ś D2.5 8.9 T4 L (ed.) व्यवगा(Ś1 D8 रोषाद्व्यः; L [ed.] रोषाद)हत तद्बलं; V1 D12 T3 व्यगाहत च(T3 स) तद्बलं; G2 M5 न चकंपेचलोपमः (G2 °त्तमः).

11 G3 om. from 11 up to l. 1 of 263*. G2 M5 om. 11^{ab}. —^{a}) Ś1 Ñ V1 3 D1-4,6-11 T3 M1.6.7 स; Ś2.3 D12 सं- (for तैर्). Ś1 निरुच्छ्वासयस्(sic); Ś2.3 D12 -निरुध्यागतस्; Ñ1 V1 D1-5.9 T3.4 निरुच्छ्वासवांस्; D8 विरुद्धाशयस् (for निरुच्छ्वासवत्). B निरुत्साहो(B1 °द्योगो; B4 °च्छ्वासो)भवत्तत्र. —^{b}) B2 मथ्यमानोः G (ed.) व्यथमानो. Ñ1 V1 D9 T3.4 M1 निशाचरः (for दशाननः). —After 11^{ab}, T4 repeats 261*. —^{c}) Ś1 V3 D8 महाखाणि (for इव घनैर्). —^{d}) Ś2.3 D2.9.12 सोवरुध्यत; V1 T3.4 समरुध्यत; D1.3-5 G1 M2 स नि(D5 व्य)रुध्यत; G2 समयुध्यत; M5.10 स न्ययु(M10 °रु)ध्यत; M7 संन्यरुध्यत (for संनिरुध्यत). Ś1 V3 D8 शस्त्राणि च समंततः. —For 11^{cd}, Ñ B D6.7.10.11 subst. :

262* वर्षद्भिरिव जीमूतैर्धाराभिरवरुध्यत ।

[D7 अवरुध्यते. Ñ1 संनिरुध्यत वै तदा; B1.4 स न्य(B4 संव्य)रुध्यत राक्षसः; B2.3 संनिरुद्धो महाब(B3 °च)लः (for the post. half).]

—Thereafter they (Ñ1 in marg.) cont.; V3 D1.3-5 S ins. after 11 :

263* व्यथां न कुरुते वीरो यक्षैः शस्त्रसमाहतः ।
महीधर इवाम्भोदैर्धाराशतसमुक्षितः ।

[G3 om. l. 1. —(l. 1) M6 वीर. Ñ V3 B2-4 D1.3.4. 6.7.10.11 न चकार व्यथां चैव; B1 न विव्यथे दशग्रीवो (for the prior half). Ñ1 V3 B1 D6.7.10.11 T3.4 G1 M5.6.10 यक्ष- (for यक्षैः). V3 D6.7.10.11 T3.4 M3.10 -शस्त्रैः; M1 तत्र (for शस्त्र-). M8 -समाहतैः. —(l. 2) B4 इवास्तोयैर्(sic) (for इवाम्भोदैर्). M5 -समुक्षितैः. D1.3.4 नानावर्षसमुद्यतैः (for the post. half).]

12 ^{a}) Ś1 V3 D8 दशग्रीवः; Ñ V1 B D6.7.10.11 T3.4 M10 स महात्मा; M6 दुरात्मा स (by transp.) (for स दुरात्मा). B1 समुद्दिश्य; B4 समुद्गम्य (for समुद्यम्य). —^{b}) Ś Ñ1 V3 D2.5.8.9.12 T3 कालदंडनिभां. —^{c}) B1.3.4 च तत् (for ततः). G1 सैन्यौ (sic) (for सैन्यं). —^{d}) Ś D8 नेतुं; G1 जक्षद् (for नयन्). D12 यक्षेंद्राणां (for नयन्यक्षान्).

स कक्षमिव विस्तीर्णं शुष्केन्धनसमाकुलम् ।
वातेनाग्निरिवायत्तोऽदहत्सैन्यं सुदारुणम् ॥ १३
तैस्तु तस्य मृधेऽमात्यैर्महोदरशुकादिभिः ।
अल्पावशिष्टास्ते यक्षाः कृता वातैरिवाम्बुदाः ॥ १४
केचित्त्वायुधभग्नाङ्गाः पतिताः समरक्षितौ ।
ओष्ठान्स्वदशनैस्तीक्ष्णैर्दशन्तो भुवि पातिताः ॥ १५
भयादन्योन्यमालिङ्ग्य भ्रष्टशस्त्रा रणाजिरे ।
निषेदुस्ते तदा यक्षाः कूला जलहता इव ॥ १६
हतानां स्वर्गसंस्थानां युध्यतां पृथिवीतले ।
प्रेक्षतामृषिसंघानां न बभूवान्तरं दिवि ॥ १७
एतस्मिन्नन्तरे राम विस्तीर्णबलवाहनः ।
अगमत्सुमहान्यक्षो नाम्ना संयोधकण्टकः ॥ १८

G. 7. 14. 21
B. 7. 14. 21
L. 7. 13. 20

13 [a]) Ś D2.8 9.12 संपूर्णं (for विस्तीर्णं). —[b]) D5 आज्येंधन-. D1.3.4 T1.2 G3 M3 समावृतं (for -समाकुलम्). Ñ2 V3 D6.7 10.11 G1 M1 Ct शुष्केंधनमिवाकुलं. —V3 illeg. for 13[c]–16. —[c]) Ś D8 वनम्; D2.9.12 वातैर् (for वातेन). B1 [इ]वाग्निर् (by transp.) (for [अ]-ग्निरिव). Ś Ñ V1 B D2.5–12 T3.4 Ct [आ]दीप्तो; D1.3.4 [आ]यस्तो; M10 [आ]ध्मातो (for [आ]यत्तो). —[d]) G1 वसन्; G3 M2.4.6.8–10 दहन् (for ऽदहत्). Ś Ñ V1 B D2.5–12 T3.4 यक्षसैन्यं ददाह तत्.

14 V3 illeg. for 14 (cf. v.l. 13). —[a]) Ś D12 ते तु; D8 तत्ते (for तैस्तु). Ś Ñ V1 B D2.5–12 T3 तत्र (for तस्य). Ś Ñ B D2.5.8.10–12 T3.4 महामात्यैर्; V1 महासैन्यं; D6.7.9 सहामात्यैर्; G2 M5 तथामात्यैर् (for मृधेऽमात्यैर्). —[c]) B2 स्वल्प- (for अल्प-). —D7 reads from स्ते up to [d] in marg. Ś Ñ V1 B D2.5–11 T3.4 -[अ]वशेषास् (for -[अ]वशिष्टास्). D12 अल्पावशेषिता; M5 अल्पाः शिष्टास्ततो. —[d]) B2 हृता (for कृता).

15 V3 illeg. for 15 (cf. v.l. 13). —[a]) T3 om. केचित्. Ś Ñ V1 B1.3 D2.5–12 T3 स(T3 *)माह-(Ñ1 °ग)ता भग्नाः; B2.4 समागमे भग्नाः; T4 G2 M2.5.10 चा(M10 आ)युधभग्नांगाः. —[b]) D1.3.4 लुपिताः (for पतिताः). Ś Ñ2 V1 B D2.5–12 M6 समरे; T3 शेरते; G2 ते रण- (for समर-). —D1.4 repeat 15[cd] after 17[ab]. —[c]) Ñ2 B1(orig.)4 D1.3.4(D1.4 both times).7.10.11 T3 ओष्ठांश्च; B1 (marg. also) अन्यांश्च; B2 ओष्ठाग्रे; B3 G1.2 ओष्ठान्स-; D8 M7 ओष्ठान्सु-; D12 दष्टाश्च (for ओष्ठान्स्व-). B3 -वदनैस्. —[d]) T1.2.4 G1 M2.6.10 दशंतो. M5 विनिपातिताः; M6 रुषिता रणे (for भुवि पातिताः). Ś Ñ V1 B D2.5–12 T3 ददंशुः (Ñ2 B1.2 D5–7.10.11 अदशन्; D2.8.12 ददशुः) कुपिता रणे; D1.4(both first time) दशंति रुषिता रणे; D1.3.4(D1.4 second time) क्रोधात्संदशतां रणे.

16 V3 illeg. for 16 (cf. v.l. 13). D3 om. 16–17[b]. —[a]) Ś Ñ1 B1.2.4 D8.12 T3 श्रांतास्तु; Ñ2 V1 B3 D6.7.10.11 श्रांताश्च; D2.5 शांतास्तु; D9 अतस्तु (for भयाद्). G(ed.) आलोक्य (for आलिङ्ग्य). —[c]) Ś Ñ V1 B D2.5–12 T3 सीदंति स्म(Ñ2 D6.7.10.11 च); T1.2 G1.3 M8 विषेदुस्ते (for निषेदुस्ते). Ś V1 D2.8.9.12 च ते; Ñ2 यदा; T4 G2 M10 तथा; G1 यथा (for तदा). T4 वीरा; M10 राम (for यक्षाः). D1.4 विदीर्णा विद्रुता यक्षाः; M6 सीदति निहता यक्षाः. —[d]) M10 वृक्षजाल- (for कूला जल-). Ś V1 B4 D2.5.8.9.12 T3 कूलानि(B4 ग्राहाणि) सलिले य(T3 °लंर्य, था; Ñ B1–3 D6.7.10.11 कूलानी(D10.11 °ला इ)व जलेन हः; T4 यक्षा जलधरा इव; G1 कूला इव गजाहताः. ❀ Ct: कूला इति लिङ्व्यत्ययः. ❀

17 D3 om. 17[ab] (cf. v.l. 16). —[a]) Ś1 गतानां; T3 G1.3 भूतानां; Cv.g.k.t as in text (for हतानां). Ś Ñ V1.3 B D2.5–12 T3.4 गच्छतां स्वर्गं (for स्वर्गसंस्थानां). —[b]) Ś Ñ V1.3 B D2.5–8.10–12 T3 अथ(B4 °भि)धाव(B2 °बाध[meta.])तां (for पृथिवीतले). —After 17[ab], D1.4 repeat 15[cd]. —[c]) Ś Ñ B D2.6–9.12 M6 पश्यताम्; Cv.g.k.t as in text (for प्रेक्षताम्). —[d]) T2 सं-; T3 स (for न). Ś V1 D1–5.8.9 तदा; M4 दिवः (for दिवि). Ñ B D6.7 बभूव हि तद(Ñ2 तदा; B3 मह)द्भुतं; V3 D10.11 बभूव न तदां(V3 तदनं)तरं; D12 बभूवाकुलितं नभः. —After 17, Ś Ñ V1.3 B D T3.4 ins.:

264* भग्नांस्तांस्तु समालक्ष्य यक्षेन्द्रान्सुमहाबलान् ।
धनाध्यक्षो महाबाहुः प्रेषयामास नायकान् ।

[(l. 1) V3 भिन्नांस्; T4 त्रस्तांस् (for भग्नांस्). Ñ B2 D6.7.10.11 तु तान् (by transp.) (for तांस्तु). D2 शक्र-(sic) (for यक्ष-). Ñ D6.7.10.11 तु; D1.4 T4 स (for सु-). V1 -महाबलः. —(l. 2) V3 D1.3–5 नायकं; B4 सैनिकान्; D6.7.10.11 यक्षकान् (for नायकान्).]

18 [a]) B2 तस्मिन्नेव (for एतस्मिन्). —[c]) M3.9 आगमत्. G1 स (for सु-). Ś Ñ1 V1.3 D8.9.12 प्रेक्षि(Ś1 V1.3 D8.9 °षि)तोभ्यागमद्; Ñ2 B1.2.4 D6.7.10.11 प्रेषि(D6 °क्षि)तो न्यपतद्; B3 प्रेषितव्यपतन् (sic); D1.3.4 आजगाम महा-; D2 प्रेषितोभ्यापतद्; D5 प्रेषितो ह्यगमद्; T3.4 प्रेषितोथागमद् (for अगमत्सुमहान्). D7 रक्षो; D12 तत्र (for यक्षो). —[d]) Ś Ñ V1.3 B1–3 D1.2.4.6–9.12 यो(V1 स)गंडभिंडि(Ś2.3 °भिंड; Ñ °भिंडु; B1.3 D1.4.6.7 °बिंदु; B2 °भिंदु; D2.9.12 °तिंड)कः; B4 यो गासुनंदकः; D3 यो बिंदु-तिंदुकः; D5 यो गजतुंदकः; T3.4 M8 संयुगकंटकः; G2 संकोचकंटकः; M2.4.7.9 संयोगकंट(M9 °कर्ण)कः; M6 योगांड-विद्युतः; G(ed.) यो गंडबिल्वकः.

G 7. 14. 22
B 7. 14. 22
L 7. 13. 21

तेन यक्षेण मारीचो विष्णुनेव समाहतः ।
पतितः पृथिवीं भेजे क्षीणपुण्य इवाम्बरात् ॥ १९

प्राप्तसंज्ञो मुहूर्तेन विश्रम्य च निशाचरः ।
तं यक्षं योधयामास स च भग्नः प्रदुद्रुवे ॥ २०

ततः काञ्चनचित्राङ्गं वैदूर्यरजतोक्षितम् ।
मर्यादां द्वारपालानां तोरणं तत्समाविशत् ॥ २१

ततो राम दशग्रीवं प्रविशन्तं निशाचरम् ।
सूर्यभानुरिति ख्यातो द्वारपालो न्यवारयत् ॥ २२
ततस्तोरणमुत्पाट्य तेन यक्षेण ताडितः ।
राक्षसो यक्षसृष्टेन तोरणेन समाहतः ।
न क्षतिं प्रययौ राम वरात्सलिलयोनिनः ॥ २३
स तु तेनैव तं यक्षं तोरणेन समाहनत् ।
नादृश्यत तदा यक्षो भस्म तेन कृतस्तु सः ॥ २४

19 [a]) M5 येन; Ck.t as in text (for तेन). Ś Ñ V1.3 B1-3 D2.5-12 T3 M4 Ct चक्रेण (for यक्षेण). —[b]) B3 [ए]व (for [इ]व). Ś Ñ V1.3 B D2.5-12 T3.4 रणे हतः (for समाहतः). D1.3.4 विन(D4 °कृ)ष्टोरसि ताडितः; M6 निपत्य समरे हतः. —[c]) Ñ B D7 पृथिवी-. Ś2.3 D12 पृथिवीं पतितः (by transp.); V3 पृथिव्यां पतितः; D6.9 M10 पातितः पृथिवीं (D6 °वी-); D10.11 Ct पतितो भूतले (for पतितः पृथिवीं). Ś V1.3 D1-4.8-12 T3 M6 शैलात्; Ñ B D6.7 पृष्ठे (for भेजे). —[d]) Ś Ñ V1.3 B D2.5-12 T3.4 ग्रहः (for [अ]म्बरात्).

20 [a]) Ś Ñ V1.3 B D2.5-12 T3.4 स (Ñ1 V1.3 वि)-संज्ञस्तु (Ś3 D2 °स्तं); D1.4 अथ संज्ञां; D3 M6 प्राप्य संज्ञां (for प्राप्तसंज्ञो). —V1 repeats 20[bc] consecutively. —[b]) Ś Ñ2 V1 (first time).3 D2.8.9 विश्रा (Ś3 D8.9 °श्र) म्याथ; Ñ1 B1.3 D5-7.10.11 स विश्र (D5 °श्रा) म्य; B4 स विश्रम्य; D1.3.4 G3 M6.10 विश्राम्य च; D12 विश्रम्याथ; T4 M9 विश्रम्य सः; G1 विश्रांतश्च; G2 M4.5.7 विमृश्य च (for विश्रम्य च). D3 महासुरः (for निशाचरः). —[c]) V3 यक्षेंद्रं (for तं यक्षं). —[d]) Ś Ñ1 V1.3 D2.8.9.12 तु (for च). B4 भग्नः; T4 M2.8.9 यक्षः (for भग्नः). D1.3.4 स (D3 तु) विद्रुतः (for प्रदुद्रुवे).

21 [a]) Ś D2.8 ताल-; D9 नील-; D12 तप्त- (for ततः). Ś V1 D2.8.9-12 -चित्रांगो. —[b]) Ś1.2 V1.3 D2.5.8.9.12 T3.4 -मणिभूषितः (V3 D5 T3.4 °तं); Ś3 -रजतोक्षितः; D1.3.4 कृतभूषणः; K (ed.) -रजसोक्षितं (for -रजतोक्षितम्). M6 वज्रवैडूर्यभूषितं. —[c]) D3.5.6.9 M2 मर्यादा-. Ś Ñ V1.3 B D T3 M6 प्रतिहाराणां (for द्वारपालानां). —[d]) Ñ सममाविशत्; B D6.7 M6 स (D6.7 च) समाविशत्; D1.3.4 M2 समुपाविशत्. Ś V1.3 D2.5.8-12 T3.4 M10 तोरणांतरमाविशत्. ❀ Ct: मर्यादां जनप्रवेशावधिं प्रतीहाराणां तोरणान्तरं द्वारमध्यमितिं तीर्थः। आविशत् रावण इति शेषः. ❀

22 [a]) Ś V1.3 D2.7-12 T3.4 तं तु; D5 तत्र (for ततो). Ś Ñ V1.3 B D2.5-12 राजन् (for राम). —[b]) M2 प्राविशंतं. M3 दशाननं (for निशाचरम्). —M2 repeats 22[cd] consecutively. —[c]) M9 -पाल (for -भानुर्). D9 स्वर्भानुरिति विख्यातो. —[d]) B4 लोकपालो. D1 निवारयत्; T1.2 G3 M2 (second time).3.8.9 न्यरोधयत् (for न्यवारयत्). —After 22, Ś Ñ V1.3 B D2.5-12 T3.4 ins.:

265* स वार्यमाणो यक्षेण प्रविवेशैव रावणः।

[T3 वारितोपि (for वार्यमाणो). Ñ V1 B D6.7.10.11 निशाचरः; V3 च राक्षसः; D5 स रावणः (for [ए]व रावणः).]

—Thereafter Ñ B D6.7.10.11 cont.; D1.3.4 T1.2 G M ins. after 22; while T4 ins. after 23[ab]:

266* स तेन वारितो राजन्न व्यतिष्ठत्स राक्षसः।

[G2 om. न वारितो. Ñ B D6.7.10.11 यदा तु; D1.3.4 M6 तदा (M6 °तो) नि- (for स तेन). T4 ताडितो. Ñ B D6.7.10.11 G3 M5 राम; T4 G2 M10 राजा (for राजन्). B1.4 न व्यतिष्ठत; D1.3.4 G1 M2.5.6.8 नाभ्य (M6 न ह्य)तिष्ठत्स; T1.2 G3 न ह्यतिष्ठच्च; M3 सह तिष्ठच्च; M4.7 न ह्यतिष्ठत (for न व्यतिष्ठत्स). T4 G2 M10 द्वारि तिष्ठन्निशाचरः (for the post. half).]

23 [a]) B3 तोमरम् (for तोरणम्). —[b]) V1 तं यक्षं समताडयत्. —After 23[ab], Ñ1 (marg.).2 B D6.7.10.11 ins.; D1.3.4 M6.7 ins. after 23[cd] (first time):

267* रुधिरं प्रस्रवन्भाति शैलो धातुस्रवैरिव।

[B1 संस्रवन्; M7 प्रस्रवैर्; G (ed.) स स्रवन्; D1.3.4 M6 रुधिरप्रस्रवैर्.]

—After 23[ab], T4 ins. 266*. —V1 om. 23[c]–24[b]. D1.3.4 M6.7 repeat 23[cd] after 267*. —[c]) M3 यक्षवर्येण. Ś Ñ V3 B D T3.4 M6.7 (D1.3.4 M6.7 second time) स शैलशिखराभेण (B3 °त्तेन); D1.3.4 (all first time) तद्रक्षस्तेन यक्षेण. —[d]) B3 तोमरेण. D1.4 (both first time) समाहतः; D3 समाहितः (for समाहतः). —[e]) D1.3.4 G3 M4.7.8 क्षितिं; M1-3.9 मृतिं (for क्षतिं). Ś V3 D2.5.8.9.12 T3.4 अगच्छन्न क्षि (D5 T3.4 क्ष)तिं रक्षोः; Ñ B D6 7.10.11 M6 जगाम न (M6 तज्जगाम) क्षितिं (B4 D10 क्षतिं; D6 क्षतीर्) वीरो (B3 भूयो; M6 रक्षो). —[f]) G2 M10 कमल-; M1 जलज- (for सलिल-). D1.3.4 M4.6.7 -योनितः. Ś Ñ V3 B D2.5-12 T3.4 M3.5 वरदा (M6 चिरादा)नात्स्वयंभुवः.

24 V1 om. 24[ab] (cf. v.l. 23). —[a]) T4 M10 रक्षस् (for यक्षं). —[b]) D1.3.4 समाहतं (sic). —For 24[ab], Ś Ñ V3 B D2.5-12 T3 subst.:

ततः प्रदुद्रुवुः सर्वे यक्षा दृष्ट्वा पराक्रमम् ।
ततो नदीर्गुहाश्चैव विविशुर्भयपीडिताः ॥ २५

G. 7. 14. 30
B. 7. 14. 30
L. 7. 13. 28

इति श्रीरामायणे उत्तरकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

Arya Research Team

268* तेनैव तोरणेनाथ रक्षसा सोऽपि ताडितः ।

[D9 reads from 268* up to 25 in marg. B3 समरे नाथ (for तोरणेनाथ). Ś1 D8 [s]भि- (for sपि). Ñ V3 B1.3.4 D6.7.10.11 यक्षस्तेनाभि-; B2 यक्ष एवाभि- (for रक्षसा सोऽपि). Ś2.3 B1.4 पीडितः (for ताडितः).]

—^{c}) V3 सोदृश्यत; G1 ताडितस्तु (for नादृश्यत). Ś V1.3 D2.8.9.12 ततो (for तदा). Ś V1.3 D2.5.8.9.12 राजन्; T3 राम (for यक्षो). —^{d}) T4 ततः कृतः; G3 कृतं महत्; M10 कृतस्ततः (for कृतस्तु सः). Ś V1.3 D2.5.8.9.12 T3 भस्मीकृत(D5 °भूतो)दृढच्छविः; Ñ B D6.7.10.11 भस्मीकृ(Ñ2 B2–4 D7 °भू)तत(Ñ2 °स्त)नुस्तदा(B4 °था). ❀ Cg: भस्मीकृततनुरिति । रावणकृततोरणदण्डसमाहननेन चूर्णित इत्यर्थः ।; so also Ck.t. ❀

25 D9 reads 25 in marg. (cf. v.l. 268*). B1 om. from 25 up to 7.15. V3 illeg. for 25^{ab}. —^{a}) D1.3.4 विदुद्रुवुः. M6 तस्य (for सर्वे). —^{b}) Ñ1 दृष्ट्वा यक्ष-; Ñ2 D6.7.10.11 दृष्ट्वा रक्षः-; V1 B2–4 दृष्ट्वा यक्षाः(by transp.) (for यक्षा दृष्ट्वा). M8 यक्षा दृष्टपराक्रमाः. —^{c}) Ñ1 B2–4 D1.3.4.9 T4 नभोः; D8 तमो (for ततो). B2–4 D2.3.6.7.9 G2 M6 नदी-. Ś2.3 D12 तमोरु(D12 °न)द्धा; M10 ततो गिरिर् (for ततो नदीर्). D5 नगाश् (for गुहाश्). D1.4 -शैलान् (for चैव). —^{d}) D2 दृदशुर्. V1 D1.4 -विह्वलाः (for -पीडिताः). —After 25, Ñ V1.3 B3 D5–7.9–11 T3.4 ins.; D8 ins. before 7.15.1 :

269* त्यक्तप्रहरणाः श्रान्ता विवर्णवदनास्तदा ।

[V3 यक्ष-; D6 त्यक्त्वा (sic) (for त्यक्त-). D3.5 शांता; D9 सर्वे (for श्रान्ता). T3.4 -प्रहरणांश्चार्तान्. T3.4 -वदनांस्. Ñ1 V3 B3 D9 T3 तथा (for तदा).]

Colophon: V1 T3.4 om. —*Sarga name*: Ś Ñ2 B2 D1–5.8.9.12 कैलासयुद्धं; Ñ1 रावणदिग्विजये कैलासयुद्धं; V3 B4 यक्षयुद्धं; B3 कैलासे यक्षयुद्धं. —*Sarga no.* (figures, words or both): Ś Ñ1 V3 D2.12 om.; B4 15; D8.9 13. —After colophon, G M1.5.8 conclude with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

१५

G. 7. 15. 1
B. 7. 15. 1
L. 7. 14. 1

ततस्तान्विद्रुतान्दृष्ट्वा यक्षाञ्शतसहस्रशः ।
स्वयमेव धनाध्यक्षो निर्जगाम रणं प्रति ॥ १
तत्र माणिचरो नाम यक्षः परमदुर्जयः ।
वृतो यक्षसहस्रैः स चतुर्भिः समयोधयत् ॥ २
ते गदामुसलप्रासशक्तितोमरमुद्गरैः ।
अभिघ्नन्तो रणे यक्षा राक्षसानभिदुद्रुवुः ॥ ३
ततः प्रहस्तेन तदा सहस्रं निहतं रणे ।
महोदरेण गदया सहस्रमपरं हतम् ॥ ४
क्रुद्धेन च तदा राम मारीचेन दुरात्मना ।
निमेषान्तरमात्रेण द्वे सहस्रे निपातिते ॥ ५

15

☞ V2 missing for Sarga 15 (cf. v.l. 7.12.2). B1 om. Sarga 15 (cf. v.l. 7.14.25). V1 T3.4 continue the previous Sarga. Before 1, D3 ins. 269*.

1 ^{a}) M10 तु (for तान्). D10.11 Ct लक्ष्य विद्रस्तान् (for विद्रुतान्दृष्ट्वा). Ś Ñ V1.3 B2.4 D2.5–9.12 T3.4 तान्समालक्ष्य (V3 D9 °मालोक्य; D8 °मभ्यर्च्य) वित्र(D2.5 °ध्व)स्तान्; B3 विद्रुतांस्तान्समालक्ष्य. —^{b}) Ś D2.8.9.12 गच्छन् (for शत-). Ñ2 D6.7 10.11 यक्षेंद्रांश्च; B2 शतसंख्य- (for यक्षाञ्शत-). Ñ1 B3 यक्षेंद्राञ्शतसंघशः. —^{c}) D1.4 महायक्षो (for धनाध्यक्षो). —For 1^{cd}, Ś Ñ V1.3 B2–4 D2.5–12 T4 subst.; while D1.4 ins. after 1^{ab}; D3 T3 ins. after 1:

270* धनाध्यक्षो महायक्षं माणिभद्रमथाब्रवीत् ।

[Ś2.3 D12 -[अ]ध्यक्षं; V3 -यक्षो (for -यक्षं). V1 महायक्षं धनाध्यक्षो (for the prior half). Ś V1 D1–3.5.8.12 मणिभद्रम्; D10.11 माणिचारम्. ❀ Cg.t: माणिचारो माणिभद्रः. ❀]
—Then all the above MSS. cont.:

271* रावणं जहि यक्षेन्द्र दुर्वृत्तं पापचेतसम् ।
शरणं भव वीराणां यक्षाणां युद्धशालिनाम् ।

[(l. 1) V3 यक्ष त्वं (for यक्षेन्द्र). D3 दुर्मतिं (for दुर्वृत्तं). B3.4 पापचेष्टितं. —(l. 2) D1.4 भीरूणां; T3 भीतानां (for वीराणां). D1 त्वं धुरंधर; D3.5 बाहुशालिनां (for युद्धशालिनाम्).]
—D1.3.4 further cont. 272*.

2 ^{a}) D1.3.4 योसौ (for तत्र). D3.4 मणिचरो; M1.6.7 माणिवरो; M3 माणीचरो. —^{b}) G2 M10 यक्षः परपुरंजयः. —For 2^{ab}, Ś Ñ V1.3 B2–4 D2.5–12 T3.4 subst.; whereas D1.3.4 cont. after 271*:

272* एवमुक्तो महाबाहुर्माणिभद्रः सुदुर्जयः ।

[Ś2.3 D3.5.8.9.12 मणिभ(D12 °भं [sic])द्रः. Ñ1 स (for सु-). B3.4 प्रतापवान् (for सुदुर्जयः). D1.4 यक्षाणां मानकांक्षिणां (for the post. half).]
—^{c}) M1.4 ततो (for वृतो). T4 बल- (for यक्ष-). Ś1 Ñ2 V3 D1.3–7.10.11 T3 G1.2 M4–7.10 तु; Ś2.3 D12 M1 च; D8 यश् (for स). D2.9 -सदृक्षौवैश्. —^{d}) Ñ1 D2 M4 समयोजयत् (Ñ1 °धयेत्).

3 ^{ab}) B3 om. (subm.); D4 तैर् (for ते). D5 तदा (for गदा-). D1.3.4.11 -मुसलैः. Ñ2 V1.3 B3 D1.4.6.7.10.11 G2 M4.7.10 -प्रासैः; D3 पाशैः (for -प्रास-). M6 ततो गदाभिर्मुसलैरसिभिः शक्तितोमरैः. —^{c}) Ś2.3 D8.12 अभिघ्नंतं (sic); B2 क्रोधाविष्टास्; D3 अभिघ्नंति. Ś Ñ V1.3 B2 D T3.4 तदा; B4 तथा (for रणे). D1.3.4 योधा (for यक्षा). B3 मुदा युक्ता (for रणे यक्षा). —^{d}) Ñ1 V3 T3.4 समभिद्रवन्; Ñ2 B2–4 D5–7.10.11 समुपाद्रवन्; V1 समभिद्रुतान्; T1.2 G3 M1.3 च सहस्रशः (for अभिदुद्रुवुः). —After 3, Ś Ñ V1.3 B2–4 D2.5–12 T3.4 ins.:

273* कुर्वन्तस्तुमुलं युद्धं चरन्तः श्येनवल्लघु ।

[D9 खलु (for लघु). D5 स्वनवन्नतु (for श्येनवल्लघु).]
—Thereafter Ñ V3 B2–4 D6.7.10.11 cont.:

274* बाढं प्रयच्छ नेच्छामि दीयतामिति भाषिणः ।
ततो देवाः सगन्धर्वा ऋषयो ब्रह्मवादिनः ।
दृष्ट्वा तत्तुमुलं युद्धं परं विस्मयमागमन् ।

[(l. 1) D6 बाहुं (for बाढं). B4 [इ]च्छामो (for [इ]च्छामि) and युद्धमुत्तमं (for इति भाषिणः). —After l. 1, B4 ins.:

274(A)* वृताखैर्बहुभिर्यक्षैः सहतामिति भाषिणः ।

—(l. 3) Ñ1 D7(after corr.).11 आगतं; V3 आत्मनः; B4 आगताः (for आगमन्).]

4 ^{a}) Ś D2.8.12 तदा (for ततः). Ś D12 सदा; D8 मुदा (for तदा). Ñ V3 B2–4 D6.7.10.11 यक्षाणां तु(B2 च) प्रहस्तेन(D6 सहस्रेण); M8 प्रहस्तेन तदा तूर्णं. —^{b}) B3 विहतं (for निहतं). Ś V1 D2.8.9.12 T3.4 विनिपातितं. —^{c}) Ñ2 D10.11 चानिंद्यं; D1.3.4 M6 चासाद्य; T1 महता (for गदया). —^{d}) M8 परमं (for अपरं). D2 महत् (for हतम्). G1 परमाहतं (for अपरं हतम्). —After 4, G(ed.) ins. 275*.

5 V1 om. 5^{ab}. —^{a}) Ñ1 B3.4 तु; D5 हि (for च). Ñ V3 B2.3 D6.7.10.11 तदा राजन्; B4 महाराज (for तदा राम). —^{b}) Ś Ñ V3 B3.4 D3.5–8.10–12 M6 युयुत्सुना; B2 D1.2.4.9 युयुत्सता(D9 °या); T1 G1 महात्मना. —For 5^{ab}, T3.4 subst.; while Ñ1 ins. after the first occurrence of 5^{cd}; G(ed.) ins. after 4:

Anya Research Team

धूम्राक्षेण समागम्य माणिभद्रो महारणे ।
मुसलेनोरसि क्रोधात्ताडितो न च कम्पितः ॥ ६
ततो गदां समाविध्य माणिभद्रेण राक्षसः ।
धूम्राक्षस्ताडितो मूर्ध्नि विह्वलो निपपात ह ॥ ७
धूम्राक्षं ताडितं दृष्ट्वा पतितं शोणितोक्षितम् ।
अभ्यधावत्सुसंक्रुद्धो माणिभद्रं दशाननः ॥ ८

तं क्रुद्धमभिधावन्तं युगान्ताग्निमिवोत्थितम् ।
शक्तिभिस्ताडयामास तिसृभिर्यक्षपुंगवः ॥ ९
ततो राक्षसराजेन ताडितो गदया रणे ।
तस्य तेन प्रहारेण मुकुटः पार्श्वमागतः ।
तदा प्रभृति यक्षोऽसौ पार्श्वमौलिरिति स्मृतः ॥ १०

G. 7. 15. 15
B. 7. 15. 15
L. 7. 14. 11

275* धूम्राक्षेण तु क्रुद्धेन यक्षाणां समरे पुनः ।

[G (ed.) च (for तु) and युधि (for पुनः).]

—Ñ1 reads 5cd twice (var.). —c) D1.3-5.12 निमिष- (for निमेष-). —d) D8 M8 द्वि- (for द्वे). B4 D12 सहस्रे वि-; T3 G2 M4.5.7.10 सहस्रे द्वे (by transp.) (for द्वे सहस्रे). Ñ1 (second time).2 V1.3 D5 निसू(D5 °धू)दिते. —After 5, Ñ2 V1.3 B2-4 D2.5-7.10.11 T3.4 G (ed.) ins., while Ñ1 ins. after the second occurrence of 5cd:

276* क्व च यक्षार्जवं युद्धं क्व च मायाबलाश्रयम् ।
रक्षसां पुरुषव्याघ्र तेन तेऽभ्यधिका युधि ।

[(l. 1) T4 यक्षाश्रयं; G (ed.) [आ]र्जवं यक्ष- (for यक्षार्जवं). V1 B2 D3.5 T4 -बलाश्रया:; V3 -बलं श्रियः. —(l. 2) Ñ1 V1 B2 D2.5 T3.4 राक्षसाः (for रक्षसां). Ñ1 -व्याघ्राः. Ñ1 न ते; D3 येन (for तेन). T3 तेभ्योधिका. V3 भुवि; D3 पुनः (for युधि).]

6 a) Ś V1.3 D1-5.8.9.12 T3.4 M6 च (D9 [अ]व; T4 तु)संगम्य; M7 समाहत्य. —b) Ś2.3 Ñ1 D2.3.8.9.12 मणिभद्रो. V3 महारथः (for °रणे). —After 6ab, B3 ins. (erroneously):

277* तमभिप्रेक्ष्य धावन्तं माणिभद्रं दशाननः ।

—G2 repeats 6cd after 7ab. —c) Ñ1 T3.4 M6 क्रुद्धस् (for क्रोधात्). —d) Ś V1 D2.5.8.9.12 T3.4 [ऽ]पि न कंपितः; D1.3.4 रणमूर्धनि (D1 om. [hapl.] from मू up to तो in 7c); G (ed.) न चकंप ह.

7 D1 om. up to तो in 7c (cf. v.l. 6). —a) D5 समादाय; T4 समाक्षिप्य; G1 समाहत्य; G2 समाविश्य. —b) Ś Ñ V1.3 B3 D2.5.8.8.9.12 G2 मणिभद्रेण. —After 7ab, G2 repeats 6cd. —d) D2.6 विह्वलं. Ñ2 B2 D6.7.10.11 स (for नि-). Ś Ñ1 V1.3 B3.4 D2.5.8.9.12 T3.4 पतितो भुवि (for निपपात ह).

8 ab) Ś D2.8.12 T4 प(Ś1 D2.8 पा)तितं; M6 निहतं (for ताडितं). Ś1 D2.8 ताडितं; Ñ1 पातितः(sic); B3 D12 G1 पातितं (for पतितं). V1.3 D1.3.4 transp. ताडितं and पतितं. B3 T4 शोणितं(T4 °*) क्षितं; D5.9 शोणितोक्षिणं(D9 °तः). —c) Ś1.2 Ñ1 V1 D1.2.4 स (for सु-). Ñ2 V3 B2-4 D6.7.10.11 T1.2 G3 M1.2.8.9 अ (B3 सम [hypm.])-भ्यधावत सं(M8 तं)क्रुद्धो (Ñ2 B2-4 D6.7.10.11 संग्रामे). —d) Ś V1.3 D8.9 G2 मणिभद्रं.

9 a) Ñ1 D10.11 सं- (for तं). D4 इव (for अभि-). —b) V1 -[अ]ग्निर्. V1 T1.2 इवोद्भतं(V1 °स्थितः); D9 इमं तदा (for इवोत्थितम्). Ñ2 B2-4 D6.7.10.11 माणिभद्रो दशाननं. —cd) Ñ1 B4 T3.4 रघुनंदनः; D5 लघुविक्रमः; G2 यक्षपुंगवैः (for यक्षपुंगवः). B2 राक्षसेंद्रं महाबलं (for d). D1.3.4 शक्तिं ततः प्रचिक्षेप रावणाय रणाजिरे. —After 9, D1 ins. 278* (owing to om.)

10 D1 om. 10abcd. —ab) Ñ V3 B2-4 D6.7 सोपि (for ततो). G1.2 M1.2.4.5.8-10 -राजेन्द्रस् (for -राजेन). T1.3 G3 M3 ततो वै राक्षसेंद्रस्तु (for a). Ś2.3 V3 D3.4 transp. ताडितो and गदया. Ñ1 तया; D3.4 T1.2 G2.3 M तदा; G1 तथा (for रणे). D10.11 ताडितो माणिभद्रस्य मुकुटे प्राहरद्रणे. —c) Ś V1 D2.5.8.9.12 T3.4 मुकुटेन नि(T4 वि)वृत्तस्य(D5 °त्तिश्च; T3.4 °स्तश्च); D3 मुकुटे तं निवृत्तं च; D4 मुकुटे च निवृत्तस्तु; T1.2 G M मकुटे चा(G3 M3.5 °टेना)हनत्क्रुद्धः. —d) V1 D6.10.11 T3 G2 M2.4.7.10 मु(G2 M7 म)कुटं; T1 G1.3 M1.2.5 8.9 प्रहाराद्; T2 प्रहरन्; M6 मकुटः (for मुकुटः). B4 आपतद्; D5 M8 आगमद्; D6.10.11 T1.2 G1.2 M1.2.5.7.8.10 आगतं (for आगतः). Ś V1.3 D2-4.8.9 12 T3.4 पार्श्वतोगमद्(D3.4 °तो गतः). —After 10cd, D3.4 T1.2 G M ins.; while D1 ins. after 9 (owing to om.):

278* ततः संयुध्यमानेन विष्टब्धो नाप्यकम्पत ।

[G1.2 M2-4.9 स; M8 सु- (for सं-). G1 बहुमानेन (for -युध्यमानेन). M6 स समाविध्यमानस्तु (for the prior half). M2 विष्टभ्यो. M3.6 व्यकंपत; M5 [अ]भ्य°; M10 ह्यकं° (for [अ]प्यकम्पत). D1.3.4 विष्टंभो (D1 °ष्कंपे)नास्य कंपितः (for the post. half).]

—e) Ś Ñ V1.3 B2-4 D T3.4 ततः (for तदा). —f) Ś D2.8.12 पार्श्वे(D2 °र्श्वं)शूलिर्; D3.4 पार्श्वमौली. Ś V1.3 D2.5.12 अ(V1 D5 त)थाभवत्; Ñ B2-4 D6.7.9-11 अभूत्किल; D1.3.4 M6 नराधिपः; D8 अथाब्रवीत्; T3 अतोभवत्; T4 तथा किल; M7 इति श्रुतः (for इति स्मृतः).

Ajay Research Team

G. 7. 15. 16
B. 7. 15. 15
L. 7. 14. 12

तस्मिंस्तु विमुखे यक्षे माणिभद्रे महात्मनि ।
संनादः सुमहान्राम तस्मिञ्शैले व्यवर्धत ॥ ११
ततो दूरात्प्रददृशे धनाध्यक्षो गदाधरः ।
शुक्रप्रोष्ठपदाभ्यां च शङ्खपद्मसमावृतः ॥ १२
स दृष्ट्वा भ्रातरं संख्ये शापाद्विभ्रष्टगौरवम् ।
उवाच वचनं धीमान्युक्तं पैतामहे कुले ॥ १३
मया त्वं वार्यमाणोऽपि नावगच्छसि दुर्मते ।
पश्चादस्य फलं प्राप्य ज्ञास्यसे निरयं गतः ॥ १४
यो हि मोहाद्विषं पीत्वा नावगच्छति मानवः ।
परिणामे स वै मूढो जानीते कर्मणः फलम् ॥ १५
दैवतानि हि नन्दन्ति धर्मयुक्तेन केनचित् ।
येन त्वमीदृशं भावं नीतस्तच्च न बुध्यसे ॥ १६
यो हि मातृः पितॄन्भ्रातॄनाचार्यांश्चावमन्यते ।
स पश्यति फलं तस्य प्रेतराजवशं गतः ॥ १७

---

11 [a]) D1 सु- (for तु). G1 सुमुखे. Ś2.3 B2 D8 भूते; D1.3.4 M6 राजन् (for यक्षे). Ś1 Ñ V1.3 B3.4 D2.5–7.9–12 T3.4 विमुखीभूते. —[b]) Ś D2.8.9.12 मणिभद्रे. —[c]) D8 संसादः. T3 तु; G3 स (for सु-). Ś Ñ V1.3 B3.3 D2.5–8.10–12 T3.4 राजंस्; B4 नादं (sic); D9 om. (for राम). —[d]) Ś1 D8 तत्र. B2–4 सैन्ये (for शैले). B4 व्यजायत; D1.3.4 विवर्धते (D1.3 °त); K (ed.) [ऽ]भ्यवर्तत.

12 [a]) Ñ2 B2–4 D1.6.7 G2 M1.5.10 स (for प्र-). —[b]) Ś V1.3 D2.5.8.9.12 T3.4 महाबलः; M5 महारथः (for गदाधरः). —[c]) B2 D1.4 शक्र-; D5.11 T3.4 शुक्र- (for शुक्र-). Ś1.3 Ñ V1.3 B2–4 D1.4.9–12 M4 Ct -प्रौष्ठपदाभ्यां (Ñ1 °नां [sic]); Cv.g.k as in text (for -प्रोष्ठपदाभ्यां). Ś D2.8.12 वा (for च). ❀ Cg: शुक्रप्रोष्ठपदौ मन्त्रिणौ. ❀ —[d]) Ñ2 V1.3 B2.3 D5–7.10.11 T3.4 Ct पद्मशंख- (by transp.); B4 पद्मशंखैः; Cv.g.k as in text (for शङ्खपद्म-). B2 -गदावृतः (for -समावृतः). D1.3.4 शंखपद्मैश्च संयुतः (D1 °तैः); M8 पद्मशंखैश्च संवृतः. ❀ Cv: शङ्खपद्मसमावृत इत्यत्र अन्योऽर्थो वेदितव्यः। द्वाभ्यां समावृतत्वासंभवात्, परत्र च शङ्खपद्मादीनां निधीनामुपादानाच्च।; Cg.k: शङ्खपद्मसमावृतः शङ्खपद्मनिध्यभिमानिदेवैः संवृतः।; so also Ct. ❀

13 [a]) D4 संदृश्य. G2 M9 संघे (for संख्ये). —[b]) B3 पापाद्; D5 शाप-; D6 तथा; T4 कालाद्; G1 पाशाद् (meta.); Cg.k.t as in text (for शापाद्). V3 विगत-; M3 विभ्रवच- (sic) (for विभ्रष्ट-). —[c]) Ñ1 कोपाद्; B2 धीरो (for धीमान्).

14 [a]) Ñ B2–4 D6.7.10.11 यन्मया; G3 मयार्यं (for मया त्वं). Ñ B2.3 D6.7.10.11 त्वं; B4 तु; D1.3.4 वै; T3 हि (for sपि). —[b]) G3 नार्य गच्छसि; M1 नावगच्छत्सु (sic); Ct as in text (for नावगच्छसि). —[c]) B4 पश्चादेतत्-; T3 पश्य तस्य. —[d]) Ś V1.3 D2.8.12 बाध्यसे; Ñ1 B2 दह्यसे; B4 D1.4.5.9 T4 भोक्ष्यसे. G1 नरकं; M6 नियतं; Ck.t निरयं (as in text).

15 [a]) M4 लोभ- (for यो हि). Ś D2.8.12 महाविषं. V1 T3.4 transp. मोहाद् and पीत्वा. —[b]) Ś Ñ V1.3 B2–4 D2.5–12 T3.4 दुर्मतिः; D1.4 मानद (D4 °दः) (for मानवः). —[c]) G1 मूढ (for मूढो). Ś Ñ V1.3 B2–4 D2.5–12 T3.4 स तस्य परिणामांते; D1.3.4 परिणामसुखे (D3 °मे सुखे) मूढो. —[d]) D1.3.4 M6 तस्य तत्; T2 G3 M5 कर्मणां (for कर्मणः).

16 [a]) Ś Ñ V1.3 B2–4 D1–4.6–12 T3 न; D5 T4 च; M7.10 [इ]ह (for हि). Ś Ñ1 V1.3 B2.3 D1.4 T2.4 M1.3.9 निं(Ś2*)दंति (for नन्दन्ति). M5 Cg.k.t देवता नाभिनंदंति. —[b]) Ś V1.3 D2.9.12 T3.4 तपो-; D5 तथा- (for धर्म-). D1 -युक्तं न (for -युक्तेन). B2 धर्मोक्तेन च केन च. —[c]) M6 पापं; Cg.k.t भावं (as in text). —[d]) M4.6 नीचः; Cg.k.t as in text (for नीतस्). Ś1 D8 सर्वं न; Ś2.3 V1.3 D1–4.9.12 T3 स च न; B2 D5 T1.2 G1.3 M3–6 Cg.k.t स (B2 त)च्चाव-; Cv as in text (for तच्च न). D1.3 T3 G2 बुध्यते; Cg.k.t as in text (for बुध्यसे). M1 प्रापितो नावबुध्यसे. ❀ Cv: दैवतानि हीत्यादि। धर्मयुक्तेन केनचित्कर्मणा दैवतानि नन्दन्ति। येन त्वमीदृशं भावमतिमूर्खस्य भावं नीतः तेन तच्च दैवतं नन्दनं च न बुध्यसे। अभिवादनादि गुरुगौरवकर्मणा दैवतानि नन्दन्तीत्येतदतिमूर्खप्रकृतितया न जानीष इत्यर्थः।; Cg: देवता इति। धर्मयुक्तेन तव केनचिद्व्यापारेण त्वामिदानीं नाभिनन्दन्ति, धर्माभावात्त्वयि विमुखा भवन्तीत्यर्थः। येन देवतावैमुख्येन। त्वमीदृशं क्रूरं भावं नीतः सन्नावबुध्यसे।; Ck: देवता ब्रह्मरुद्रादयः। धर्मयुक्तेन केनचिद्व्यापारेण त्वामिदानीं नाभिनन्दन्ति। त्वयि विमुखा भवन्ति। धर्माभिभावाद्येन वैमुख्येन त्वमीदृशं क्रूरं भावं नीतः सन्नावबुध्यसे।; Ct: दैवतानि ब्रह्मरुद्रादयः। धर्मयुक्तेन केनचित्प्राकृतेन व्यापारेण त्वामिदानीं नाभिनन्दन्ति त्वयि विमुखा भवन्ति। संप्रति त्वयि धर्माभावाद्येन देवतानभिनन्दनेन त्वमीदृशं क्रूरं नीतः प्रापितः सन्नावबुध्यसे. ❀

17 [a]) D1 G1.3 M1.2.4 मातृ-; T4 मर्त्यः (for मातृः). G1 M4 पितृ- (for पितॄन्). Ś Ñ V1.3 B2–4 D2.5–12 T3 मातरं पितरं विप्रान् (Ñ V3 B2–4 D6.7.10.11 °प्रम्). —[b]) Ñ B2–4 D6.7.10.11 G2 आचार्यं. Ñ2 V1 D6.10.11 चावमन्य वै; V3 B2.3 T3 अ(T3 त्व)वमन्य वै(B3 च); B4 G2.3 M4.5.10 अव(G2 न च; M4 वाव-)मन्यते; D5 M7 वा(D5 यो)व° (for चावमन्यते). G1 आर्यश्चाप्यवमन्यते. —[c]) B2 M9 न; M6 यत् (for स). D1.3.4 पश्येत्तत् (for पश्यति). T3 तत्र (for तस्य). —[d]) M10 प्रेतराज्य-. D1.3.4 M6 -पुरं (for -वशं).

अध्रुवे हि शरीरे यो न करोति तपोर्जनम् ।
स पश्चात्तप्यते मूढो मृतो दृष्ट्वात्मनो गतिम् ॥ १८
कस्यचिन्न हि दुर्बुद्धेश्छन्दतो जायते मतिः ।
यादृशं कुरुते कर्म तादृशं फलमश्नुते ॥ १९
बुद्धिं रूपं बलं वित्तं पुत्रान्माहात्म्यमेव च ।
प्राप्नुवन्ति नराः सर्वं स्वकृतैः पूर्वकर्मभिः ॥ २०
एवं निरयगामी त्वं यस्य ते मतिरीदृशी ।
न त्वां समभिभाषिष्ये दुर्वृत्तस्यैष निर्णयः ॥ २१
एवमुक्त्वा ततस्तेन तस्यामात्याः समाहताः ।
मारीचप्रमुखाः सर्वे विमुखा विप्रदुद्रुवुः ॥ २२

G. 7. 15. 27
B. 7. 15. 26
L. 7. 14. 23

18 [a]) B4 अध्रुवो. M1 [s]स्मिन् (for हि). Ś V1.3 D1–5.8.9.12 T3.4 यो(D9 अ)ध्रुवेण शरीरेण; Ñ1 अध्रुवं हि शरीरं यो. —[b]) D9 तपो ध्रुवं; T2 G M5 तपार्जनं. —[c]) B3 तत् (for स). —[d]) B2.4 G1 मृते. Ñ2 V3 D3.6.7.10.11 गत्वा (for दृष्ट्वा). G2 M10 जनो (for [आ]त्मनो). Ś V1 D2.5.8.9.12 T3.4 मृतो दुःखां (T3 दुःख)गतिं गतः. —After 18, D7 T3 M3 K (ed.) ins. ; while T4 ins. l. 1 after 18 and l. 2–4 after 19 :

279* धर्माद्राज्यं धनं सौख्यमधर्माद्दुःखमेव च ।
तस्माद्धर्मं सुखार्थाय कुर्यात्पापं विवर्जयेत् ।
पापस्य हि फलं दुःखं तद्वोक्तव्यमिहात्मना ।
तस्मादात्मोपघातार्थं मूढः पापं करिष्यति ।

[(l. 1) T3 धान्यम् (for सौख्यम्). —(l. 2) D7 उपादाय (for सुखार्थाय). D7 T4 विसर्जयेत् (for विवर्जयेत्). —(l. 3) T4 महात्मना (for इहा°). —(l. 4) D7 T3.4 तत्किल् (for तस्माद्). K (ed.) आत्माप- . D7 T3.4 मूढ पापं करिष्यसि (for the post. half).]

19 [a]) M6 च; Cg.k as in text (for हि). B3.4 D3.6.7.10.11 T3 M7 दुर्बुद्धे; Cg.k.t दुर्बुद्धेश् (as in text). —[b]) B3 दुर्गतौ. Ñ B2–4 D7 हीयते; M6 नियता; G (ed.) क्षीयते; Cv.g.k.t as in text (for जायते). M8 गतिः ; Cv as in text (for मतिः). —For 19[ab], Ś V1.3 D2.5. 8.9.12 T3 subst. :

280* न हि सर्वस्य दुर्बुद्धे दीप्यते छन्दतो गतिः ।

[Ś2.3 [अ]ति (for हि). V3 धर्मस्य (for सर्वस्य). Ś2 दुर्बुद्धेर्. T3 नियता (for दीप्यते).]

—Then V3 cont.; while Ñ2 B3.4 D6.7 ins. after 19[ab] :

281* दैवं चेष्टयते सर्वं हतो दैवेन हन्यते ।

[D6 ततो (for हतो). B3 दृश्यते (for हन्यते).]

—[c]) T3 क्रियते (for कुरुते). B3 राजंस् (for कर्म). — After 19, T4 ins. l. 2–4 of 279*.

20 [a]) Ñ V1.3 B2–4 D7.10.11 T4 M6 ऋद्धिं; D5 M9 बुद्धि- ; D6 T3 ऋद्धि- ; D9 बुद्धी (for बुद्धिं). Ñ1 रूप- ; M6 हर्ष- (for रूपं). Ś D2.8.9.12 कुलं; T3 फलं (for बलं). Ś Ñ V1.3 B2–4 D5–8.10–12 T3 पुत्रान् ; D2.9 पुत्राः ; T4 वीर्यं (for वित्तं). —[b]) Ś D3.12 K (ed.) शौर्यं (D12 °र्यं) गांभीर्यम्(K [ed.] धीरत्वम्) ; Ñ V1.3 B2.3 D6 शौर्य(B3 °र्यं) शौटी(B2 D6 शौडी)र्यम् ; B4 शौटीरं शौर्यम् ; D2.5.9 शौचं शौंडीर्यम् ; D7.10.11 वित्तं (D7 शौर्यं) शूरत्वम् ; T3 शौर्यं शौंडीरम् ; M9 पुत्रमाहात्म्यम् (for पुत्रान्माहात्म्यम्). M4 (also as in text) वा (for च). —For 20[ab], D1.2.4 subst. :

282* सुखं सिद्धिर्बलं शौर्यं चित्तं वित्तं तथैव च ।

[D3 रूपमृद्धिं (for सुखं सिद्धिर्) and विवृतिं (subm.) (for चित्तं वित्तं).]

—[c]) B4 आप्नुवंति. Ś Ñ V1.3 B2–4 D T3 लोके; T2 M10 सर्वे; M3 स्वर्गं (for सर्वं). —[d]) Ś Ñ B2 D2.6–12 M2 निर्जि (D8 °र्मि)तं; V1 प्रार्थितं; V3 B3 D3 T4 M6.7 सुकृतैः ; B4 (with hiatus) अर्जितं; D1.4 सुवृतैः ; D5 T3 स्वार्जितैः (for स्वकृतैः). Ñ2 D6.7.10–12 पुण्य- ; B2 यत्तु (for पूर्व-).

21 [a]) Ś3 B2 D1.4.6.8.12 M6 Cv -गामित्वं; Cg.k.t -गामी त्वं (as in text). —[b]) B4 यास्यसे (for यस्य ते). —[c]) T2 M5.6 त्वा; Cv.g.k.t as in text (for त्वां). Ñ1 सममिभाषंत (sic) ; D1.4 विनयो विशति; D12 समति°; G2 समव°; M6 [अ]हमभि°; Cv.g.k.t as in text (for समभिभाषिष्ये). —[d]) Ś Ñ V1.3 B2.3 D2.5.8.12 T1.2 G3 दुर्वृ(D5 °र्द)त्तो हि; D1.4 दुर्बलस्य; D6.9 °त्ते हि; D7 °त्तेषु; D10.11 Ck.t [s]सद्वृत्तेषु; Cv.g as in text (for दुर्वृत्तस्य). B2.3 [अ]सि; D1.10.11 M6 [ए]व; Cv.g.k.t as in text (for [ए]ष). Ñ B4 D6.7 निश्चयः ; B2.3 निश्चितं (for निर्णयः). —After 21, Ñ1 V3 ins. 283*.

22 Ñ1 om. 22[ab]. —[c]) Ś2.3 B2–4 D2.3.8.9.12 T3 M8.9 उक्त्वा ; Ñ2 V1.3 D7.10.11 T3 G2.3 M1.2.7.10 Cg.k.t उक्त्वा ; D4–6 T4 G1 M3–5 उक्ते (for उक्त्वा). Ś1 D1 T1 उक्तवतस्. —[d]) Ś Ñ2 V1 B2–4 D2.5.6 8.9.12 T3 समागताः ; T1.4 G M3–5.7–10 °हिताः ; Cg.k.t as in text (for समाहताः). —After 22[ab], Ñ2 B2–4 D6.7 ins. ; while Ñ1 V3 ins. after 21 :

283* दृष्ट्वाथ धनदं राम राक्षसाः सुमहाबलाः ।

[V3 B2 च; B4 तु (for [अ]थ).] ;

whereas T1.3.4 G M3.5.10 ins. :

284* संक्रुद्धान्राक्षसाञ्शूराञ्जिघ्रुः संयुगे तदा ।

[T1.3.4 M3.10 संक्रुद्धा. T3.4 राक्षसाः (for राक्षसान्). T1 M3 क्रूरान् ; T3 क्रुरा; M5 शूरा. T3.4 G3 निहन्युः (for निजघ्नुः). T3 तथा.]

Arya Research Team

G. 7. 15. 28
B. 7. 15. 27
L. 7. 14. 24

ततस्तेन दशग्रीवो यक्षेन्द्रेण महात्मना ।
गदयाभिहतो मूर्ध्नि न च स्थानाच्चकम्पत ॥ २३
ततस्तौ राम निघ्नन्तावन्योन्यं परमाहवे ।
न विह्वलौ न च श्रान्तौ बभूवतुरमर्षणौ ॥ २४

आग्नेयमस्त्रं स ततो मुमोच धनदो रणे ।
वारुणेन दशग्रीवस्तदस्त्रं प्रत्यवारयत् ॥ २५
ततो मायां प्रविष्टः स राक्षसीं राक्षसेश्वरः ।
जघान मूर्ध्नि धनदं व्याविध्य महतीं गदाम् ॥ २६

—[a]) ŚŚ2.3 V3 D2.9.12 संप्र-; D1.3.4 तेथ; D5 T3 ते प्र-; T4 तु प्र-; Ck.t as in text (for विप्र-).

23 [b]) D1.4 धनदेन (for यक्षेन्द्रेण). —[c]) Ñ1 B2 M6.8 निहतो; B4 D1.3.4 ताडितो (for [अ]भिहतो). T3 मूर्ध्न्यभिहतो (by transp.). Ś V1.3 D2.5.8.9.12 मूर्ध्न्याह(D2.9 °ह्नां ह; D5 °ह्नि ह)तः स(V1 °तस्तु) गदया. —[d]) D1.3–5.7.10.11 T3.4 G2 M5 8.10 प्रकंपितः; D6 T1.2 G1.3 M1.3.4.7 प्रकंपते (for व्यकम्पत). Ś1 V3 D2.8 नास्थातुं तस्य राक्षसः; Ś2.3 D12 न चकंपे च राक्षसः; Ñ B2.3 D9 नास्थाभू(Ñ1 °भूय[sic])च्चास्य(D9 °त्तस्य) रक्षसः; B4 त्रस्तोभूच्चास्य राक्षसः. —After 23, D11 ins. श्रीरामाय नमः.

24 [a]) T1.2 G1.3 M1–5.7–9 अभि-; G2 M10 अति- (for राम). —[b]) M4 परमाहवे (meta.). Ś Ñ V1.3 B2–4 D2.5–12 T3.4 तदा(Ś D2.5.12 तथा; D3 यथा)न्योन्यं महाहवे (Ñ B2.3 D6.7.10.11 °मृधे). —[c]) B3 निराकुलौ. Ś1 D8 T3 तौ नः; Ñ1 श्रम- (for न च). B2 अविश्रांतौ; D1.4 न च म्लानौ; M9 न विकांतौ (for न च श्रान्तौ). V1 D2 न वि(V1 व्य)ह्वलेतां न श्रांताव्; M6 विह्वलौ न च विश्रांतौ. —[d]) T4 G1 M5 अरिंदमौ; G2 M1.3.4.7.10 अमर्षिणौ (for अमर्षणौ). Ś Ñ V1.3 B2–4 D2.5–12 T3 तावुभौ(Ś V1 D2.5.8.9.12 T3 अभूतां) यक्षराक्षसौ.

25 [a]) Ś D2.8.9.12 तस्मै तु; Ñ V1.3 B2–4 D5–7.10.11 T3 G (ed.) तस्मै स(G [ed.] च); M6 स तदा; M8 च ततो (for स ततो). —[b]) Ś Ñ2 V1.3 B2–4 D2.5–12 तदा; Ñ1 T3 तथा (for रणे). D1.3.4 T4 G2 M1.2.4.6–10 द्रविणेश्वरः. —[c]) D1.3.4 च रक्षेंद्रस् (for दशग्रीवस्). Ś Ñ V1.3 B2–4 D2.5–12 T3 G (ed.) राक्षसेंद्रो वारुणेन (G [ed.] रावणोसौ). —[d]) M1 ततस्तं (for तदस्त्रं). Ś Ñ1 V1.3 B2–4 D2.8.9.12 T3 G3 पर्यवारयत्. —After 25, D1.3.4 ins.:

285* एतस्मिन्नन्तरे राम रविसूनुर्महायशाः ।
धनेशं व्यथितं श्रुत्वा रावणेन दुरात्मना ।
आजगाम ततः श्रीमान्बलेन महता वृतः ।
साहाय्यमकरोत्तत्र सार्थवाहः प्रतापवान् ।
वृतो यक्षसहस्रैः सोऽश्वारूढस्तत्र सुव्रतः । [5]
परश्वधैर्भिण्डमालैर्गदामुसलपट्टसैः ।
योधयामास रक्षेन्द्र स ततः परवीरहा ।
तस्यानुगौ महावीर्यौ दण्डनायकपिङ्गलौ ।
युध्येतां परमोदग्रौ संग्रामेष्वनिवर्तिनौ ।
ततो रक्षोबलं ताभ्यां बभञ्ज पुरुषर्षभ । [10]
गोधनानीव कृषिपाः क्षेत्रमुन्मार्गगामिनः ।

[11. 2) D3 स्खलितं (for व्यथितं). —(l. 5) D3 तु (subm.) (for तत्र). —(l. 6) D3 भिंडिमालैर्. D3 -पट्टिसैः. —(l. 7) D3 रक्षेंद्रं रेवतः (sic) (for रक्षेन्द्रः स ततः).]

—D3 cont.:

286* तदासीत्तुमुलं युद्धं भ्रातृभ्यां च नराधिप ।
सप्तरात्रं महाबाहो न बभूव परिश्रमः ।

26 [ab]) Ñ V3 B2–4 D6.7.10.11 [स]सौ (for स). Ñ2 D6 राक्षसस्तदा; D1.3.4 °साधिपः (for राक्षसेश्वरः). Ñ1 B2–4 राक्षसो राक्षसीं तदा (for [b]). M6 ततो माया विसृष्टा सा राक्षसी राक्षसाधिपान्. —After 26[ab], Ś Ñ V1.3 B2–4 D T3.4 ins.; T1.2 G3 M1.3.6.7 cont. l. 2–3 only after 289*:

287* रूपाणां शतसाहस्रं विनाशाय चकार च ।
व्याघ्रो वराहो जीमूतः पर्वतः सागरो द्रुमः ।
यक्षो दैत्यस्वरूपी च सोऽदृश्यत दशाननः ।

[(l. 1) D8 -साहस्रे. V3 करोति च; T3.4 [अ]करोत्तदा (for चकार च). Ś V1 D2.5.8.9.12 विनाशं(V1 D5.9 °श्य; D2.12 °श्यं) प्रकरोति च(D5 सः); Ñ B3–4 D6.7 स चकार (Ñ2 D6.7 चकार च) ननाद च; D1.3.4 नश्यते च करोति च (for the post. half). —B4 om. l. 2. M1 transp. l. 2 and l. 3. —(l. 2) G3 damaged for ध्रो वराहो. D1.3.4 वाराहो (unmetric) (for वराहो). Ś Ñ1 V1 D1–5.8 T3 ह्रदः; D12 [ऽ]द्रुदः (for द्रुमः). B2 स तदा पर्वतद्रुमः; T1.2 G3 M1.3.6.7 सारंगः(G3 M6.7 °गरः) पर्वतो ह्रदः (for the post. half). —(l. 3) B2 यक्षैर् (for यक्षो). T1.2 G3 M1.6.7 -रूपं (for -रूपी). D1.3.4 देवस्वरूपश्; D5 दैत्यः स्वरूपैश्. B4 सोपश्यत दशाननं; D1.3–5 T1.2 G3 M1.6.7 दृश्यते न च दृश्यते (for the post. half). —For l. 3, Ś V1.3 D2.8.9.12 T3.4 subst.:

287(A)* रक्षोरूपश्च स तदा दृश्यते च नराधिप ।

[V1 राक्षसो दैत्यरूपश्च; V3 यक्षो दैत्यो भुजंगश्च; T3.4 यक्षो दैत्यस्वरूपश्च (for the prior half). Ś2.3 V1.3 D2.12 T3.4 स (for second च).];

whereas M3 subst. for l. 3:

287(B)* यक्षराट् तादृशं राम नालुलोके दशाननम् ।

—Then M3 cont.:

287(C)* एवं मायां प्रकुर्वाणो बहुमायः स रावणः ।]

—After 287*, V3 ins. one illeg. line; while D1.3.4.5 (l. 1 only) cont.:

एवं स तेनाभिहतो विह्वलः शोणितोक्षितः ।
कृत्तमूल इवाशोको निपपात धनाधिपः ॥ २७
ततः पद्मादिभिस्तत्र निधिभिः स धनाधिपः ।
नन्दनं वनमानीय धनदो श्वासितस्तदा ॥ २८

ततो निर्जित्य तं राम धनदं राक्षसाधिपः ।
पुष्पकं तस्य जग्राह विमानं जयलक्षणम् ॥ २९
काञ्चनस्तम्भसंवीतं वैदूर्यमणितोरणम् ।
मुक्ताजालप्रतिच्छन्नं सर्वकामफलद्रुमम् ॥ ३० G. 7. 15. 37 B. 7. 15. 36 L. 7. 14. 33

288* संमोहयित्वा मायाभिरेवं राक्षसपुंगवः ।
परिवृत्य तदा तत्र सार्थवाहं दशाननः ।;

whereas D10.11 cont. after 287*; T1.2 G3 M1.3.6.7 ins. after 26^{ab}:

289* बहूनि च करोति स्म दृश्यन्ते न त्वसौ ततः ।

[M3 ववर्ष (for बहूनि). T1.2 M3 चास्त्रशस्त्राणि; G3 M1.6.7 शस्त्रवर्षाणि (for च करोति स्म). T1.2 G3 M1.6.7 च करोति च (for न त्वसौ ततः). M3 बहुरूपो बभूव ह (for the post. half).]

—D10.11 further cont.; Ñ2 D7 cont. after 287*:

290* प्रतिगृह्य ततो राम महदस्त्रं दशाननः ।

—Ś Ñ1 V1 B4 D2.8.9.12 om. 26^{cd}. —^{cd}) M6 धनदं मूर्ध्नि (by transp.). D7 विव्याध (for व्याविध्य). V3 अताडय- दशग्रीवस्तेजसा धनदं रणे; D1.3–5 आजघ्ने (D5 जघान) गदया मूर्ध्नि धनदं विननाद च.

27 M1 om. 27–28. —^{a}) D1.3.4 ततः (for एवं). Ñ1 B2–4 माया- (for तेन). B3 -[अ]भिमतो; B4 -विहतो. —^{b}) G1 विह्वलन्. B3 निश्चिताक्षितः (sic). —^{c}) Ś1 D3 क्षत-; D7.11 कृंत-; G2 हृत- (for कृत्त-). Ś D1.2.4.8.9.12 G2 इवाकाशे (D1.4 °श्चान्); G3 इव स्खालो (metri causa). —^{d}) Ś V1 D2.8.9.12 T3 वि(Ś1 V1 D2.8.9 नि)षसाद (for निपपात).

28 M1 om. 28 (cf. v.l. 27). —^{a}) D1.4 तथा (for ततः). —^{b}) Ñ1 B2.4 D6.7 निधानैः; V1 निधिपैः. B4 च; T3 स्वैर् (for स). Ñ B2.3 D6.7.10.11 तदा वृतः; V1 D5 नराधिपः; B4 समावृतः; D1.3.4 T2 G2 M10 तथा(T2 G2 M10 °दा) नृपः(D3 °प); T1.4 G1.3 M2.4–9 तदा नृप (for धनाधिपः). —^{c}) D3 M6 नंदन-. D1.3.4 T4 M6 आनीतो; G2 आधाय (for आनीय). —^{d}) M3 धनदोच्छ्वासितस् (for धनदो श्वासितस्). D4 तथा (for तदा). T4 M6 धनदश्चाभवल्ल्थि(T4 °त्त)तः. —For 28^{cd}, Ś Ñ V1.3 B2–4 D2.5–12 T3 M3 subst.:

291* आश्वासितो धनपतिर्वनमानीय नन्दनम् ।

[Ś V1 D2.5.8.9.12 T3 नरपते(D5 °तिर्); M3 तदा राम (for धनपतिर्). D10.11 धनदोच्छ्वासितस्तैस्तु (for the prior half). ❀ G3.t : धनदोच्छ्वासित इति संधिरार्षः ।; so also Ck. ❀ D3 वरम् (for वनम्). B2 आदाय (for आनीय).]

—After 28, D1.3.4 ins.:

292* धनेशं निर्जितं दृष्ट्वा रावणस्य च तद्बलम् ।
यक्षाधिपतयः सर्वे सार्थवाहादयस्तथा ।
विषण्णास्तस्थुरश्चैव न किंचित्प्रत्यपद्यत ।

29 G3 damaged up to धनदं in ^{b}. —^{a}) M3 एवं (for ततो). M1 निर्भिद्य; G3 निर्जित्य (as in text). D1.3.4 रक्षो (for राम). Ś V1.3 D2.5.8.9.12 T3 निर्जित्य राक्षसस्तत्र; Ñ B2–4 D6.7.10.11 निर्जित्य राक्षसेंद्रस्तं (B3.4 °द्रस्तु; D6 °द्रो वै). —^{b}) Ś Ñ V1.3 B2–4 D T3 हृ(B4 दु)ष्टमानसः (D1.3.4 °सं) (for राक्षसाधिपः). —^{d}) G2 M10 कामगं शुभं; G3.k.t जयलक्षणं (as in text).

30 D5 om. (hapl. ?) 30^{ab}. T1.2 G M1–5.7–10 transp. ^{ab} and ^{cd}. —^{a}) Ś V1.3 D2.8.9.12 T3.4 -निर्ऋहं; G1 M5 -संस्फीतं (for -संवीतं). —^{b}) Ś D1–4.6–12 S वैडूर्य-. V3 D1.3.4 T4 -कृत-; T1.2 G M -मय- (for -मणि-). —^{c}) M9 मुक्तादाम-. D5 T3.4 -परि- (for -प्रति-). —^{d}) Ś1 Ñ2 V1.3 B3 (before corr.; after corr. as in text) D6.10.11 T1 (*inf. lin.* also as in text) G1 M2.3 -काल- (for -काम-). Ñ1 -हत- (sic) (for -फल-). Ś1 B2–4 D3 T2.3 G1.2 M1.5.7 -प्रदं (for -द्रुमम्). —After 30, Ñ2 V1 D3.5–7.9–11 T3.4 G (ed.) ins.; while M3 ins. after 30^{ab} (transp.):

293* मनोजवं कामगमं कामरूपं विहंगमम् ।
मणिकाञ्चनसोपानं तप्तकाञ्चनवेदिकम् ।
देवोपवाह्यमक्षय्यं सदा दृष्टिमनःसुखम् ।
बह्वाश्चर्यं भक्तिचित्रं ब्रह्मणा परिनिर्मितम् ।

22 D_8 om. 22^{abc} (cf. v.l. 21). —[a]) Ś $\tilde{N}_1$ V_3 $D_{1-5.9.12}$ $T_{3.4}$ M_6 दयितो (for निहतो). V_3 भ्राता(sic) (for भर्ता). —[b]) Ś $D_{1-5.9.12}$ $T_{3.4}$ प्राणेभ्योप्य($D_{1.4}$ $T_{3.4}$ °भ्य)धिक(D_{1-5} °कः)प्रियः (D_2 $T_{3.4}$ प्रभुः ; D_8 मम); $\tilde{N}_1$ प्राणेभ्योपि गरीयसि (sic); $V_{1.3}$ प्राणेभ्यो ह्यधिकः प्रभुः (V_3 शुभः). —[c]) V_3 यस् (for स). Ś $V_{1.3}$ $D_{1-5.9.12}$ $T_{3.4}$ निहतो राजन् (Ś D_{12} युद्धे; D_2 राजा); M_3 दयितो वीरः $M_{6.10}$

G. 7. 32. 28
B. 7. 24. 29
L. 7. 30. 27

या त्वयास्मि हृता राजन्स्वयमेवेह बन्धुना ।
दुःखं वैधव्यशब्दं च दत्तं भोक्ष्याम्यहं त्वया ॥ २३
ननु नाम त्वया रक्ष्यो जामाता समरेष्वपि ।
तं निहत्य रणे राजन्स्वयमेव न लज्जसे ॥ २४
एवमुक्तस्तया रक्षो भगिन्या क्रोशमानया ।
अब्रवीत्सान्त्वयित्वा तां सामपूर्वमिदं वचः ॥ २५

अलं वत्से विषादेन न भेतव्यं च सर्वशः ।
मानदानविशेषैस्त्वां तोषयिष्यामि नित्यशः ॥ २६
युद्धे प्रमत्तो व्याक्षिप्तो जयकाङ्क्षी क्षिपञ्शरान् ।
नावगच्छामि युद्धेषु स्वान्परान्वाप्यहं शुभे ।
तेनासौ निहतः संख्ये मया भर्ता तव स्वसः ॥ २७

निहतस्तत्र (for दयितस्तत्र). Ñ1 सोपि त्वया हतो राजन्. —[d]) T3 भर्ता. M6 शक्र- (for शत्रु-). T3 G1.2 M1.2.4.5.7–9 मे (for वै). Ś Ñ1 V1 D1.4.8.9.12 T4 भर्ता प्राणसमो विभुः (Ñ1 V1 °मो रणे; D1.4.9 °मो मम; T4 °मोनघः). V3 भर्ता प्राणेश्वरो मम; D2.3.5 भ्रात्रा (D5 भर्ता) प्राणसमेन मे. ❀ Cv : मे निहत इत्यादि । तेषु कालकेयेषु स मे दयितो भर्ता तत्र युद्धे मे शत्रुसमेन भ्रात्रा त्वया निहतः. ❀ —For 22, Ñ2 B1.3.4 D6.7.10.11 K (ed.) subst. :

486* प्राणेभ्योऽपि गरीयान्मे तत्र भर्ता महाबलः ।
सोऽपि त्वया हतस्तात रिपुणा भ्रातृगन्धिना ।

[(l. 2) K (ed.) -गृध्नुना (for -गन्धिना).]

—After 22, T1.2 G3 M3.5 ins. :

487* निहतो युधि कोपेन मां विस्मृत्य यवीयसीम् ।

23 [a]) Ñ2 B1.3.4 D6 M6 तत् (for या). Ñ2 B4 महाराज (for हता राजन्). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 सा (Ś D8 T4 हा) हतास्मि त्वया राजन् (Ñ1 V1 नाम; T3.4 भ्रातः); D7.10.11 G1 M3.5 त्वयास्मि (M3 या त्वया) निहता राजन्; M10 त्वया कस्माद्धतो राजन्. —[b]) Ñ2 D5–7.10.11 T2 हि; B3 च (for [इ]हं). B1 शत्रुणा (for बन्धुना). G3 स्वय * * * * * ना (damaged). ❀ Cg : यतो मे भर्ता हतः, अत एव साहं स्वयं स्वबन्धुनैव त्वया निहतास्मि । ; Ck : त्वयेति । हे राजन् याहं हतास्मि साहं स्वयं बन्धुनैव त्वया हतास्मि । ; Ct : यतो मे भर्ता हतः, अतोऽहं बन्धुना त्वया स्वयमेव हतास्मि. ❀ —[c]) Ñ2 B1.3.4 D6.7.10.11 Cg राजन्; M10 एवं (for दुःखं). M6 हि (for च). ❀ Cg : राजन्नित्यादि सार्धम्. ❀ —[d]) Ñ2 B1.3.4 D6.7.10.11 भो (B4 र)क्ष्यामि त्वत्कृतं (B1.4 °ते) ह्यहं. —For 23[cd], Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 subst. :

488* वैधव्यशब्दं भोक्ष्येऽहं त्वत्कृते राक्षसर्षभ ।

[T3.4 -दुःखं (for -शब्दं). Ś D2.8.12 च (for ऽहं). Ś V3 D8.12 T4 राक्षसेश्वर; D5 राक्षसाधिप (for राक्षसर्षभ).]

24 [a]) V1 स तु (for ननु). M3 हतो (for त्वया). D1.4 नन्ववध्यो हि रक्षो (D1 °क्ष्यो)थ. —[b]) Ś D8.12 हि; D2.9 [इ]ह (for [अ]पि). M3.6 समरे त्वया (M6 भवेत्) (for समरेष्वपि). ❀ Cg : न न्विति पृथक् पदम् । जामाता नाम समरेष्वपि रक्ष्यो न नु नेति काकुः । रक्ष्य एव किलेत्यर्थः । ; so also Ck.t. ❀ —[c]) T1.2 G3 M1.3.8 महाराज. Ś Ñ V1.3 B1.3.4 D T3.4 स त्वया निहतो युद्धे. —[d]) D5 किं रावण (for स्वयमेव). Ś D2.8 लज्जसि.

25 [a]) B3.4 एवमुक्तः; D4 स एवमुक्तो (hypm.). Ś Ñ V1.3 D T3.4 दशग्रीवो; M4 तदा रक्षो; M10 ततो रक्षो (for तया रक्षो). —[b]) D6 M3 क्रोधमानया; M10 शोकमोहया (for क्रोशमानया). —[c]) V3 D3.4 T3.4 [ए]नां; B1 तु; D1 [ए]तां; G1 [इ]मां (for तां). D6 सान्त्वयामास; D12 क्षमयित्वा तां (for सान्त्वयित्वा तां).

26 [a]) G3 damaged from विषा up to भेत in [b]. Ś Ñ V1 B1.3.4 D1–5.7–12 रुदित्वा ते; T3.4 रोदनेन; G1 M5 विलापेन (for विषादेन). V3 भगिन्यलं रोदनेन. —[b]) D1.4 रोदितव्यं (metri causa) (for भेतव्यं). B1 हि (for च). Ś D8.9.12 सर्वथा; T3 °दा; T4 M3 °तः (for सर्वशः). ❀ Cv.t : न भेतव्यं च सर्वशः । बान्धवादिभ्योऽपि मा भैषीः । स्वैरं चरेत्यर्थः (Ct °र्थ इति तीर्थः). ❀ —[c]) Ś Ñ V1.3 B1.3.4 D T3.4 दानमान- (by transp.). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 -विभागैस्; Ñ2 B1.3.4 D6.7.10.11 -प्रसादैस्; M6 -विभोगैस् (for -विशेषैस्). M10 -विशेषेण. —[d]) D12 मानयिष्यामि. Ś Ñ1 V1.3 D1–5.8.9.12 T3 सर्वदा (V3 °था); Ñ2 B1.3.4 D6.7.10.11 यत्नतः (for नित्यशः).

27 [a]) Ñ2 B1.4 D9–11 G2 M10 युद्ध-; D5 अहं (for युद्धे). B3 प्रसक्तो; M5 प्रमत्ते (for प्रमत्तो). M6 क्षिप्तो वा (for व्याक्षिप्तो). —[b]) Ś D2.5.8.9.12 युद्धाकांक्षी; Ñ2 B1.3.4 D1.3.4.6 T1 G1.2 M10 जयाकांक्षी (for जय°). V1 क्षिपंस्तदा; V3 च दुर्मदः; D9 पतञ्शरान्; M2 क्षिपञ्जनान्; M10 रिपुश्छलात् (sic) (for क्षिपञ्शरान्). —V3 om. 27[cd]. —[c]) D3 नावगच्छति. M1 [अ]हं युद्धे (for युद्धेषु). Ñ2 B1.3.4 D6.7.10.11 नाहम् (D6 °हं प्र)ज्ञासिषं युध्यन् (B1.3.4 °द्धे). —[d]) G2 चापि; M6 अपि (for वापि). Ś Ñ1 V1 D2.3.5.8.9.12 T4 वि (Ñ1 V1 D3 T4 वा)जयातुरः; Ñ2 B4 D6.7.10.11 वा (B4 D6 अ)पि संयुगे; D1.4 च यथातुरः; T3 M10 इति (M10 अपि) शोभने (for वाप्यहं शुभे). B1.3 परान्वापि यदि (B3 °न्वा यदि वा) स्वकान्. —After 27[cd], Ñ V1.3 B1.3.4 D1–7.10.11 T G3 M3.6.10 ins. :

489* जामातरं न जानामि प्रहरन्युद्धदुर्मदः ।

[Ñ2 B1.3.4 D6.7.10.11 जाने स्म; V1.3 D1–5 T3.4 [अ]भिजाने (for जानामि). Ñ1 भर्तारं नाभिजाने ते (for the prior

अस्मिन्काले तु यत्प्राप्तं तत्करिष्यामि ते हितम् ।
भ्रातुरैश्वर्यसंस्थस्य खरस्य भव पार्श्वतः ॥ २८
चतुर्दशानां भ्राता ते सहस्राणां भविष्यति ।
प्रभुः प्रयाणे दाने च राक्षसानां महौजसाम् ॥ २९
तत्र मातृष्वसुः पुत्रो भ्राता तव खरः प्रभुः ।
भविष्यति सदा कुर्वन्यद्वक्ष्यसि वचः स्वयम् ॥ ३०

शीघ्रं गच्छत्वयं शूरो दण्डकान्परिरक्षितुम् ।
दूषणोऽस्य बलाध्यक्षो भविष्यति महाबलः ॥ ३१
स हि शमो वनोद्देशः क्रुद्धेनोशनसा पुरा ।
राक्षसानामयं वासो भविष्यति न संशयः ॥ ३२
एवमुक्त्वा दशग्रीवः सैन्यं तस्यादिदेश ह ।
चतुर्दश सहस्राणि रक्षसां कामरूपिणाम् ॥ ३३

G. 7. 32. 41
B. 7. 24. 41
L. 7. 30 38

half). B3 प्रहसन् (for प्रहरन्). B3 -दुर्मः; T1.2 G3 -दुर्मतिः (for -दुर्मदः).]

—Ś D8.9.12 om. 27e/f. —e) Ñ1 ततो; M3 अतो (for तेन). D1.4 [अ]र्थं; D2 मे (for [अ]सौ). T1.2 G M1.2.5.7–9 चाभि(G1 M5.7 °पि)हतः (for [अ]सौ निहतः). —f) Ñ1 D7.5 तव (for मया). D2 हि च; D5 च मे; L (ed.) च हि (for तव). V1.3 D1.3.4 T3.4 M1 transp. मया and तव. Ñ2 D2 T1.2 G1.3 M1.5.8 स्वयं; D4 हि सः (for स्वसः). Ñ1 मम स्वसुः; G2 M2.4.6.7.9.10 स्वसुस्तव.

28 a) D1.4 यस्मिन् (sic). D2.5 च (for तु). B1 M1 सं- (for यत्). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 युक्तः; M1 -प्राप्ते (for प्राप्तं). ❀ Cg.k: अस्मिन् काले तु यत्प्राप्तं मत्कर्तव्यत्वेनेति शेषः।; so also Ct. ❀ —b) Ś Ñ1 V1 D1–5.8.9 T3.4 मा रुदः; V3 मा व्यथः; D12 मा नदं (for ते हितम्). —c) Ś Ñ V1.3 D T3.4 M1.6.10 -युक्तस्य (for -संस्थस्य). —d) Ś Ñ V1.3 B3.4 D2.8.12 M5.8 तव; B1 D10.11 T3.4 Cg.t वसः; Ck as in text (for भव). D1.4 वसतश्चैव पार्श्वतः. ❀ Cg: मातृष्वसेयस्य खरस्य भ्रातृत्वात् भ्रातुरित्युच्यते। पार्श्वतो वनसमीपे वसेत्यर्थः। मम तु राज्यपरवशस्य न त्वत्संमानने अवकाश इति भावः।; so also Ck.t. ❀

29 a) D1 स्वामित्वं; D5 भर्ता च; T3.4 G1 भ्राता मे (for भ्राता ते). —c) V1.3 D3.5 M3.6 प्रदाने; T1.2 G1 प्रायेण; T3 प्रधाने; Cv.g.k.t as in text (for प्रयाणे). V3 T3 माने च; B1 D3.5.7 M3.6 याने च; M8 दानेन (for दाने च). Ś D8.9.12 प्रभुः प्रसाद(D8.9.12 °दान)मानेन; Ñ1 सदा कुर्वत वादेशं; D1.4 प्रभुः शूरश्च संख्ये च; D2 प्रभुः प्रदानयानेन. —d) Ś Ñ V1 D T3.4 महाबलः; V3 निशाचरः; T1.2 भविष्यति (for महौजसाम्). ❀ Cv: प्रयाणे निर्वाहे।; Cg: चतुर्दशानां सहस्राणां प्रयाणे प्रेषणे दाने अन्नपानवस्त्रादिदाने प्रभुस्ते भ्रातेत्यन्वयः।; so also Ck.t. ❀

30 Ś D2.8.9.12 T1.2 G M read, while T3 repeats 30 after 32. —a) Ś Ñ1 V1.3 D1–5.7–12 T3 (first time) तत्र मातृष्वसेयस्ते. —b) Ś1.2 D1.2.4.8.9.12 स हि; Ś3 Ñ1 V1.3 D7.10.11 [अ]र्थं वै; D3.5 [अ]र्थं हि; T3 (first time) [अ]र्थं च (for तव). T3 (second time) सुखप्रदः; M10 सुखे प्रभुः (for खरः प्रभुः). —c) V1 सदा कुर्यात्; V3 तदा कुर्वन्; D1.4 सदा तूर्णं; D7.10.11 T3 (first time).4 तवादेशं; T3 (second time) M4.6.7 स ते क(M7 भ)र्ता (for सदा कुर्वन्). G2 M5 करिष्यति सदा सर्वं. —d) G1 तव (for स्वयम्). Ś Ñ1 V1.3 D2.3.5.8.9.12 तवादेशं(V1 तु वैराज्ञां) निशाचरः; D1.4 वनदेशं निवत्स्यति; D7.10.11 T3(first time).4 सदा कुर्वन्निशाचरः; T3(second time) M4.6.7 यत्त्वं वक्ष्यसि तद्वचः. ❀ Cg: भविष्यतीति। तवादेशं त्वद्वचः सदा कुर्वन्भविष्यति।; Ck: सदा कुर्वन्भविष्यति।; so also Ct. ❀ —For 30, Ñ2 B1.3(B1.3 read after 31).4 D6 subst. and read after 32; Ñ1 V3 D7 ins. after 32; D10.11 ins. after 31:

490* तत्र ते वचनं शूरः करिष्यति सदा खरः।
रक्षसां कामरूपाणां प्रभुरेष भविष्यति।

[(l. 1) B1.3 D6.7.10.11 तदा (for सदा). —(l. 2) B3.4 एव (for एष).]

31 a) D1.4 महाबलस्तु (for शीघ्रं गच्छतु). Ñ2 V3 B3 D6.7.10.11 G1.2 M5 वीरो (for शूरो). —b) B1.3 दंडकं. Ñ1 D8 G1 परिरक्षतु. —c) Ś V1 D1–5.8.9.12 T3 G1 च; M1 तु; M6 हि (for ऽस्य). B3 खरस्तस्य (for दूषणोऽस्य). —After 31, B1.3 read, while D10.11 ins. 490*.

32 B1.3 D10.11 om. and K (ed.) reads within brackets 32. —b) Ś1 D8 क्रोधेन. Ś V1.3 D1–5.8.9.12 T4 स्वयं; M6 पुनः (for पुरा). —c) Ś Ñ1 V1 D2.3.5.7–9.12 M6 अधी(Ś2 Ñ1 V1 D2.3.9 °धि)वासोः; D1.4 वनोद्देशोः; M3 अयं दासो (for अयं वासो). —d) B4 भवेदिति; G (ed.) भवेति सु- (for भविष्यति). Ñ2 B4 D6.7 महात्मनां; M6 [ए]वमब्रवीत् (for न संशयः). Ś Ñ1 V1.3 D1–5.8.9.12 भवितेति द्रु(D5 ह)तं (V1.3 ध्रुवं) व्रज. —After 32, Ś D2.8.9.12 T1.2 G M read, while T3 repeats 30. —After 32, Ñ1 V3 D7 ins., while Ñ2 B4 D6 read 490*.

33 a) K (ed.) एतम्. —b) M10 सेनां. Ñ2 B1.3.4 D6.7.10.11 M8 अस्य; M7 तत्र (for तस्य). —d) Ñ2 B1.3.4 D6.7.10.11 वीर्य(B1.4 बल)शालिनां; T3 M10 भीमकर्मणां (for कामरूपिणाम्). —After 33, D8 ins.:

491* षष्टिं चाश्वसहस्राणि सहस्रा विंशदन्तिनाम्।
चतुर्दश सहस्राणां परेषां रक्षसां प्रभुः।

Anna Research Team

G. 7 32. 41
B. 7 24. 41
L. 7. 30. 39

स तैः सर्वैः परिवृतो राक्षसैर्घोरदर्शनैः ।
खरः संप्रययौ शीघ्रं दण्डकानकुतोभयः ॥ ३४

स तत्र कारयामास राज्यं निहतकण्टकम् ।
सा च शूर्पणखा प्रीता न्यवसद्दण्डकावने ॥ ३५

इति श्रीरामायणे उत्तरकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

Arya Research Team

34 ^{a}) Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 ततः स तैः (T3 सर्वैः) (for स तैः सर्वैः). Ñ2 B1.3.4 D6.7.10.11 परिवृतः सर्वैः (by transp.). —^{b}) B1 G2 भीमविक्रमैः (for घोरदर्शनैः). —^{c}) Ś D8 प्रययौ च खरः; Ñ1 D1.3.4 अ(D1 आ)गच्छद्राक्षसः; Ñ2 D6.7.10.11 T3 आ(D6.10.11 अ)गच्छत खरः; V1.3 B4 D2.5.9.12 अ(D2.5 आ)गच्छत्स खरः; B1 समागच्छत्खरः; M4 ततः संप्रययौ (for खरः संप्रययौ). —^{d}) T1–3 G3 M8 अकुतोभयान् (T3 M8 °यं).

35 ^{ab}) Ñ1 सर्वत्र; T1.2 G3 ततः स (for स तत्र). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 स तत्र राज्यं कुर्वाणः खरो निहतकंटकः(Ñ1 D1.3.4 °कं). —^{c}) B4 सा तु. D2 G2.3 M5.7 शूर्पणखी; D8 शीर्षनखा. Ñ1 नाम; Ñ2 B1.3.4 D7.10.11 तत्र; D5 वीरा; D6 चैव; T2 G M2.4–6.8.10 प्रीत्या (for प्रीता). —^{d}) D1.4 (both with hiatus) अवसद्; D6 निवसद्; T3 वसंती (for न्यवसद्). Ñ2 B1.3.4 D1.3.5.7.10.11 M6 दंडके. Ś D2.8.9 वसं(D2 चरं)ती दंडकं वनं; Ñ1 V1.3 D12 T4 वसंती-(Ñ1 °सते) दंडके वने.

Colophon. —*Kāṇḍa name*: Ś1 B1 D9 M7 om. —*Sarga name*: Ś D2.5.9.12 वर(D5.12 °न)प्रदानिको (Ś3 °कं); Ñ1 खरप्रस्थानो; Ñ2 B1 D7 खीपरिदेवनं; V1 खरवरप्रदानो; V3 खरपुरप्रदानो; B3 परिदेवितं; B4 खरयानं; D1.3.4 खरस्य वरदानं. —*Sarga no.* (figures, words or both): Ś Ñ1 V3 B1 D2.12 om.; Ñ2 B3.4 32; V1 25; D1.4.5 31; D3.9 T4 30; D8 T3 29; G1 14; M6 28. —After colophon, D2 concludes with राम; T4 with श्रीरामार्पणमस्तु; G M1.2.5.8 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

२५

स तु दत्त्वा दशग्रीवो वनं घोरं खरस्य तत् ।
भगिनीं च समाश्वास्य हृष्टः स्वस्थतरोऽभवत् ॥ १
ततो निकुम्भिला नाम लङ्कायाः काननं महत् ।
महात्मा राक्षसेन्द्रस्तत्प्रविवेश सहानुगः ॥ २
तत्र यूपशताकीर्णं सौम्यचैत्योपशोभितम् ।
ददर्श विष्ठितं यज्ञं संप्रदीप्तमिव श्रिया ॥ ३
ततः कृष्णाजिनधरं कमण्डलुशिखाध्वजम् ।
ददर्श स्वसुतं तत्र मेघनादमरिंदमम् ॥ ४
रक्षःपतिः समासाद्य समाश्लिष्य च बाहुभिः ।
अब्रवीत्किमिदं वत्स वर्तते तद्ब्रवीहि मे ॥ ५
उशना त्वब्रवीत्तत्र गुरुर्यज्ञसमृद्धये ।
रावणं राक्षसश्रेष्ठं द्विजश्रेष्ठो महातपाः ॥ ६

G. 7. 33. 6
B. 7. 25. 6
L. 7. 31. 6

25

☞ V2 missing; B2 om. Sarga 25 (cf. v.l. 7.12.2 and 7.24.1 respy.); D12 begins with उ.

—Before 1, D3 ins.:

492* ततः कृताञ्जलिपुटो रामस्तं प्रत्युवाच ह ।
बहुचित्रा सुमधुरा कथा श्रोतृसुखावहा ।
त्वयैषा कथ्यमाना हि मनस्तृप्तिं न याति वै ।
कथं देवेन्द्रः समरे मेघनादेन संतितः । (sic)
एतद्वै श्रोतुमिच्छामि कथ्यतां तात विस्तरम् । [5]
एवमुक्तस्तु रामेण प्रत्युवाच मुनिस्तदा ।

1 ^{ab}) M6 गत्वा तु; Cg.k.t as in text (for तु दत्त्वा). Ñ2 V1 B1.3.4 D6.7.10.11 बलं (for वनं). Ś D2.8.9.12 T3 transp. दशग्रीवो and वनं घोरं. Ś B3 D2.5.8.9.12 T3.4 M6.7 तु; Ñ1 V1 तं; B1 च (for तत्). —^{c}) M10 तदाश्वास्य. —^{d}) D1.4 T2 G M5.8 हृष्ट- (for हृष्टः). B1 सुस्थ- (for स्वस्थ-). Ś D2.5.8.9.12 हृष्टः स्वस्थोभवत्तदा. —After 1, G1.2 M5.10 ins.:

493* स प्रविश्य दशग्रीवो गृहं मन्दरसंनिभम् ।
[G2 M5.10 अप्रविश्य (for अप्र°). M5 मंदिर- (for मन्दर-).]

2 ^{a}) T1 G1 M1–3.5.6 निकुंभिलां; G2 निजकुलां; Cv.g.k.t as in text (for निकुम्भिला). —^{b}) V1 M5 लंकायां. V1 D5 तु वनं; V3 T4 तद्वनं (for काननं). Ś D2.8.9.12 लंकायां तु महावनं; Ñ1 लंकाबाह्यवनं महत्; Ñ2 B1.3.4 D6.7.10.11 लंकोपवनमुत्तमं; D1.3.4 लंकां (D3 °का) पश्चिमतो वनं; G2 M10 लंकायाः कानने शुभे. ❀ Cv: निकुम्भिला-संबन्धात्काननमपि तथोच्यते।; Cg: निकुम्भिला नाम लङ्कायाः पश्चिमद्वारवर्ति काननम्।; so also Ck.t. ❀ —After 2^{ab}, G1.2 M10 ins.:

494* काली संतर्प्यते यत्र सुखं वसतिरुत्तमा ।
[G2 M10 गौरी तस्यां (for यत्र सुखं).]

—^{c}) G1.2 M2.10 तु; M6 तां (for तत्). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 तन्महात्मा दशग्रीवः; Ñ2 B1.3.4 D6.7.10.11 तद्राक्षसेंद्रो बलवान्. —^{d}) Ś D3 महाभुजः; D2.9.12 सहानुजः (for °नुगः).

3 ^{a}) Ś Ñ V1.3 B1.3.4 D T3.4 Cg ततो (for तत्र). B4 D7 -शताकीर्णः; M4.7 -समाकीर्णं (for -शताकीर्णं). —^{b}) Ś V1 D1.3.4.8.12 T1.2.4 G3 M1–4.6–8 सौम्यं; V3 सर्मं; B4 सोम- (for सौम्य-). B3.4 -चित्य- (for -चैत्य-). B4 D7 -शोभितः (for -शोभितम्). —^{c}) Ś Ñ1 V3 B1.4 D1–5.7–9.12 ददृशे. Ś Ñ1 V3 B1.4 D2.8.9.12 M3 [अ]विष्ठितं (B1.4 °तो; D2 °ते); B3 विष्ठिते; D1.3–7 विस्मितो; T4 धिष्ठितं; M6 विष्ठितो (for विष्ठितं). Ś D12 यज्ञे; B1.3.4 यज्ञः. —^{d}) Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 श्रिया परमया युतं (Ñ1 वृतं; D2.5 युतः); Ñ2 B1.4 D6.7.10.11 श्रिया संप्रज्वलन्निव; B3 श्रिया प्रज्वालयन्किरे (sic); M6 श्रिया प्रबलयन्निव.

4 ^{ab}) V1 D1.3.4 T3.4 तत्र (for ततः). G (ed.) -[अं]बर- (for -[अ]जिन-). M6 transp. कृष्णाजिन- and कमण्डलु-. B1.3.4 D1.2.4.6.7 M6 -शिखि (B3 °ख)ध्वजं; D3 T3 -कुशध्वजं; D5 -जटाधरं; T2 G1.2 M10 -शिखोज्ज्वलं; T4 -शिखाधरं; M3 -कुशोज्ज्वलं; Cv.g.k.t as in text (for -शिखाध्वजम्). —^{cd}) Ñ2 B1.3.4 D6.7.10.11 भयावहं (for अरिंदमम्). Ś Ñ1 V1.3 D1–5.8.9.12 T3 ददर्श रावणः पुत्र-मिंद्रजेतारमाहवे (D5 T3 °मध्वरे).

5 ^{ab}) Ś V1.3 D1–5.8.9.12 T3.4 तं समासाद्य (V1.3 D1.3.4 T3.4 °गम्य) रक्षस्तु; Ñ B1.3.4 D6.7.10.11 तं समासाद्य (Ñ1 °गम्य) लंकेशः; M6 राक्षसेंद्रस्तमासाद्य (for ^{a}). M10 transp. समासाद्य and समाश्लिष्य. Ñ B1.3.4 D6.7.10.11 परिष्वज्याथ (B1.3.4 °ज्य च); G1 समाश्वास्य च (for समाश्लिष्य च). D12 राक्षसः (for बाहुभिः). —^{c}) Ñ1 भद्र (for वत्स). —^{d}) D5 G1.2 M1 वर्तसे (for वर्तते). G2 यद् (for तद्). Ñ2 B1.3.4 D6.7.10.11 वर्तसे ब्रूहि तत्त्वतः. —After 5, D3 ins.:

495* उक्तस्तु समरामर्दी पित्रा ह्येवमथेन्द्रजित् ।
शुक्रमाह च तद्ब्रूहि यथैतद्वर्ततेऽद्भुतम् ।

6 ^{a}) V3 D5–7.9 T3.4 G M1–3.5.10 Ck उशनास्; Cg.t as in text (for उशना). B4 तं तु; G (ed.) तूर्णं (for तत्र). —^{b}) V1.3 भृगुर् (for गुरुर्). Ś D2.8.9.12 योत्र (for यज्ञ-). B1 यज्ञ**; D6.7.10.11 Ct यज्ञसंपत्- (for गुरुर्यज्ञ-). V1 -समृद्धया (for -समृद्धये). ❀ Cg: उशना गुरुः शुक्राचार्यः। प्रवर्तकत्वात् स्वयमब्रवीदिति भावः।; Ck: पुत्रस्य मौनित्वात्

G. 7. 33. 7
B. 7. 25. 7
L. 7. 31. 7

अहमाख्यामि ते राजञ्श्रूयतां सर्वमेव च ।
यज्ञास्ते सप्त पुत्रेण प्राप्ताः सुबहुविस्तराः ॥ ७
अग्निष्टोमोऽश्वमेधश्च यज्ञो बहुसुवर्णकः ।
राजसूयस्तथा यज्ञो गोमेधो वैष्णवस्तथा ॥ ८
माहेश्वरे प्रवृत्ते तु यज्ञे पुम्भिः सुदुर्लभे ।
वरांस्ते लब्धवान्पुत्रः साक्षात्पशुपतेरिह ॥ ९
कामगं स्यन्दनं दिव्यमन्तरिक्षचरं ध्रुवम् ।
मायां च तामसीं नाम यया संपद्यते तमः ॥ १०
एतया किल संग्रामे मायया राक्षसेश्वर ।
प्रयुद्धस्य गतिः शक्या न हि ज्ञातुं सुरासुरैः ॥ ११
अक्षयाविषुधी बाणैश्चापं चापि सुदुर्जयम् ।
अस्त्रं च बलवत्सौम्य शत्रुविध्वंसनं रणे ॥ १२
एतान्सर्वान्वरॉल्लब्ध्वा पुत्रस्तेऽयं दशानन ।
अद्य यज्ञसमाप्तौ च त्वत्प्रतीक्षः स्थितो *अहम् ॥ १३

याजकः पुरोहितो वक्ति । गुरुः पुरोहितः । ; so also Ct. ❀ —^{c}) D5 रक्षसां श्रेष्ठं. —^{d}) Ñ1 V1.3 D1.3.4 परंतपः (V3 °प) ; G2 °बलं (for महातपाः).

7 V3 lacuna up to ञ्श्रू in ^{b}. —^{a}) T4 M2.4.8.9 अयम् ; Cg as in text (for अहम्). Ś D2.8.9.12 सुप्रियं तव हे; Ñ V1 B1.3.4 D3.5 प्रियं भवतु ते; D1.4 प्रियं तव सुतो; M6 प्रीतिस्त्वां भजतां (for अहमाख्यामि ते). —^{b}) Ś Ñ1 V1.3 D1–5.8.9.12 हि; D6.7.10.11 T3.4 G2 तत् (for च). Ñ2 B1.3.4 वचनं मम; M5 सर्वमादितः (for सर्वमेव च). —^{c}) D8 यज्ञस्ते. V3 साधु-; M1 तव (for सप्त). Ñ1 D2 -रात्रेण; M5 पूर्णेन (sic) (for पुत्रेण). —^{d}) D8 प्राप्तः ; M6 हुताः (for प्राप्ताः). D7.10.11 G1 ते (for सु-). Ñ1 B3.4 संप्राप्ता (for प्राप्ताः सु-). G2 -पुत्रवान् (for -विस्तराः). Ś Ñ2 V1.3 D1–5.8.9.12 T3.4 पुंभिः (D1.3.4 प्रति) सुदुर्लभाः (D8 °भः); Ñ1 ननु विस्तरात् (for सुबहुविस्तराः).

8 Ś D8.12 om. (hapl., see var.) 8–9^{b}. —^{a}) D5.11 M6 अग्निष्टोम-; D9 °सोमो (for °ष्टोमो). M6 -मेधाश् (for -मेधश्). —^{b}) Ñ1 B1.4 तथा (for यज्ञो). G2 सुबहुवर्णकः. M6 यज्ञा बहुसुवर्णकाः . —^{c}) M10 वाजपेयो (for तथा यज्ञो). —^{d}) B1.3.4 D1–5.9 M6 गोसवो; L (ed.) गोघ्नो (for गोमेधो).

9 Ś D8.12 om. 9^{ab} (cf. v.l. 8). —^{a}) B1 महेश्वरे. M10 च (for तु). Ñ1 D2.9 मा (D2 म)हेश्वरः प्रवृत्तस्तु. —^{b}) Ñ1 D9 यज्ञः ; D2 प्राज्ञः ; L (ed.) प्राप्ताः (for यज्ञे). —V3 lacuna from पुम्भिः up to °. B3 पुष्टिः (for पुम्भिः). Ñ1 D2.9 -दुर्लभः ; D3.5 -दुर्लभौ (sic); T2 -दुर्लभैः ; L (ed.) -दुर्लभाः (for -दुर्लभे). —^{c}) Ñ2 B1.3.4 वरं (for वरांस्). G1 तु (for ते). M8 तत्र (for पुत्रः).

10 ^{a}) D1.4 विद्धाम् (sic); G2 नित्यम् (for दिव्यम्). —^{b}) B4 M7 अंतरीक्ष-; G1 M8 °रिक्षे (for अन्तरिक्ष-). M8 च तत् (for -चरं). Ñ2 V3 B1.3.4 D1.3–5 T3.4 शुभं; T2 द्रुतं; M10 मृधे (for ध्रुवम्). —^{c}) D1.3.4 M10 माया. D1.3.4 M10 तामसी; D9 तामसां (for °सीं). —V3 lacuna for 10^{d}. G2 om. (hapl.) from 10^{d} up to मा in 11^{b}. —^{d}) T1.4 G1.3 यथा; M6 यतः (for यया). G3 संपाद्यते. Ś Ñ1 V1 D1–4.8.9.12 T3 यस्यां (V1 D1.3.4 T3 °स्याः) प्रभवते तमः ; Ñ2 B1.3.4 तमसः प्रभवो यतः (B1.3 हि यत्); D5 यदस्यां प्रभवेत्तमः .

11 G2 om. up to मा in ^{b} (cf. v.l. 10). —^{a}) B3 अनया (for एतया). B4 किं नु (for किल). G1 तया किलास्य (for एतया किल). —^{b}) Ś Ñ1 V1.3 D1–5.8.9.12 T3 राक्षसोत्तम (for राक्षसेश्वर). —^{c}) Ñ2 B1.3 D6.7.10.11 M2.8.9 प्रयुक्तस्य (D10.11 °या); V1.3 प्रबृद्धस्य; B4 संनद्धस्य; T1.2 G3 M1 प्रयुध्यतो; M3 प्रयुध्यया; M10 प्रवृत्तस्य (for प्रयुद्धस्य). Ś2.3 Ñ1 D2.8.12 M6 गतिं (for गतिः). Ś D8 बोद्धुं; Ñ1 V1.3 D1–5.9 M6 वेत्तुं; D12 वक्तुं (for शक्या). Ñ2 B1.3.4 न शक्या वै (for गतिः शक्या). —^{d}) Ś Ñ1 V1.3 D1–5.8.9.12 न शक्या (D2.4 °क्यो [sic])वै; Ñ2 B1.3.4 गतिर्वेत्तुं (B1 °र्बहु [sic]) ; T1.2 G3 M3 न विज्ञातुं; M6 नैव शक्यं; G (ed.) न हि वेत्तुं (for न हि ज्ञातुं).

12 Ñ2 B1.3.4 om. 12^{ab}. —^{a}) Ñ1 V1 अक्षय्यौ (V1 °यौ) त्विषुधी; T3 अक्षय्याविषुधी; L (ed.) अक्षया-निषुधीन् (for अक्षयाविषुधी). Ś V1 D2.5.8.9.12 बाणांश् ; D1.4 बाणाश् (for बाणैश्). —^{b}) D6 marg.; T4 युद्धे (for चापि). D5 T4 सुदारुणं (for सुदुर्जयम्). Ś D8.9.12 चापि (D9.12 °प)युद्धे सुदारुणान् ; Ñ1 V1.3 D1–4 चापं यु (V3 धनुर्यु)द्धे सुदारुणं (Ñ1 °णः); T3 चापश्चापि सुदुर्जयः . —^{c}) D6.7.10.11 T2 M10 राजन् ; G2 सम्यक् ; M8 सौम्यं (for सौम्य). —^{d}) T3 सर्वो; G1 शस्त्र- (for शत्रु-). —For 12^{cd}, Ś Ñ V1.3 B1.3.4 D1–5.8.9.12 T4 subst. :

496* अक्षाणि विविधान्येव शत्रुविध्वंसनानि च ।

[Ś D8.12 [ए]वं (for [ए]व). Ñ2 च समस्तानि; B1 च समग्राणि; B3 च समृद्धानि (for विविधान्येव). V1 D1.3.4 T4 वै (for च). V3 तुल्यानि वरतेजसा (for the post. half.).]

13 ^{a}) Ś Ñ V1.3 B1.3.4 D1–5.8.9.12 M6 एवं (for एतान्). M6 प्राप्तः (for लब्ध्वा). M1 transp. सर्वान् and लब्ध्वा. —^{b}) Ś Ñ1 V1.3 D1–5.8.9.12 त (V3 D9 सु)तश्च (for पुत्रस्ते). M3 तव (for तेऽयं). —^{c}) Ñ2 B1.3 महा- ; B4 समा; M6 अस्य (for अद्य). T3 यज्ञः; M10 यज्ञे. Ñ V1.3 -समाप्तिस् ; T3 समाप्तश् ; M10 समाप्ते (for -समाप्तौ). Ś Ñ D2.5.8.9.12 T1.2 G2.3 M3 तु (for च). —^{d}) D1.4 त्वत्प्रतीक्षा-; D3 त्वत्प्रतीक्षन् ; D6.7.10.11 K (ed.) Ct त्वां

ततोऽब्रवीद्दशग्रीवो न शोभनमिदं कृतम् ।
पूजिताः शत्रवो यस्माद्दैवैरिन्द्रपुरोगमाः ॥ १४
एहीदानीं कृतं यद्धि तदकर्तुं न शक्यते ।
आगच्छ सौम्य गच्छावः स्वमेव भवनं प्रति ॥ १५
ततो गत्वा दशग्रीवः सपुत्रः सविभीषणः ।
स्त्रियोऽवतारयामास सर्वास्ता बाष्पविक्लवाः ॥ १६
लक्षिण्यो रत्नभूताश्च देवदानवरक्षसाम् ।
नानाभूषणसम्पन्ना ज्वलन्त्यः स्वेन तेजसा ॥ १७
विभीषणस्तु ता नारीर्दृष्ट्वा शोकसमाकुलाः ।
तस्य तां च मतिं ज्ञात्वा धर्मात्मा वाक्यमब्रवीत् ॥ १८

G. 7. 33. 18
B. 7. 25. 17
L. 7. 31. 20

दिदक्षन् (K [ed.] °क्षुः) ; T G2.3 M1.3.5.10 त्वां प्रतीक्ष्य (for त्वत्प्रतीक्षः). Ś D2.8.9.12 [ऽ]भवत्; Ñ1 V3 D6 (also).10.11 T3.4 G1 M2.6.8 ह्यहं; Ñ2 B1.3.4 विभो; V1 D1.3–7 T1.2 G2.3 M1.3–5.7.9.10 ह्ययं (for *अहं).

14 °) Ñ1 V1.3 D1.3.4 अर्चिताः (for पूजिताः). Ś Ñ1 V1.3 D1–5.8.9.12 T4 मह्यं; Ñ2 B1.3.4 यन्मे (for यस्माद्). —ᵈ) Ś Ñ V1.3 D1–5.8.9.12 T4 देवाः; B1.4 M6.7 हव्यैर् ; B3 देवैर् (sic); G2 द्रवैर् (for द्रव्यैर्). V1 T4 शक्र- (for इन्द्र-). Ś D1–4.8.9.12 -पुरःसराः (for -पुरोगमाः).

15 M6 repeats 15^{ab} consecutively. —ᵃ) Ś Ñ1 V1.3 D1–5.8.9.12 T3 इह (for एहि). Ś Ñ1 V1.3 D1–5.9 M4.7 यत्तु; Ñ2 B1.3 यज्ञे; B4 यत्ते; D8.12 यत्तत् ; T1 M3 विद्धि; T4 किं नु (for यद्धि). M6 (second time) देहिनां निष्कृतं युद्धं. —ᵇ) Ś Ñ1 D5.8.12 तच्च (Ñ1 तत्तु; D5 वद; D12 तत्र) कर्तुं; M2.5.9 तदाहर्तुं (for तदकर्तुं). D12 शक्नुते; T2 विद्यते (for शक्यते). Ñ2 B1.3.4 न कर्तव्यमजानताः; V3 कर्तुं तदनु शक्यते; D7.10.11 T3 M6(first time).10 सुकृतं तच्च (M10 ते न) संशयः ; T4 त्वया चात्मा प्रयासितः ; M3 कर्तुमन्यच्च शक्यते. —ᶜ) Ñ2 B1.3.4 D9 जहीहि (for आगच्छ). Ś Ñ1 V1.3 D1–5.8.12 T3.4 वत्स (for सौम्य). Ñ1 गच्छामि; B1 D9 T3 G1 गच्छावः(T3 G1 °व) ; D2 T1.2 G2.3 M2.5.8.9 गच्छाम (for गच्छामः). —ᵈ) M5 पुनः (for प्रति). —After 15, D2 ins. 498*.

16 D2 om. 16. M8 om. 16^{b} – 18^{a}. —ᵇ) G2 सुपुत्रः . —ᶜ) Ś Ñ1 V1.3 D1.3–5.8.9.12 T3.4 अवतारयितुं चक्रे. —ᵈ) Ś Ñ1 V1.3 D1.3–5.8.9.12 T3.4 ताः स्त्रियो; Ñ2 B3.4 ततस्ताः ; B1 तत्रस्थाः (for सर्वास्ता). Ñ1 वाक्यमब्रवीत् ; Ñ2 B1.4 शोकविक्लवाः(B4 °ह्वलाः); B3 शोककर्षिताः ; D6.7.10.11 बाष्पगद्गदाः ; D12 M1 बाष्पविह्वलाः ; M6 विक्लवा भृशं (for बाष्पविक्लवाः).

17 M1.8 om. 17 (for M8, cf.v.l. 16). —ᵃ) D6 T1–3 M2.9.10 लक्षण्यो; G1 स्वक्षिण्यो; G2 रक्षिण्यो; M4.6.7 यक्षिण्यो; Ct as in text (for लक्षिण्यो). D6 T1 G1.2 -भूषाश् ; Ck.t as in text (for -भूताश्). M3 लक्षण्यो या रत्नभूता. —ᵇ) M6 दैत्यदानवकन्यकाः . —D10.11 om. ; K (ed.) reads within brackets 17^{a} – 18^{b}. —ᶜ) K (ed.) [नार्यो (for नाना-). —ᵈ) D6.7 M10 ज्वलंतीः ; T3 ज्वलंति; G1 ज्वलंते (for ज्वलन्त्यः). —For 17, Ś Ñ V1.3 B1.3.4 D1–5.8.9.12 T4 subst. :

497* रक्षणीयानि रत्नानि दैत्यगन्धर्वरक्षसाम् ।
तेजसा ज्वलमानानि नानाप्रहरणानि च ।

[Ś D8 repeat l. 1 after 499*. —(l. 1) Ś D8 (both second time रमणीयानि).9.12 पृथिव्यां यानि; Ñ2 B1.3.4 दैत्योरगाणां (for रक्षणीयानि). V3 रक्षणीयाः प्रयत्नेन (for the prior half). Ñ2 B1.3.4 यान्यथो यक्ष- (for दैत्यगन्धर्व-). —(l. 2) D2 -मानानां (for -मानानि) and वै (for च). Ñ2 V3 B1.3.4 नानाभरणयुक्तानि भासमानानि तेजसा (B4 सर्वशः).]

—Thereafter, Ś Ñ1 V1.3 D1.3–5.8.12 T4 cont.; while D2 ins. after 15; whereas T3 ins. after 17 :

498* सिंहीनां राजसिंहीनां सरितां कोकिलास्वपि ।
तुल्यवेषाः स्त्रियस्तत्र ददर्शाथ विभीषणः ।

[D1.4 om. l. 1. —(l. 1) V3 वनिताः (for सरितां). Ñ1 V1 कोकिलामि(Ñ1 °म)ति (sic); V3 D5 कोकिला इव(D5 अपि); D2 कोकिलामपि (sic); D3 कोशिनामिति (for कोकिलास्वपि). T4 सरिदः सरसामपि (for the post. half). T3 सिंहानां राजसिंहानां सरिदप्सरसामपि. —(l. 2) T3 तुल्याश्चेताः; T4 तुल्यवेगाः (for तुल्यवेषाः). D12 ददृशे (for ददर्श).]

—Ś D8.12 further cont. :

499* मध्ये क्षामा भवेत्सिंही राजसिंही कुचोज्वला ।
सरिद्विस्तीर्णजघना कोकिला मञ्जुभाषिणी ।

[(l. 1) L (ed.) [अ]भवत् (for भवेत्) and -[उ]ज्वता (for -[उ]ज्वला).]

18 M8 om. 18^{a} (cf. v.l. 16). D10.11 om.; K (ed.) reads within brackets 18^{ab} (for both, cf. v.l. 17). —^{ab}) Ś D2.8.9.12 च; Ñ2 B1.3.4 [ऽ]थ (for तु). D9 तां; M1 का (for ता). T4 M10 ततो (for तु ता). D9 G2 दृष्ट्वा (for नारीर्). G2 दुःख- (for दृष्ट्वा). Ś Ñ2 B1.3.4 D1.2.8.12 T3 दृष्ट्वा नारीः (by transp.); Ñ1 V1.3 D3–5 दृष्ट्वा नार्यः (for नारीर्दृष्ट्वा). D6.7 -परायणाः; M3.5 -समन्विताः (for -समाकुलाः). D9 M8 नारीं(M8 पुष्पा [sic]) शोक-समाकुलां (for ^{b}). —ᶜ) D6 तां सु-; D7.10.11 तासु (for तां च). Ś D2.8.9.12 पापं भ्रातुर्मतं दृष्ट्वा; Ñ1 V1.3 D1.3–5 T3.4 पापां भ्रातुर्मतिं ज्ञात्वा; Ñ2 तस्य तत्कर्म विज्ञाय; B1.3.4 G (ed.) तासां(B3 तस्य) तद्(G [ed.]तु व)चनं श्रुत्वा. —ᵈ) Ś D8 सधर्मस् ; D2.12 सधर्मा; L (ed.) स धर्मात्

C. 7. 33. 19
B. 7. 25. 18
L. 7. 31. 21

ईदृशैस्तैः समाचारैर्यशोऽर्थकुलनाशनैः ।
धर्षणं प्राणिनां दत्त्वा स्वमतेन विचेष्टसे ॥ १९
ज्ञातीन्वै धर्षयित्वेमास्त्वयानीता वराङ्गनाः ।
त्वामतिक्रम्य मधुना राजन्कुम्भीनसी हृता ॥ २०
रावणस्त्वब्रवीद्वाक्यं नावगच्छामि किं त्विदम् ।
को वायं यस्त्वयाख्यातो मधुरित्येव नामतः ॥ २१

विभीषणस्तु संक्रुद्धो भ्रातरं वाक्यमब्रवीत् ।
श्रूयतामस्य पापस्य कर्मणः फलमागतम् ॥ २२
मातामहस्य योऽस्माकं ज्येष्ठो भ्राता सुमालिनः ।
माल्यवानिति विख्यातो वृद्धः प्राज्ञो निशाचरः ॥ २३
पितुर्ज्येष्ठो जनन्याश्च अस्माकं त्वार्यकोऽभवत् ।
तस्य कुम्भीनसी नाम दुहितुर्दुहिताभवत् ॥ २४

(for धर्मात्मा). Ś Ñ1 V1.3 D2.5.8.9.12 त्विदम् (for वाक्यम्). D7 धर्मवाक्यमथाब्रवीत्.—After 18, Ñ2 V1 read 22^{cd} for the first time, repeating it in its proper place.

19 ^{a}) Ñ1 तादृशैस्. Ś2.3 D8 पाप- (hypm.); Ñ V1 D1–5 G1 ते; V3 B1 D6.7.10.11 T4 M1.5.10 स्वं; M8 स्वत्- (for तैः). Ś1 D12 दुरिताचारैर्; M6 असमाचारैर् (for तैः समाचारैर्). L (ed.) ईदृक्पापसमाचारैर्. —^{b}) Ś D8 -बलवि-; V1 स्वकुल-; D2 वः कुल-; D12 -लक्ष्मीवि- (for -ऽर्थकुल-). Ñ2 B1.3.4 कुलात्म(B4 °र्थ)गुणनाशनैः. —^{c}) G1 M1.4 धर्षणां. K (ed.) ज्ञातिनां (for प्राणिनां). D7.10.11 M10 ज्ञात्वा; T2 G2 M1 कृत्वा (for दत्त्वा). —^{d}) M4.7 स्वयमेव; Cg.k.t as in text (for स्वमतेन). —For 19^{cd}, Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 subst.; while Ñ2 cont. after 501*:

500* परान्धर्षयतो राजन्धर्षणेयमुपस्थिता ।

[D1.2.4 धर्षयते. V1 परार्थं वै धर्षणेयम् (for the prior half). Ś1.2 D8.12 धर्षणीयमुपस्थितं; Ñ2 V1.3 धर्षणा(V1 अस्माकं; V3 स्वर्यति [sic]) समुपस्थिता (for the post. half).];

while Ñ2 B1.3.4 M6 subst.:

501* धर्षणां प्रापिता राजन्सभं हि विनिपातनम् ।

[M6 धर्षिताः (for धर्षणां). B3 प्राप्तवान्; M6 सादिता (for प्रापिता). B1 न निपातिता (for विनिपातनम्). M6 सा मही विनिपात्यते (for the post. half).]

20 T2 reads 20^{ab} twice. —^{a}) D10.11 तान्; G1 च (for वै). Ś Ñ1 V1.3 B3.4 D1–5.8.12 T3 M6 परान्हि(V3 °न्सं; T3 °न्वै); Ñ2 यथा हि; B1 पुरा हि; D6 T1.2 (first time) प्राणिनो; G (ed.) परा हि; Cg.k.t as in text (for ज्ञातीन्वै). V3 च; D5 [इ]ह; D6.7 T1.2 (both times) G3 M1.3.5.10 [ए]तास्; G1 [ए]व (for [इ]मास्). D9 परं हि धर्मं हित्वेमास्. —^{b}) V3 पुरांगनाः; D5 परांगनाः; G1 कुलांगनाः (for वराङ्गनाः). —^{c}) Ś Ñ1 V1.3 B3 D1–5.8.9.12 M6 तवाप्या(D2 °था)क्रम्य; Ñ2 B1.4 तव(Ñ2 °था)चा°; G2 त्वामभि° (for त्वामतिक्रम्य). Ś D8.12 बंधूनां (for मधुना).

21 ^{a}) B1.3.4 तत्र (for वाक्यं). —^{b}) T4 M1.3.4.6–8.10 नु (for तु). Ś Ñ1 V1.3 D1–5.8.9.12 इदानीं ना(D9° नीम) वगच्छसि(Ñ1 V1.3 D1.3–5 °म्यते; D9 °च्छसे); Ñ2 B1.3.4 किमिदं नाव(B1.4 °धि; B3 °भि)गम्यते. —^{c}) Ś D2.8.9.12 [ऽ]यं पाप; Ñ1 [ऽ]यमद्य; V1 [ऽ]यं वा यस्; V3 D1.3–5 [ऽ]यं पापस्; D6.7.10.11 T3.4 M4 [ऽ]यं यस्तु; M10 [ऽ]यं रक्षस् (for वायं यस्). —Ś2.3 D8 G2 om. (hapl.) 21^{d}–23^{c}. —^{d}) Ś1 V1.3 D1–5.9.12 राक्षसः; Ñ B1.3.4 चोद्यते (for नामतः). M6 मधुरित्यभिधीयते.

22 Ś2.3 D8 G2 om. 22 (cf. v.l. 21). —^{a}) M6 च (for तु). Ś1 V1 D1.4.5.9.12 सक्रोधो(D9 °धं); D2 स क्रोधाद् (for संक्रुद्धो). Ñ B1.3.4 ततो विभीषणः क्रुद्धो. —^{b}) Ś1 D2.5.9.12 रावणं (for भ्रातरं). B1 चेदम् (for वाक्यम्). —Ñ2 V1 repeat 22^{cd} here (cf. v.l. 18). —^{c}) V1 (second time) तव (for अस्य). —^{d}) V1(second time [first time उत्तमं]).3 ईदृशं (for आगतम्).

23 Ś2.3 D8 G2 om. 23^{abc} (cf. v.l. 21). —^{a}) Ś1 V1.3 D1–5.9.12 योऽस्म(D1.3.4.12 °स्मा)न्मातामहस्यः; Ñ B1.3.4 योऽसौ मातामहोस्माकं. —Ñ B1.3.4 transp. ^{b} and ^{d}. —^{b}) M10 भ्राता ज्येष्ठः (by transp.). Ś1 V1.3 D1–5.9.12 निशाचरः (for सुमालिनः). —^{c}) Ñ B1.3.4 नाम (for इति). —^{d}) Ś V1.3 D1–5.8.9.12 T3 देवानामपि दर्पहा; Ñ B1.3.4 वृद्धो वै रजनीचरः; T4 देवदानवदर्पहा. —After 23, D6 T1.2 G3 M1.3–6 ins.:

502* जनन्या भगिनी ज्येष्ठा नाम्ना पुष्पोत्कटा स्मृता ।

[D6 मता (for स्मृता).]

24 Note hiatus between ^{a} and ^{b}. —^{a}) D6.7.10.11 T3.4 M3.5.6.10 Cg पिता; G3 M2.4.9 मातुर्; M8 मातृ- (for पितुर्). M5 भगिन्याश्; Cg as in text (for जनन्याश्). D6.7.10.11 T3.4 M6.10 नो (for च). T2 मातुर्ज्येष्ठा पितुस्त्वश्च (sic); M1 मातुर्ज्यैष्ठभगिन्याश्च. —^{b}) D6.7.10.11 T3.4 G1 M3.6.9.10 (all to avoid hiatus) ह्या(G1 सो)स्माकं च (G1 M3.6.9 तु) (for अस्माकं तु). M6 भवेत् (for ऽभवत्). T4 स आर्यकः (for [आ]र्यकोऽभवत्). ❀ Ct: आर्यको मातामहः. ❀ —For 24^{ab}, Ś Ñ1 V1.3 D1–5.8.9.12 subst.:

503* सुमालिनः स्वसा ज्येष्ठा अस्माकं तु स आर्यकः ।

[Note hiatus between the two halves. D8 स्वमालिनः. D1.3–5.9 स तु(D4 सुतो; D5 सुत) ज्ये(D1 श्रे)ष्ठो (for स्वसा ज्येष्ठा). V3 सुमाली च ततो ज्येष्ठ (for the prior

Arya Research Team

मातृष्वसुरथास्माकं सा कन्या चानलोद्भवा ।
भवत्यस्माकमेषा वै भ्रातॄणां धर्मतः स्वसा ॥ २५
सा हता मधुना राजन्राक्षसेन बलीयसा ।
यज्ञप्रवृत्ते पुत्रे ते मयि चान्तर्जलोषिते ॥ २६

निहत्य राक्षसश्रेष्ठानमात्यांस्तव संमतान् ।
धर्षयित्वा हता राजन्सुप्ता ह्यन्तःपुरे तव ॥ २७
श्रुत्वा त्वेतन्महाराज क्षान्तमेव हतो न सः ।
यस्मादवश्यं दातव्या कन्या भर्त्रे हि दातृभिः ।
अस्मिन्नेवाभिसंप्राप्तं लोके विदितमस्तु ते ॥ २८

G. 7. 33. 29
B 7. 25. 29
L. 7 31. 30

half). D9 (to avoid hiatus) त्वस्माकं (for अस्माकं). V3 स च; D1.3.4 च स; D5 स तु (by transp.) (for तु स).]; while Ñ2 B1.3.4 subst.:

504* ज्येष्ठतातो जनन्या हि योऽसावस्माकमार्यकः ।

—c) B4 यस्य (for तस्य). D5 -नामा (for नाम).

25 G2 repeats erroneously 25^{ab} after 25. —a) D6.11 मातृस्वसुर्; M10 मातृष्वसु- (for मातृष्वसुर्). T2 G2 M1.3.9 अथो; G1 अतो; M7.10 सुता (for अथ). —b) D6.7.10.11 T4 transp. कन्या and च. M6 कन्या पुष्पोत्कटोद्भवा. —D6 reads 25c–26 in marg. —c) D3.5 M6 अपि हि; D6.7.10.11 G3 एवैषा; T1.2 M1 एवै(M1 °ते)षां; G1 M3–5.7 एषा हि (for एषा वै). —d) D3.5 सर्वेषां (for भ्रातॄणां). M6 स्वयं (for स्वसा). ❀ Cv: अनलोद्भवेति अनलेत्यस्याः कुम्भीनस्या माता। द्वे कुम्भीनस्यौ माल्यवतो दौहित्री च माल्यवतो दुहिता च।; Cg: अनलोद्भवा अनला माल्यवतः सुता तस्याः कन्या कुम्भीनसीत्यर्थः। अस्मन्मातामहस्य सुमालिनः द्वे पुत्र्यौ प्रसिद्धे। पुष्पोत्कचा कैकसी चेति। तयोर्ज्येष्ठः पिता माल्यवान्। तस्य पुत्री अनला। तस्याः कन्या कुम्भीनसी। साऽस्माकं स्वसा। ज्येष्ठमातामहपुत्रीत्वादत एव धर्मतः स्वसेत्युक्ता।; Ck: "वेगा पुष्पोत्कटा चैव कैकसी च शुचिस्मिता। कुम्भीनसी च इत्येताः सुमालिप्रसवाः स्मृताः" इत्युक्ता अनलोद्भवा। सा च कुम्भीनसी कन्या अस्माकं मातृष्वसुर्भवति। अनलाया अस्माकं कनिष्ठमातृत्वात्। यदेवमतः अस्माकं भ्रातॄणामेषानलादुहिता कुम्भीनसी च शूर्पणखावद्धर्मतो न्यायतः स्वसा।; Ct: अस्मन्मातामहस्य सुता कैकसी, तज्ज्येष्ठा भगिनी पुष्पोत्कटा, कनिष्ठा कुम्भीनसीति पूर्वमुक्तम्। सुमालिभ्राता माल्यवानस्मन्मातुर्ज्येष्ठः पितेत्यस्माकमार्यकः सः। तस्य कन्यानला तत्कन्या कुम्भीनसी सुमाल्यपत्यभूतकुम्भीनस्या अन्या इति। सा च कुम्भीनस्यस्माकं मातृष्वसुः कन्या भवति। अनलाया अस्मत्कनिष्ठमातृत्वात्, अत एषा शूर्पणखावदनलाकन्या कुम्भीनसी धर्मतो न्यायतः स्वसा भवति. ❀ —For 25, Ś N V1.3 B1.3.4 D1.2.4.8.9.12 subst.; while D3.5 T3 subst. l. 1 only for 25^{ab}:

505* मातृष्वसा हि सास्माकं जाता पुष्पोत्कटा सुता ।
भ्रातॄणां धर्मतोऽस्माकं सा शुभा भवति स्वसा ।

[(l. 1) B1.3 G(ed.) मातुः स्व(G[ed.] ष्व)सा. Ś D3.8.12 तव; Ñ1 [अ]पि सा; V1 या सा; V3 [इ]यम्; B1 हि च (for हि सा). D1–5 T3 मातृष्वसेया सा(D2 त्व; D6 T3 चा)स्माकं (for the prior half). V3 शुभा; B1.3.4 यतः; D3 -[उ]द्भवा; T3 [अ]भवत् (for सुता). —(l. 2) Ś V1.3 D1.2.4.8.9.12 भवतो (for भ्रातॄणां). Ś V1.3 D1.2.4.8.9.12 सर्वेषां नः(V3 हि) स्वसा हि सा (V1 च सा; D1 हिता) (for the post. half).]

26 D6 reads 26 in marg. (cf. v.l. 25). —a) D5 सा हता; D6 सा स्वसा; G2 हृता च (for सा हृता). —G2 reads 27^d in place of 26^b. —b) Ś1 D12 पापेन च (D12 सु-); Ś2.3 D2.8.9 प्राणेन च; Ñ2 B1.3.4 असुरेण (for राक्षसेन). Ś Ñ V1.3 B1.3.4 D1–5.8.9.12 T4 दुरात्मना (for बलीयसा). —V3 lacuna for 26^{cd}. —c) Ś D2.7–9 M6.10 यज्ञे (for यज्ञ-). B1 -प्रवृत्तं; B3 M1.2.6–9 -प्रमत्ते; D2 पवित्रे (for -प्रवृत्ते). B1 पुत्रं (for पुत्रे). Ś1 Ñ2 V1 B1 D7.10.11 T1–3 तु; M2 मे (for ते). M5 ते पुत्रे (by transp.) (for पुत्रे ते). D12 यज्ञप्रवृत्ते पुत्रे. —d) D8 सचिव-(for मयि च). D1.4 -जलं गते (for -जलोषिते). ❀ Cg: यज्ञप्रमत्तः यज्ञेन प्रमत्तः। विस्मृतस्वगृहकृत्य इत्यर्थः। अन्तर्जलोषित इति। तपोर्थमिति शेषः।; so also Ck; Ct: यज्ञप्रवृत्ते तेन दीक्षावत्वाद्युध्दप्रवृत्तिनिवारणम्। 'यज्ञप्रमत्ते' इति पाठे यज्ञेन प्रमत्ते स्वगृहकृत्यविस्मृतिमति। अन्तर्जलोषिते। तपोर्थमिति शेषः. ❀ —After 26, D6.7.10.11 S (except M6) ins.:

506* कुम्भकर्णे महाराज निद्रामनुभवत्युत।

[D6.10.11 T3.4 G3 M4.10 कुंभकर्णो (for कुम्भकर्णे). D6 M8 -राजन् (for -राज). D6.7.10.11 [अ]थ (for [उ]त).]

27 G2 om. 27^{abc}. —a) Ś2 प्रहत्य; M3 निपात्य (for निहत्य). B3 राक्षसान् (for राक्षस-). Ś V1 D1.2.4.5.8.9.12 -श्रेष्ठ (for -श्रेष्ठान्). —b) Ś Ñ1 V1.3 D1–5.8.9.12 T3 सचिवांस् (for अमात्यांस्). D1.4 स च; D2 तत्र; D5 तस्य; D10.11 T1.2 G3 M1.3 Cg.k.t इह (for तव). Ñ2 B3.4 बलभान्; D1.4 सं(D4 तां)गतान्; D5 संभवान्; D7 सत्तमान् (for संमतान्). B1 बलभांस्तव (for तव संमतान्). —c) Ś D8.12 हतं (for हृता). Ś Ñ1 V1.3 D1–5.8.9.12 T4 तेन; K (ed.) सा तु (for राजन्). —G2 reads 27^d in place of 26^b. —d) Ñ1 D6.7.10.11 [अ]पि; V3 G2 च (for हि). D9 तदा (for तव). Ś Ñ2 V1 B1.3.4 D1–5.8.12 गु(D5 सु)संमतःपुरं तव (B1 महत्); M5 गुप्तानंतःपुरे तव.

28 a) Ñ1 क्षांतं (for श्रुत्वा). Ś D2.8.9.12 चेदं; Ñ1 V1.3 D3 M3 चै(Ñ1 V1 वै)तत्; Ñ2 B1.3.4 G1 [अ]प्येतत्;

G 7. 33. 30
B. 7. 25. 30
L 7. 31. 32

ततोऽब्रवीद्दशग्रीवः क्रुद्धः संरक्तलोचनः ।
कल्प्यतां मे रथः शीघ्रं शूराः सज्जीभवन्तु च ॥ २९

भ्राता मे कुम्भकर्णश्च ये च मुख्या निशाचराः ।
वाहनान्यधिरोहन्तु नानाप्रहरणायुधाः ॥ ३०

अद्य तं समरे हत्वा मधुं रावणनिर्भयम् ।
इन्द्रलोकं गमिष्यामि युद्धकाङ्क्षी सुहृद्वृतः ॥ ३१

ततो विजित्य त्रिदिवं वशे स्थाप्य पुरंदरम् ।
निर्वृतो विहरिष्यामि त्रैलोक्यैश्वर्यशोभितः ॥ ३२

D1.4 तस्य; D5 वेदं; D6.7.10.11 T3 M10 [अ]पि तन्; T1 M1 त्वेवं; T2 त्विमं; T4 चैतन्; M6 ह्येतन् (for त्वेतन्). Ś Ñ V1.3 B1.3.4 D1–6.8.9.12 T4 M3.6.7 मया सर्वं (Ś2.3 Ñ2 B1.4 क्षांतं; B3 ख्यातं; D6 M6.7 राजन्); M8 महाराजन् (for महाराज). —[b]) Ś2.3 om.; Ñ2 B1.3.4 पूर्वम् (for क्षान्तम्). Ś V1.3 D1–5.8.9.12 T4 तस्य; T3 मम (for एव). Ś1 D12 कृतैनसः; Ś3 D3.8 हतैनसः; D1 हतायुषः; D5 तु रक्षसः; T2 हितं स्म सः; T4 हतात्मनः; M5 हतौजसः (for हतो न सः). Ñ1 तस्य रक्षो दुरात्मनः; G2 तमेवं हितो न संशयः (sic). —[c]) G2 स्ववश्यं. T4 तस्मादेतस्य दातव्या. —[d]) M5 transp. कन्या and भर्त्रे. B1 च; G2 [ऽ]ति-; M5.8 [ऽ]भि- (for हि). B1 बंधुभिः; D7.10.11 M6.7 Cg.k.t भ्रातृभिः (for दातृभिः). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 सेयं धर्मेण वै हृता (D2 कृता; T4 स्वसा); Ñ2 B3.4 कन्यान्यस्मै स्व (Ñ2 सु) बंधुभिः. ❀ Cg: भ्रातृभिरस्माभिरित्यर्थः ।; Ck: भ्रातृभिरिति गुरुवैपम्यमार्षम् । भ्रातृभिरस्माभिरित्यर्थः । ; Ct: भ्रातृभिरिति गुरुपरम् . ❀ —After 28[cd], Ñ B1.3.4 D6.7.10.11 S (except T4) ins.:

507* तदेतत्कर्मणो ह्यस्य फलं पापस्य दुर्मतेः ।

[T3 तव तत्-; Cg.k.t as above (for तदेतत्). B4 damaged for कर्मणो ह्य. Ñ B1.3 तस्य (for ह्यस्य). D6.7 T2.3 G1.2 M5–8 दुर्मते (for दुर्मतेः). Ñ B1.3.4 पापस्य फलमागतं (for the post. half).]

—[e]) B4 D5 तस्मिन्. Ñ2 B1.3.4 तु; M5 हि (for [अ]भि-). Ś Ñ1 V1.3 D1–5.8.9.12 T4 -संप्राप्ते (for -संप्राप्तं). —[f]) Ñ1 V3 D1.3–5 T3.4 काले; Cg.k.t as in text (for लोके). G2 आशु (for अस्तु). Ś D3.12 व; ; D2 च; D11 मे (for ते). —After 28, Ś Ñ V1.3 B3 D1–5.7–12 T3.4 ins.:

508* विभीषणवचः श्रुत्वा राक्षसेन्द्रः स रावणः ।
दौरात्म्येनात्मनोद्भूतस्तप्ताम्भा इव सागरः ।

[(l. 1) D3r eads from श्रुत्वा up to 29[b] in marg. Ñ2 B3 प्रतापवान् (for स रावणः). —(l. 2) Ś2.3 D3 धूर्तस् (for [उ]द्धतस्). Ñ2 D9 दौरात्म्यत्वा (D9 °त्म्याद्वा)युनोद्भूतस्; B3 वारिणा वारिणोद्भूतस् (for the prior half). Ś D2.8.9.12 तपांतेने (Ś D8.12 °नै)व; Ñ1 V1.3 तपांते इव; B3 तटांत इव; D3 तप्तांत इव; L (ed.) तपोंतेनेव (for तप्ताम्भा इव). D1.4 तपन्निव दिवाकरः; D5 तपांते सागरो यथा (for the post. half).]

29 D3 reads 29[ab] in marg. (cf. v.l. 28). —[a]) D1.4 [ऽ]वदद् (for ऽब्रवीद्). —[b]) Ś D1.2.4.5.8.9.12 क्रोधात्; D3 T3.4 क्रोध- (for क्रुद्धः). —[c]) T3.4 वै (for मे). Ś Ñ1 V1.3 D2.3.5.8.9.12 संकल्प्य (D2.5 °ल्प; D3 °ल्प्यं)तां; D1.4 स कल्पतां; D6.7 कल्पतां मे (for कल्प्यतां मे). D2.9 M5.7 रथं; D3 रथाः. G2 रथश्रेष्ठः (for रथः शीघ्रं). —[d]) B3.4 योधाः (for शूराः). T1.2 सज्जा (for सज्जी-). Ś Ñ2 B1.4 D2.3.5–12 T2 M6 नः; Ñ1 वै; B3 मे; T1 G1.3 M3 [इ]ह (for च). —After 29, Ś2.3 Ñ1 V1.3 D1–5.8.9.12 T3.4 ins. :

509* वर्मभिश्चित्रसंनाहैः प्राव्रियन्तां गजोत्तमाः ।

[Ś2.3 D8 वर्मभिश्; Ñ1 बद्धैः सु-; D3 चर्मभिश् (for वर्मभिश्). Ś2.3 Ñ1 V1.3 T3.4 -संनाहैः (for -संनाहैः). D1.4 संनद्धाश्चित्रसंनाहाः (for the prior half). Ś2.3 D8 व्याव्रियंतां; D1.4 आव्रियंतां (for प्राव्रियन्तां).]

30 [a]) Ś V1.3 D2.3.8.12 पुत्रो मे; Ñ1 D1.4 पुत्रा मे; Ñ2 B1.3.4 D5 इंद्रजित् (for भ्राता मे). V3 तु (for च). —[b]) M1.2.9 ते (for ये). G2 दुःखा (for मुख्या). Ś D2.5.8.9.12 मुख्या ये वै; Ñ1 V1.3 D3 T3.4 मुख्या ये च (by transp.) (for ये च मुख्या). —[cd]) Ś V1.3 D2.3.5.8.9.12 T3.6 [अ]व (V1 D3 T3.4 [अ]धि)रुह्याशु; Ñ1 D1.4 [अ]भिरुह्याशु (for [अ]धिरोहन्तु). M5 -प्रहरणैर्युताः; M6 °णोद्यताः (for -प्रहरणायुधाः). Ś Ñ1 V1 D1–5.8.9.12 T3.4 निर्यात्वेते (Ñ1 V1 T3.4 °त्विह; D1 °तु ते; D3 °त्वद्य; D9 °त्विमे) ममाज्ञया; V3 निर्गच्छंतु ममाज्ञया (for [d]). Ñ2 B1.3.4 नानाप्रहरणाः सर्वे वाहनेष्वधिरोहत (B3 °हिताः).

31 [a]) D1.4 M6 [अ]हं (for तं). D5 अयुतं; T2 पश्यतः (for अद्य तं). —[b]) D8 om. मधुं. V1 राक्षस-; D9 सर्वत्र (for रावण-). ❀ Cg: रावणान्निर्भयो रावणनिर्भयः तम् । ; so also Ck.t. ❀ —[c]) D6.7.10.11 M6.10 सुरलोकं. —D4.6 om. (hapl.) 31[d] – 32[c]. —[d]) Ś Ñ V1.3 B1.3.4 D2.3.5.7–12 T1.2 M6 युद्धाकांक्षी. ❀

32 D4.6 om. 32[a-c] (cf. v.l. 31). D7.10.11 om. 32. K (ed.) reads 32 within brackets. —[a]) D2 विचिंत्य; G (ed.) निर्जित्य (for विजित्य). V3 त्रिदशान् (for त्रिदिवं). —[b]) B1.3 वशं (for वशे). Ñ1 B1.3 कृत्वा; Ñ2 B4 कृत्य (for स्थाप्य). Ś V1.3 D1–3.5.8.9.12 T3 स्था (D12 प्रा)प्य चें (V3 आस्थाप्ये)दं बलाद्वशे; T4 स्थाप्य चेंदं बलान्वितः. —[c]) Ś Ñ V1.3 B1.3.4 D1–3.5.8.9.12 T3.4 M2.3.7.8 निर्वृ (Ñ1 M8 °र्वृ)तो; K (ed.) निर्भयो (for निर्वृतो). Ñ2 V1 B1.3.4 T2 विचरिष्यामि. —[d]) V3 -वर- (for -[ऐ]श्वर्य-).

अक्षौहिणीसहस्राणि चत्वार्युग्राणि रक्षसाम् ।
नानाप्रहरणान्याशु निर्ययुर्युद्धकाङ्क्षिणाम् ॥ ३३
इन्द्रजिच्चाग्रतः सैन्यं सैनिकान्परिगृह्य च ।
रावणो मध्यतः शूरः कुम्भकर्णश्च पृष्ठतः ॥ ३४
विभीषणस्तु धर्मात्मा लङ्कायां धर्ममाचरत् ।
ते तु सर्वे महाभागा ययुर्मधुपुरं प्रति ॥ ३५
रथैर्नागैः खरैरुष्ट्रैर्हयैर्दीप्तैर्महोरगैः ।
राक्षसाः प्रययुः सर्वे कृत्वाकाशं निरन्तरम् ॥ ३६
दैत्याश्च शतशस्तत्र कृतवैराः सुरैः सह ।
रावणं प्रेक्ष्य गच्छन्तमन्वगच्छन्त पृष्ठतः ॥ ३७
स तु गत्वा मधुपुरं प्रविश्य च दशाननः ।
न ददर्श मधुं तत्र भगिनीं तत्र दृष्टवान् ॥ ३८
सा ब्रह्मा प्राञ्जलिर्भूत्वा शिरसा पादयोर्गता ।
तस्य राक्षसराजस्य त्रस्ता कुम्भीनसी स्वसा ॥ ३९

G. 7. 33. 40
B. 7. 25. 39
L. 7. 31. 42

Ś Ñ V1.3 B1.3.4 D2.3.5.8.9.12 T3 -दर्पितः; D1.4 -गर्वितः; D6 M10 -मोहितः (for -क्षोभितः). T4 त्रैलोक्याश्चर्यदर्पितः.

33 M8 om. 33–34. —[a]) D1.4.6.10.12 T2–4 G2 M1.2.4.5.7.9 अक्षोहिणी-(T3 °णि-) (sic); G1 अक्षोहिण्यां (sic) (for अक्षौहिणी-). G3 अक्षोहिणी च सहसा —[b]) D5.7 G2 M2.5.9 [अ]ग्राणि; D6 [अ]न्यानि; D10.11 Ct [अ]ग्र्याणि (for [उ]ग्राणि). Ś D1–4.8.9.12 दश तस्य तु (D8 सु) रक्षसः (Ś D8 राक्षसाः); Ñ B1.3.4 तत्र चत्वारि रक्षसां (Ñ राक्षसाः); V1.3 T3 राक्षसानां महात्मनां. —[c]) Ś Ñ1 V1.3 D1.2.4.8.9.12 नानाप्रहरणा हृष्टा (D8 om.); Ñ2 नानायुधाः प्रहृष्टाश्च; B1.3.4 नानायुधानां हृष्टानि (B4 दीप्तानां). —[d]) B4 प्रययुर्. Ś Ñ V1.3 D1–6.8.9.12 T1.2 G1.2 M1.6.7.9 -कांक्षिणः (for -काङ्क्षिणाम्).

34 M8 om. 34 (cf. v.l. 33). —[a]) G1 मेघनादो (for इन्द्रजित्तु). D6.7.10.11 T4 M10 Ct सैन्यात् (for सैन्यं). —[b]) M6 जगाम प्रहर्षं महत् (unmetric). —For 34[ab], Ś Ñ1 V1 D1–5.8.9.12 T3 subst.:

510* इन्द्रजिच्चाग्रतस्तस्य रक्षःसैन्यस्य सोऽभ्ययात् ।

[Ñ1 V1 D1–5.9 तु (for च). T3 इंद्रजेता (for इन्द्रजिच्च). D1 सोभवत्; D3.5 सोभ्यगात्; D9 चाभ्यधात् (for सोऽभ्ययात्).];
while Ñ2 V3 B1.3.4 subst.:

511* मेघनादस्तु सेनाग्रे सैनिकः प्रययौ तदा ।

[B3 सेनाग्रः; B4 संग्रामे (for सेनाग्रे). V3 सरथः सैन्यसंयुतः (for the post. half).]

—[c]) Ś Ñ V1.3 B1.3.4 D1–5.8.9.12 T3 पृष्ठतो वीरः; M6 मध्यगः शूरः (for मध्यतः शूरः). D6.7.10.11 T4 M10 जगाम रावणो मध्ये. —[d]) D3 T3 G2 M1.10 तु (for च). Ś D2.5.8.9.12 वीर्यवान्; Ñ V1.3 D1.3.4 T3 मध्यतः; B1.3.4 राक्षसः (for पृष्ठतः).

35 [ab]) Ñ2 B4 D6.8 (before corr.).10.11 च (for तु). Ñ2 D5 transp. धर्मात्मा and लङ्कायां. Ñ2 संस्थितो हि सः; V3 D1.2.4–6.9.10 T3.4 G3 M3–10 Ct धर्ममाचरन् (for धर्ममाचरत्). B1.3.4 धर्ममेव समाचरत् (for [b]). ❀ Ct: लङ्कायां धर्ममाचरन् । तत्रैव स्थित इत्यर्थः. ❀ —G1 transp. 35[cd] and 36[ab]. —[c]) B1 ये तु; D6.7.10.11 M6.10 शेषाः (for ते तु). Ñ2 B1.3 महावेगाः; M1 °वीरा (for महाभागा). —[d]) B1.3.4 गता (for ययुर्). B1.3 मधुवनं; M4.7 °पुरीं (for मधुपुरं). —For 35[cd], Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 subst.:

512* शेषा राक्षसशार्दूला गताः सुरपुरं प्रति ।

[Ś D2.8.9.12 एते; D9 रोषात् (for शेषा). Ñ1 D3.5 T3.4 मधुपुरं (Ñ1 °वनं) (for सुरपुरं).]

36 G1 transp. 35[cd] and 36[ab]. —[ab]) Ñ2 B1.3.4 transp. खरैर् and हयैर्. G1 भीमैर्; G3 उग्रैर् (for दीप्तैर्). G2 दीप्तैरन्यैर् (for हयैर्दीप्तैर्). Ś2.3 मनोरथैः (for महोरगैः). Ñ2 B1.3.4 चैव महारथैः (B3 °जवैः) (for दीप्तैर्महोरगैः). —For 36[ab], D1.6–8.10.11 M10 subst.:

513* खरैरुष्ट्रैर्हयैर्दीप्तैः शिशुमारैर्महोरगैः ।

[D1 हृष्टैर् (for उष्ट्रैर्). D7 द्वीपैः; (for दीप्तैः). D1.8 om.; M10 शिशुमारैर् (for शिशुमारैर्).]

—[c]) Ś Ñ V1.3 B1.4 D1–5.8.9.12 T3.4 निर्ययुः; B3 निर्गताः (for प्रययुः).

37 [a]) Ñ2 B1.3.4 बहवस् (for शतशस्). —[b]) Ś Ñ1 V1.3 D1–5.8.9.12 बद्ध- (for कृत-). V3 corrupt; D6.7.10.11 T4 M10 च दैवतैः (for सुरैः सह). —[c]) Ñ2 G1 वीक्ष्य (for प्रेक्ष्य). —[d]) D7.10.11 अन्वगच्छन्हि; G2 अनुगच्छंति; M3 °गच्छंस्तु (for अन्वगच्छन्त). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 पृष्ठतोनुयु (V3 °तो निर्य)युस्तु (D1.3.4 T3.4 °र्मु)दा; Ñ2 B1.3.4 ते चा (Ñ2 ये चा; B4 तं ते)प्यनुसमीयिरे; M6 पृष्ठतः सहसैनिकाः.

38 [a]) V3 च (for तु). D3 transp. तु and गत्वा. D5 M4–7 -पुरीं (for -पुरं). —[b]) M8 तु (for च). D1.4 प्रविवेश (for प्रविश्य च). —[cd]) Ñ2 B1.3.4 G (ed.) [अ]पश्यत्तं (G [ed.] °त्तु) (for ददर्श). M1 ददर्श मधुरं तत्र (sic) (for [c]). Ñ2 illeg. for [d]. B1.4 एव चैक्षत; B3 तामवैक्षत; G2 दृष्टवांस्तदा (for तत्र दृष्टवान्). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 अ (D1.4 सो)पश्यद्भगिनीं तत्र मधुं तत्र न दृष्टवान्.

39 [a]) Ś V1.3 D2.3.5.8.9.12 T3.4 भ्रातुः सा; Ñ1 ब्रह्मा सा (by transp.); B1 साप्युक्ता; M3 सा तदा (for सा ब्रह्मा).

G. 7. 33. 41
B. 7. 25. 40
L. 7. 31. 43

तां समुत्थापयामास न भेतव्यमिति ब्रुवन् ।
रावणो राक्षसश्रेष्ठः किं चापि करवाणि ते ॥ ४०
साब्रवीद्यदि मे राजन्प्रसन्नस्त्वं महाबल ।
भर्तारं न ममेहाद्य हन्तुमर्हसि मानद ॥ ४१
सत्यवाग्भव राजेन्द्र मामवेक्षस्व याचतीम् ।
त्वया ह्युक्तं महाबाहो न भेतव्यमिति स्वयम् ॥ ४२

रावणस्त्वब्रवीद्धृष्टः स्वसारं तत्र संस्थिताम् ।
क्व चासौ तव भर्ता वै मम शीघ्रं निवेद्यताम् ॥ ४३
सह तेन गमिष्यामि सुरलोकं जयाय वै ।
तव कारुण्यसौहार्दान्निवृत्तोऽस्मि मधोर्वधात् ॥ ४४
इत्युक्ता सा प्रसुप्तं तं समुत्थाप्य निशाचरम् ।
अब्रवीत्संप्रहृष्टेव राक्षसी सुविपश्चितम् ॥ ४५

Ñ2 B3 D6.7.10.11 M5.10 सा च(M5 तु) प्रह्वां(B3 प्रबद्धां)-जलिर्भूत्वा; D1.4 भ्रातुः प्रांजलि सा भूत्वा (metri causa). ❀ Ct : प्रह्वाञ्जलिः कृतनम्रत्वचिह्नाञ्जलिः . ❀ —^{b}) D6.7.10.11 M6 चरणौ (for पादयोर्). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 transp. शिरसा and पादयोर्. —^{c}) V3 तत्र; D1.4 यस्य (for तस्य). —^{d}) Ś Ñ1 V1 D1–5.8.9.12 T3.4 भयात्; V3 तदा; M1 प्रह्वा; M5 तस्थौ (for न्यस्ता). Ś Ñ1 V3 D1.2.4.5. 8.9.12 T3.4 शुभा; Ñ2 B1.3.4 D6.7.10.11 तदा; V1 D3 सुता (for स्वसा).

40 ^{a}) Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 स ताम् ; M1 तासाम् (sic) (for तां सम्-). M8 सा तमुत्पातयामास (sic). —^{b}) V1 om. (hapl.) from ब्रुवन् up to इति in 42^{d}. D3 ब्रुवं (for ब्रुवन्). ❀ Cv : न भेतव्यमिति ब्रुवन्नित्यत्र इतिशब्दः किं चापि करवाणि त इत्यत्र संनिवेश्यः . ❀ —^{c}) Ś D12 उवाच (for रावणो). D1 T3 राक्षसः (for राक्षस-). V3 राक्षसो रावणस्तत्र. —^{d}) Ś V3 D1–5.8.9.12 T3.4 किं ददामि तवेप्सितं; Ñ1 किं ददामीति चाब्रवीत् ; Ñ2 B1.3.4 किं च ते करवाण्यहं; M6 किं च ते क्रियतामिति; G (ed.) किं च वै ते करोम्यहं.

41 V1 om. 41 (cf. v.l. 40). —^{a}) Ñ1 दार्श्य; B4 देव (for राजन्). —^{b}) Ś Ñ1 V3 D1.2.4.5.8.9.12 T3.4 [s]सि; D3 हि (for त्वं). Ñ2 B1.3.4 दशानन; D1–3.8.12 T3 महाबलः(T3 °लं); D6.7.10.11 G3 °भुज (for महाबल). —^{cd}) Ñ1 हि; D9 T3 तु; T1.2 तं; T4 च; M3 मे (for न). D7 transp. न and मम. Ñ1 D1.3–5.9 T1.3.4 M3 मधुं मह्यं (Ñ1 मेद्य; T1 M3 नाद्य) ; T2 म** *द्य (damaged) ; M10 च मेहाद्य (for ममेहाद्य). M6 हर्तुम् (for हन्तुम्). G2 इच्छसि (for अर्हसि). D1.3–5 [अ]रिंदम (for मानद). Ñ1 T3 न त्वं हंतुमिहार्हसि; D9 नैव हंतुं त्वमर्हसि; T4 हंतुं नार्हस्यरिंदम (for ^{d}). Ś D2.8.12 भर्तारं मधुरं मह्यं(D12 मधुरेषोद्य) न हंतव्यम- (Ś1 °व्यो ह्य)रिंदम (sic); L (ed.) भर्ता मे मधुरेषोद्य न हंतव्यो ह्यरिंदम. —After 41, D3.6.7. 10.11 S (G3 damaged) ins. :

514* न हीदृशं भयं किंचित्कुलस्त्रीणामिहोच्यते ।
भयानामपि सर्वेषां वैधव्यं व्यसनं महत् ।

[(l. 1) T3 मानं (for कुल-). G1 न विद्यते (sic) (for इहोच्यते). ❀ Cg : ईदृशं भयं भर्तृवधसंभवं भयमित्यर्थः । ; so also Ck.t. ❀ —(l. 2) M6 सर्वासां (for सर्वेषां). D3 भयांतमिति सर्वस्वं (for the prior half). T3 G2 M6 वैधव्य- (for वैधव्यं). D3 G1 तथा; D6.7 T3.4 G2 M1.2.4–10 यथा (for महत्).]

42 V1 om. up to इति in 42^{d} (cf. v.l. 40). —^{a}) G2 सत्यभाग्. Ś2 moth-eaten for ग्भव राजेन्द्र. ❀ Cg.k : सत्यवाग्भवेति । न भेतव्यमिति वचनं सत्यं कुर्वित्यर्थः. ❀ —^{b}) D2 ममैवेक्षस्व; D4 मामेवेक्षस्व; D5 °क्ष च (for मामवेक्षस्व). Ñ2 B1.3.4 याचमानामवेक्ष(B4 °क्ष्य) मां; V3 मामवेक्ष प्रजावतीं. —^{c}) Ñ1 V3 D6.7.10.11 T3.4 G2 M2.4–10 [अ]प्युक्तं; Ñ2 B1.3.4 [उ]क्तास्मि (for ह्युक्तं). Ś1 V3 D1.3–7.9–12 T1.3.4 M10 महाराज; Ś2.3 Ñ1 D2.8 °राजन्; G2 °भाग (for महाबाहो). —^{d}) B1 प्रभो (for स्वयम्).

43 ^{a}) B1.3.4 [s]थ; D9 च (for तु). Ś Ñ2 V1.3 D1–5.8.9.12 T3.4 वाक्यं (for हृष्टः). —^{b}) B1.3.4 अभितः (for तत्र सं-). B4 स्थितः (for -स्थिताम्). Ś Ñ V1.3 D1–5.8.9.12 T3.4 ततः(Ś3 D8 कुतः) कुंभी(D2 °भ)नसीं बली (Ñ1 V3 स्थितां). —^{c}) M1 [अ]सौ (for वै). —^{d}) M8 अवेद्यतां. —For 43^{cd}, Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 subst. :

515* क्व गतो राक्षसेन्द्रोऽसौ तव कान्तो निवेद्यताम् ।

[Ś2 moth-eaten from सेन्द्रो up to कान्तो. Ś1.3 D8 वै (for सौ). Ñ1 [s]स्ति राक्षसश्रेष्ठस् (hypm.) (for राक्षसेन्द्रोऽसौ). Ñ1 V1.3 D1.3.4 T3.4 भर्ता (for कान्तो). Ś2 D8 निबोध्यतां (for निवेद्यताम्).];
while Ñ2 B1.3.4 subst. :

516* क्व ते भर्ता गतो भद्रे तन्मे शीघ्रं निवेदय ।

[B3 त्वं; B4 तं (for तन्). Ñ2 निवेद्यतां.]

44 ^{ab}) D12 प्रयास्यामि; M6 हि यास्यामि (for गमिष्यामि). G2 देव- (for सुर-). D7 T1–3 M3.7.9 -लोक- (for -लोकं). G1 transp. सह तेन and सुरलोकं. D6.7.10.11 T1.2 G2.3 M2–5.7–10 हि (for वै). K (ed.) जयावहे (for जयाय वै). Ñ2 B1.3.4 तेन सार्धं प्रयास्यामि सुराणां विजयाय वै. —^{c}) Ś3 D2.5.8.9 -मोहात्मा(D5 °च) (for -सौहार्दान्). —^{d}) G3 [s]हं (for ऽस्मि). V3 ह्यवधारय (for ऽस्मि मधोर्वधात्). —After 44, V3 ins. :

517* भगिन्याश्च ममत्वं हि जायतेऽतीव सौहृदात् ।

45 ^{ab}) D6.7 समुत्थाय (for प्रसुप्तं तं). Ś Ñ1 D1–5.

एष प्राप्तो दशग्रीवो मम भ्राता निशाचरः ।
सुरलोकजयाकाङ्क्षी साहाय्ये त्वां वृणोति च ॥ ४६
तदस्य त्वं सहायार्थं सबन्धुर्गच्छ राक्षस ।
स्निग्धस्य भजमानस्य युक्तमर्थाय कल्पितुम् ॥ ४७
तस्यास्तद्वचनं श्रुत्वा तथेत्याह मधुर्वचः ।
ददर्श राक्षसश्रेष्ठं यथान्यायमुपेत्य सः ॥ ४८

पूजयामास धर्मेण रावणं राक्षसाधिपम् ।
प्राप्तपूजो दशग्रीवो मधुवेश्मनि वीर्यवान् ।
तत्र चैकां निशामुष्य गमनायोपचक्रमे ॥ ४९

ततः कैलासमासाद्य शैलं वैश्रवणालयम् ।
राक्षसेन्द्रो महेन्द्राभः सेनामुपनिवेशयत् ॥ ५०

G. 7. 33. 51
B. 7. 25. 52
L. 7. 31. 53

इति श्रीरामायणे उत्तरकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

8.9.12 शयानं (D_5 शायिनं) शयने तं तु ($\tilde{N}_1$ शूरं; $D_{1.3.4}$ तत्र); $\tilde{N}_2$ $V_{1.3}$ T_3 ततः शयानं शयने; $B_{1.3.4}$ शयने तं प्रसुप्तं तु (B_1 °प्तस्य) (for ^{a}). $\acute{S}_{1.3}$ V_3 $D_{1.4.8}$ समुत्थाय; $\acute{S}_2$ moth-eaten; $D_{6.7}$ प्रसुप्तं तं (for समुत्थाप्य). $D_{10.11}$ T_4 M_{10} transp. प्रसुप्तं तं and समुत्थाप्य. $\tilde{N}_2$ $B_{1.3.4}$ तदासुरः; M_8 निशाचरी (for निशाचरम्). —^{c}) Ś $\tilde{N}_1$ $V_{1.3}$ $D_{1-5.8.9.12}$ T_3 सा (for सं-). $\tilde{N}_2$ $B_{1.3.4}$ सा; G_1 $M_{2.3.5}$ Ck [ए]व (for [इ]व). V_3 -हृष्टेन; $D_{1.3.4}$ T_3 -हर्षेण (for -हृष्टेव). —^{d}) Ś $V_{1.3}$ $D_{1-5.8.9.12}$ T_2 सु($D_{1.4}$ च)विपश्चिता; $\tilde{N}_2$ $B_{1.3.4}$ °चक्षणाः; $D_{7.10.11}$ T_4 $M_{6.10}$ सा(M_{10} स्व-) पतिं (M_6 मुदिता) वचः; M_8 स्वपतिं तदा; Ck as in text (for सुविपश्चितम्). $\tilde{N}_1$ राक्षसेंद्रं पतिं वचः.

46 ^{b}) $\tilde{N}_1$ भर्ता; D_8 धाता (for भ्राता). $\tilde{N}_2$ $B_{3.4}$ M_6 भ्राता मम (by transp.); B_1 मेहं मम (for मम भ्राता). $D_{6.7.10.11}$ $M_{6.10}$ महाबलः; G_2 दशाननः (for निशाचरः). —^{c}) Ś $\tilde{N}_2$ $V_{1.3}$ $B_{1.3.4}$ $D_{1-5.8.9.12}$ $T_{3.4}$ देव- (for सुर-). —^{d}) Ś $\tilde{N}$ $V_{1.3}$ $B_{1.3.4}$ $D_{1.3.4}$ सहायं; $D_{9.12}$ $T_{3.4}$ G_1 $M_{5.7}$ साहायं (for साहाय्ये). Ś $\tilde{N}_1$ $V_{1.3}$ $D_{1-5.8.9.12}$ T_3 सः; $\tilde{N}_2$ $B_{1.3.4}$ हि; M_6 वै (for च).

47 ^{a}) $\tilde{N}$ $V_{1.3}$ D_9 T_3 तस्य त्वं हि($\tilde{N}_2$ तु) (for तदस्य त्वं). Ś $D_{2.12}$ सहार्थे(D_{12} °र्थे)न; V_3 D_5 महाकार्ये (D_5 °र्थं); $D_{1.4.8}$ T_3 सहायार्थे(D_4 °यार्थो; D_8 °येर्थेन [hypm.]) (for सहायार्थं). —^{b}) G_2 स्व- (for स-). M_{10} सहंघोर्. G_2 राक्षसः; M_8 राक्षसं (for राक्षस). Ś $\tilde{N}$ $V_{1.3}$ $B_{1.3.4}$ $D_{1-5.8.9.12}$ रक्षः संबंधिनो व्रज. —$D_{1.4}$ om. 47^{cd}. —^{c}) V_3 स्निग्धं सं-; $T_{1.2}$ स्निग्धत्वं (for स्निग्धस्य). T_3 याचमानस्य (for भजमानस्य). G_1 राक्षसस्य सहायार्थं. —^{d}) D_5 गच्छ युद्धाय; G_2 M_1 युद्धमर्थाय; M_5 युक्तमास्थाय; Ck.t as in text (for युक्तमर्थाय). Ś $D_{2.5.8.9.12}$ रक्षितुं; T_4 कल्पितं (for कल्पितुम्). ❀ Ck : अर्थाय प्रयोजनाय साहाय्यं कल्पितुं संपादयितुं युक्तम् ।; so also Ct. ❀

48 ^{a}) T_3 तु (for तद्). Ś $V_{1.3}$ $D_{1-5.8.9.12}$ T_3 पत्न्यास्तु($V_{1.3}$ °श्च; $D_{1.4}$ °श्रु) (for तस्यास्तद्). $D_{1.4}$ श्रुत्वा (for श्रुत्वा). —^{b}) $\tilde{N}_2$ V_3 $B_{1.3.4}$ स(V_3 च) तां मधुः (for मधुर्वचः). Ś $\tilde{N}_1$ V_1 $D_{1-5.8.9.12}$ T_3 तथेत्युक्त्वा मधुस्तदा (D_8 T_3 °था). —$B_{1.3}$ om. 48^c–49^d. —^{d}) G_1 च (for सः). —For 48^{cd}, Ś $\tilde{N}$ $V_{1.3}$ B_4 $D_{1-5.8.9.12}$ T_3 M_6 subst. :

518* दृष्ट्वा स रावणं तत्र समेत्य च यथा वयः ।

[M_6 ततः (for दृष्ट्वा). $\tilde{N}_2$ V_1 B_4 $D_{1.3.4}$ T_3 च; V_3 तु (for स). M_6 दृश्य (for तत्र). T_3 रावणस्तस्या (sic) (for रावणं तत्र). Ś $D_{2.8.9.12}$ संमान्य; V_3 संमंत्र्य (for समेत्य). $\tilde{N}_2$ B_4 D_5 यथाविधि (for यथा वयः). T_3 यथान्याय्यं समेत्य सः (for the post. half).]

49 $B_{1.3}$ om. 49^a–^{d} (cf. v.l. 48). —^{b}) $M_{4.7}$ -[ई]श्वरं; M_6 -[उ]त्तमं; (for -[अ]धिपम्). Ś $\tilde{N}$ $V_{1.3}$ B_4 $D_{1-5.8.9.12}$ राक्षसं राक्षत(B_4 दानव)र्षभः. —^{c}) $\acute{S}_{1.2}$ $\tilde{N}_2$ प्राप्य वै तु; $\acute{S}_3$ $\tilde{N}_1$ $V_{1.3}$ B_4 $D_{2.5.8.9.12}$ प्राप्यैव तु; $D_{1.4}$ प्राप्यैव च; D_3 प्रेक्ष्यैव तु; $D_{6.7.10.11}$ $T_{3.4}$ $M_{6.10}$ प्राप्य पूजां (for प्राप्तपूजो). —^{d}) S $\tilde{N}$ $V_{1.3}$ B_4 $D_{1-5.8.9.12}$ मधोर्गृ (B_4 °गें)हमनु($\tilde{N}_2$ °स्तु गृहसु)त्तमं. —After 49^{cd}, $D_{6.7}$ $T_{1.2}$ G_3 $M_{3.5}$ read $7.26.1^{cd}$ for the first time, repeating it in its proper place. —^{e}) M_8 om. चैकां. $B_{1.3.4}$ उषित्वैकां निशां तत्र.

782* यदा मे स्मरणे बुद्धिं त्वं करिष्यसि राघव ।
तदाहमीप्सितं ज्ञात्वा उपस्थास्ये तवान्तिकम् ।

[(l. 1) V3 वीर (for बुद्धिं). V3 त्वं च बुद्धिं करिष्यसि (for the post. half). Ñ1 V1 D1–5.9 T4 यदा च मे त्वं स्मरणे बुद्धिं नृप करिष्यसि. —(l. 2) Note hiatus between the two halves. Ñ1 V1.3 D1–5.9 T4 उपस्थास्याम्यहं वीर (V3 भूप) (for the prior half). Ñ1 तदा त्वद्विहिते श्रितं; V1.3 D1.4 तदा तद्वि (V3 ते वि)दितेंगितः (D1.4 °तैः); D2.9 तदा त (D9 त्व)द्विहितां गतिं; D3 तदा तद्विहितेंद्रियः; D5 तदा त्वद्विहितेंगितः; T4 त्वदाज्ञाविदितेंगितः (for the post. half).]; while Ñ2 B D6.7.10.11 cont. :

783* एवमुक्तस्तदा रामः पुष्पकेण महाबलः ।
उवाच पुष्पकं दृष्ट्वा विमानं पुनरागतम् ।
यद्येवं स्वागतं तेऽस्तु विमानवर पुष्पक ।
आनुकूल्याद्धनेशस्य वृत्तदोषो न नो भवेत् ।

[(l. 1) B3 तेन (for रामः). —D6 om. l. 4. —(l. 4) B3 आत्मकूलाकुलेशस्य (sic) (for the prior half). B3 नूनं (for वृत्त-). B2.4 मे (for नो).]

10 For 10ab, Ñ2 B D7.10.11 subst. and read after 10cd; while D6 ins. after 10 :

784* पूजयित्वा महाबाहू राघवः पुष्पकं तदा ।

—c) Ñ1 V1.3 D1–5.9 लाजोत्करेण (for लाजाक्षतैश्च). Ś D8.12 धूपैश्; M1.7 गंधैश् (for पुष्पैश्). Ñ2 B D6.7.10.11 लाजैश्चैव तथा पुष्पैर्. —d) Ś D8.12 M1.7 पुष्पैश्; Ñ2 B D6.7.10.11 धूपैश् (for गन्धैश्). —T4 damaged from श्र सु up to यथा in 11a. Ś Ñ2 B1.4 D6–12 G1.3 चैत्र; B2 चापि; B3 सह; D1.3–5 बहु-; T1.2 G3 M3.10 च स- (for च सु-).

11 T4 damaged up to यथा in a (cf. v.l. 10). —a) Ñ1 V1 गच्छ त्वं (for गम्यतां). Ñ1 V1 वै; D1 ते (for च). Ñ2 B D6.7.10.11 (all except B with hiatus) गम्यतामिति चोवाच (B1.2.4 चावोचद्). —b) D10.11 G1.3 M1.3–8.10 आगच्छ (for आगच्छेस्). D12 T1.2 G2.3 त्वां (for त्वं). G1.2 M4.6.7 यथा (for यदा). D10.11 स्मरे यदा (by transp.). Ñ1 V1 D2.9 T4 आगच्छेथाः स्मृतो (T4 °तं) मया; Ñ2 V3 B1.2.4 D1.3–7 आगच्छेः संस्मृतो मया; B3 तदागच्छेः स्मृतो मया; T3 आगच्छाहं यथा स्मरे. ❀ Cg.k.t : स्मरे स्मरामि (Ck °मीति यावत्). ❀ —After 11ab, Ñ2 B D6.7.10.11 S (except T4) ins. :

785* सिद्धानां च गतौ सौम्य मा विषादेन योजय ।

[Ñ2 B1.3 D6 M4.6 गतिं; B2.4 M9 गतिः; T1 पथा (for गतौ). Ñ2 B विघातेन; D6 विघातय (for विषादेन). Ñ2 सं * तः (illeg.); B1.4 यूयुजः; B2 सस्वज; B3 पुष्पक; D6 संयते (for योजय). D7 T3 M4.9 मा विषादमवाप्नुहि (D7 °योजय [sic]) (for the post. half). ❀ Cv : ' सिद्धानां च गतौ सौम्य माविषादेन योजयेति ' सिद्धानां च गतौ मार्गे मामविषादेनाश्रमेण योजय प्रापय ।; Cg : सिद्धानां च गतौ आकाशमार्गे । आत्मानं विषादेन अस्मद्वियोगदुःखेन मा योजय । विमुक्तगत्या गतदुःखः सुप्रतिष्ठितः सुखमास्स्वेत्यर्थः ।

Arya Research Institute

एवमन्तर्हिते तस्मिन्पुष्पके विविधात्मनि ।
भरतः प्राञ्जलिर्वाक्यमुवाच रघुनन्दनम् ॥ १२
अत्यद्भुतानि दृश्यन्ते त्वयि राज्यं प्रशासति ।
अमानुषाणां सत्त्वानां व्याहृतानि मुहुर्मुहुः ॥ १३
अनामयाच्च मर्त्यानां साग्रो मासो गतो ह्ययम् ।
जीर्णानामपि सत्त्वानां मृत्युर्नायाति राघव ॥ १४
पुत्रान्नार्यः प्रसूयन्ते वपुष्मन्तश्च मानवाः ।
हर्षश्चाभ्यधिको राजञ्जनस्य पुरवासिनः ॥ १५
काले च वासवो वर्षं पातयत्यमृतोपमम् ।
वायवश्चापि वायन्ते स्पर्शवन्तः सुखप्रदाः ॥ १६

G. 7. 44. 20
B. 7. 41. 21
L. 7. 43. 19

सिद्धानां गतौ मा मामविषादेनाश्रमेण योजय प्रापयेति वार्थः ।; Ck : हे सौम्य सिद्धानां च गतौ व्योममार्गे आत्मानं विषादेन खेदेन मा योजय । विमुक्तगत्या गति(त ?) दुःखः सुप्रतिष्ठः सुखमास्स्वेत्यर्थः ।; Ct : हे सौम्य, सिद्धानां गतौ व्योममार्गे । विषादेनास्मद्वियोगदुःखेन मा योजय आत्मनमिति शेषः । सुखमास्स्वेति तात्पर्यम्. ❀

—Thereafter Ñ$_2$ D$_{6.7.10.11}$ cont., while Ś Ñ$_1$ V$_{1.3}$ D$_{1-5.8.9\ 12}$ T$_4$ ins. after 11^{ab} :

786* प्रतिघातश्च ते मा भूद्यथेष्टं गच्छतो दिशः ।

[D$_{2.9}$ T$_4$ परि- (for प्रति-). V$_3$ मा भूत्ते (by transp.); D$_{1.4}$ मा तेभूद् (by transp.); D$_{3.5}$ मा ते(D$_5$ ते मा) भूर् (for ते मा भूद्). D$_1$ अष्टौ हि; D$_{8.12}$ यथेष्टां (for यथेष्टं). Ś D$_{5.8.12}$ दिशं; V$_3$ दिवं (for दिशः).]

—^{cd}) T$_3$ G$_2$ M$_6$ विसृ(G$_2$ प्रहृ)ष्टं पुष्पकं पुनः (for ^{d}). Ś Ñ$_1$ V$_{1.3}$ D$_{1-5.8.9.12}$ एवं विस(Ñ$_1$ °नि)र्जितस्ते(V$_{1.3}$ D$_{1-5.9}$ °तं ते) न रामेणाक्लिष्टकर्मणा; Ñ$_2$ B D$_{6.7.10.11}$ एवमस्त्विति रामेण पूजयित्वा विसर्जितः(Ñ$_2$ B$_3$ D$_{6.7.10.11}$ °तं). —^{e}) Ś D$_8$ अभिप्रीतो (for °प्रेतां). Ś Ñ$_1$ V$_{1.3}$ B$_2$ D$_{1-5.8.9.12}$ पूर्वां; Ñ$_2$ B$_{1.3.4}$ D$_{6.7.10.11}$ तस्मात् ; T$_3$ M$_5$ यायात् (for प्रायात्). —^{f}) T$_3$ G$_2$ M$_{4.6}$ पुष्पकं (for पुष्पकः). T$_{1.2}$ G$_3$ M$_3$ -मोदितः; T$_3$ G$_{1.3}$ M$_{5.8.10}$ -पूजितः(T$_3$ G$_2$ °तं); T$_4$ -निर्मितः; M$_{4.6}$ -भूषितं (for -भूषितः). Ś Ñ$_1$ D$_{8.12}$ प्रयातः पुष्पकस्तथा(Ñ$_1$ °दा); Ñ$_2$ V$_{1.3}$ B D$_{1-7.9-11}$ प्रयातं(B$_1$ प्रायात्सः B$_{3.4}$ D$_{7.10.11}$ प्रायात्तत्) पुष्पकं तदा. ❀ Ct : पुष्पकं पुष्पमिव लघ्विति पुष्पकम् । संज्ञायां कन्. ❀

12 ^{a}) B$_2$ स तु गते; B$_3$ चांतर्हिते; T$_{1.2}$ अंतर्गते (for अन्तर्हिते). Ś Ñ$_1$ V$_{1.3}$ D$_{1-5.8.9.12}$ T$_4$ गते तस्मिन्विमाने तु. —^{b}) Ś Ñ$_1$ D$_{1.3.4.8.12}$ रुचिरात्मनि; Ñ$_2$ V$_1$ D$_{2.5.7.9-11}$ सु(D$_{2.9}$ तु) कृतात्मनि; V$_3$ च सुवेश्मनि; B विदितात्मनि; G$_1$ विधृतात्मनि; T$_4$ M$_{1.3.10}$ विबुधात्मनि(T$_4$ damaged from धात्मनि up to ^{c}) (for विविधात्मनि). —^{c}) Ś V$_3$ D$_{1.3-5.8.12}$ भूत्वा (for वाक्यम्). —^{d}) M$_1$ -सत्तमं (for -नन्दनम्). Ś D$_{8.12}$ रामं वचनमब्रवीत्; Ñ V$_1$ B D$_{2.6.7.9-11}$ उवाच(B$_3$ अब्रवीद्) रघुनंदनं; V$_3$ D$_{1.3-5}$ वाक्यं प्रो(V$_3$ चो)वाच राघवं.

13 ^{a}) D$_{10.11}$ Ck.t विबुधात्मनि; K (ed.) विविधात्मनि. V$_3$ भूयस्ते (for दृश्यन्ते). ❀ Cg : विविधात्मनि नानारूपे चित्र इत्यर्थः ।; Ck.t : विबुधात्मनि देवमूर्तौ. ❀ —^{b}) Ś Ñ V$_{1.3}$ B$_{1.3.4}$ D वीर (for राज्यं). —^{c}) D$_{10.11}$ T$_1$ G M$_{1.5.9.10}$ Ck.t अमानुषाणि सत्त्वानि. —V$_3$ om. (hapl.) from 13^d up to 14^c. —^{d}) Ś B$_{1.2}$ D$_{8.12}$ T$_3$ M$_1$ पुनः पुनः (for मुहुर्मुहुः). ❀ Cg : अमानुषाणां सत्त्वानां पुष्पकादीनामित्यर्थः ।; Ck : अमानुषाणि सत्त्वानीति पुष्पकादीनीत्यर्थः । व्याहृतानीति । मत्त्वर्थीयाजन्तः । व्याहारयन्ति ।; so also Ct. ❀

14 V$_3$ om. 14^{ab} (cf. v.l. 13). —^{a}) D$_9$ om. from च up to हर्ष in 15^c. Ś Ñ$_1$ V$_1$ D$_{3.5.7.8.10-12}$ T$_{1.2}$ G$_3$ M$_3$ अनामयश्च; Ñ$_2$ B D$_{1.2.4.6}$ T$_{3.4}$ G$_1$ M$_8$ अनामयानां (D$_{1.4}$ T$_{3.4}$ G$_1$ M$_8$ °श्च; D$_2$ °स्तु) (for अनामयाच्च). Ś B$_{1.3.4}$ D$_8$ सत्त्वानां; B$_2$ लोकानां (for मर्त्यानां). —B$_4$ om. (hapl.) 14^{bc}. —^{b}) B$_1$ [अ]द्य वर्तते; T$_3$ M$_6$ गत (M$_6$ °तो)व्ययः (for गतोह्ययम्). Ñ V$_1$ B$_2$ D$_{1-6}$ T$_4$ सुखं संवत्सरा ययुः; B$_3$ संगमः सोभ्यवर्तते. ❀ Cg : साग्रो मासो गत इति । अभिषेकानन्तरं साग्रो मासो गतः । तावन्मात्रेणानामयादिगुणप्रादुर्भाव इत्याश्चर्यमित्यर्थः । अनेन पुष्पकागमनं मासाभ्यन्तर एव तत्कालवृत्तान्तो भरतेन निदर्शित इत्यवगम्यते । पुनः फाल्गुनमासप्राप्तेः पूर्वमुक्तत्वात् ।; Ck : तवाभिषेकानन्तरं साग्रो ह्ययं मासो गतः । तन्मध्ये तावन्मात्रेण मर्त्यानामनामयादिगुणप्रादुर्भावः ।; Ct : साग्रो मास इति जातावेकवचनम् । मासा इत्यर्थः. ❀ —^{c}) T$_4$ damaged from सत्त्वानां up to ^{d}. G$_{1.2}$ M$_{6.7}$ मर्त्यानां (for सत्त्वानां). —^{d}) Ś B$_{1.3.4}$ D$_{8.12}$ नाभ्ये(D$_{12}$ °त्ये)ति (for नायाति). Ñ$_1$ V$_3$ D$_{1.3-5}$ नास्ति मृत्युकृतं भयं(Ñ$_1$ °भयं कृतं).

15 D$_9$ om. up to हर्ष in ^{c} (cf. v.l. 14). —^{a}) Ñ V$_{1.3}$ D$_{1-7.10.11}$ T$_4$ अरोगप्रस(V$_3$ °भ)वा नार्यो; B प्रसूयंते सुताश्चार्यो. —^{b}) Ś B$_{1.3.4}$ D$_{8.12}$ M$_6$ वपुः पुष्णं(B$_{1.3.4}$ M$_6$ °ष्यं)ति; Ñ$_2$ V$_1$ D$_{6.7.10.11}$ T$_4$ वपुष्मंतो हि(V$_1$ °तोपि); G$_{1.2}$ वसुमंतश्च (for वपुष्मन्तश्च). ❀ Cg.t : वपुष्मन्तो हृष्टपुष्टवपुर्युक्ताः ।; so also Ck. ❀ —^{c}) D$_{3.5}$ G$_2$ M$_{1.3.8}$ [अ]पि (for [अ]भि-). V$_3$ हर्षवंतस्तथा; D$_1$ ग्रहषश्चाधिको (for हर्षश्चाभ्यधिको). V$_1$ D$_2$ रामः; B$_2$ जीवन् ; D$_5$ राष्ट्रे; D$_{10}$ नूनं (for राजन्). —M$_8$ om. 15^d–17^c. —^{d}) Ś D$_{8.12}$ जातश्च पुरवासिनां; V$_3$ पौरजानपदांस्तथा. —After 15, V$_3$ reads 18^{ab}.

16 M$_8$ om. 16 (cf. v.l. 15). T$_{1.2}$ G M$_{5.6.10}$ om. 16^{ab}. —^{a}) Ś D$_{8.12}$ कालेन (for काले च). Ñ V$_{1.3}$ B D$_{1-7.9-11}$ काले वर्षति पर्जन्यः(D$_4$ ***). —^{b}) Ś D$_{8.12}$ जनयति (for पातयति). Ñ V$_1$ B D$_{1-7.9-11}$ पातयन्नमृतं पयः; V$_3$ प्रापयत्यमृतं पयः. —^{c}) Ś D$_{8.12}$ [ए]व (for [अ]पि). T$_{1.2}$ G$_3$ M$_{1.3}$ [अ]भितो वांति (for [अ]पि वायन्ते). Ñ V$_{1.3}$ B D$_{1-4.6.7.9-11}$ T$_4$ वाताश्चापि प्रवां(D$_4$

G. 7. 44. 21
B. 7. 41. 21
L. 7. 43. 20

ईदृशो नश्चिरं राजा भवत्विति नरेश्वर ।
कथयन्ति पुरे पौरा जना जनपदेषु च ॥ १७

एता वाचः सुमधुरा भरतेन समीरिताः ।
श्रुत्वा रामो मुदा युक्तः प्रमुमोद सुखी सुखम् ॥ १८

इति श्रीरामायणे उत्तरकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

Arya Research Team

°यां)त्येते(V₃ °वास्यते). —^{a}) Ñ V1.3 B1.3.4 D1–4.6.7. 9–11 T₃ स्पर्शयुक्ताः; B₂ सुखस्पर्शाः; T₂ स्पर्शयंति (for स्पर्शवन्तः). Ñ1 V₂ D₃ शिवाः सुखाः; Ñ2 V1 B1.3.4 D2.4.6.7.9–11 सुखाः शिवाः(D₄ * *); B₂ सदैव * ; D1 M₅ सुखावहाः (for सुखप्रदाः).

17 M₈ om. $17^{a\text{–}c}$ (cf. v.l. 15). T₄ damaged up to भवत्वि in ^{b}. —^{a}) B₂ यादृशो (for ईदृशो). Ñ1 V1 D1–4.9 नः सदा; D₈ निश्चितं (for नश्चिरं). G1 राजन्. —^{b}) Ñ2 V₃ B D6.7.10.11 भवेद्; T1 जीवतु (for भवतु). D₅ G1 इह (for इति). Ñ1 V₃ B1.2 D2.9–12 T₃ नरेश्वरः; B₃ नराधिपः; B₄ न संशयः; D1.3.4 नरोत्तमः (for नरेश्वर). —^{c}) D₆ कथयंतः. Ñ V1.3 D1–4.6.7.9–11 T₄ राजन् (for पौरा). —^{d}) M₄ पौर- (for जना). M2.4.9 जानपदेषु. D₅ [अ]पि (for च). Ñ V1.3 D1–4.6.7.9–11 T₄ पौर(Ñ1 D7 °रा) जानपदास्तथा(V1 °दास्तदाः T₄ °दा जनाः).

18 V₃ reads 18^{ab} after 15. —^{a}) D₃ च (for सु-). D₄ * * रा; G1 -मनसा (for -मधुरा). V₃ एताश्चान्याश्च मधुरा. —^{c}) Ś D₈ शृण्वन्; D12 तत्र (for श्रुत्वा). D₆ राजा; M1 वाचो (for रामो). —^{d}) = 1^{d}. G₃ सुखं सुखी (by transp.). Ñ V1.3 B D1–4.6.7.9–11 T₄ बभूव नृपसत्तमः. ❀ Cg: सुखी सुखमिति वक्ष्यमाणसर्गकथानुवाद-संग्रहः. ❀ —After 18, B₃ ins.:

787* संपूज्य तद्धनदविमानमादरा-
द्रघूत्तमो धनदविभूषितं तदा ।
विसृज्य चैनं तदभीष्टमार्गं
प्रतिप्रविष्टः प्रमदावनं तदा ।

Colophon : D₄ om. (cont. the sarga). —*Kāṇḍa name* : Ś1 B₃ D₂ M₇ om. —*Sarga name* : Ś D8.12 पुष्पकप्रत्यानयनः(Ś2 °नं); Ñ V₃ B D1–3.6.9 पुष्पकप्रत्या-गमनं(Ñ1 D2.9 °नः; B₂ °गमः); V1 पुष्पकप्रस्थानं; D₅ पुष्पकपुनर्गमनं. —*Sarga no.* (figures, words or both) : Ś Ñ1 V₃ D2.12 om. ; Ñ2 B1.3 45 ; V1 35 ; B₂ 31; B₄ T₃ 46; D1.3 43 ; D₅ 44; D6.8.10.11 T1.2 G M1–5.9–10 41; D₉ 49; T₄ 48; M₆ 39. —After colophon, T₄ concludes with श्रीरामार्पणमस्तु; G M1.5.8 with श्रीरामाय नमः; M₈ with श्रीं; M10 with श्रीरामचन्द्राय नमः.

४१

स विसृज्य ततो रामः पुष्पकं हेमभूषितम् ।
अविवेश महाबाहुरशोकवनिकां तदा ॥ १
चन्दनागरुचूतैश्च तुङ्गकालेयकैरपि ।
देवदारुवनैश्चापि समन्तादुपशोभिताम् ॥ २
प्रियङ्गुभिः कदम्बैश्च तथा कुरबकैरपि ।
जम्बूभिः पाटलीभिश्च कोविदारैश्च संवृताम् ॥ ३
सर्वदा कुसुमै रम्यैः फलवद्भिर्मनोरमैः ।
चारुपल्लवपुष्पाढ्यैर्मत्तभ्रमरसंकुलैः ॥ ४

G. 7. 45. 1
B. 7. 42. 7
L. 7. 44. 5

41

☞ V_2 missing for Sarga 41 (cf. v.l. 7.12.2). D_4 cont. the previous Sarga. D_{12} begins with ॐ.

1 ^{a}) Ś Ñ$_2$ V_3 B $D_{8.12}$ तं; Ñ$_1$ V_1 $D_{1.2.4.9}$ T_4 तद्; D_3 प्र- (for स). T_{1-3} G_3 M_3 विसृज्य च (T_3 तु); Cg.k as in text (for स विसृज्य). V_1 तदा (for ततो). —^{b}) M_1 पुष्प- (for हेम-). —D_{11} om. $1^{c.d}$. —^{d}) Ś Ñ $V_{1.3}$ B_{2-4} $D_{1-4.8.9.12}$ T_4 $M_{5.6}$ शुभां; T_2 तथा (for तदा). B_1 रत्नाकरनिभां सभां. ❀ Cg: अशोकवनिकामन्तःपुरगतं लीलोद्यानम् ।; Ck: अशोकवनिकेति । सामान्यतो महाप्रभूणां शृङ्गारविहारोपवनमन्तःपुरवर्ति ।; so also Ct. ❀ —After 1, Ñ$_2$ B ins. 792* and then Ñ$_2$ B_{1-3} read 9 for the first time repeating it in its proper place.

2 For 2-8, Ñ$_1$ V_1 $D_{2.3.9}$ subst. 792*. —^{a}) Ś Ñ$_2$ B $D_{8.10.12}$ -[अ]गुरु- (for -[अ]गरु-). Ś $D_{8.12}$ -गंधैश्च; Ñ$_2$ B_{2-4} वृक्षैश्च; $D_{1.4}$ -धूपांश् (sic); D_5 -धूपैश्च; G (ed.) -पर्णैश् (for -चूतैश्). V_3 तत्राशोकान्प्रियंगवश्च (sic). —^{b}) Ś Ñ$_2$ V_3 B $D_{5.8.12}$ -कालीयकैर् (for -कालेयकैर्). —After $2^{a.b}$, M_1 reads 3 (transp. $^{a.b}$ and $^{c.d}$ [followed by first occurrence of $2^{c.d}$]). —^{c}) Ñ$_2$ V_3 B [ए]व (for [अ]पि). —^{d}) V_3 $B_{2.4}$ -शोभिताः (for -शोभिताम्). Ś $D_{8.12}$ M_1 (first time).5 शोभितां हेमस(Ś$_1$ °सु)प्रभैः. —After 2, Ñ$_2$ V_3 B $D_{1.4-7.10.11}$ T G M_1 (after $2^{c.d}$ [second occurrence]).2-4.6-10 ins.; while Ś $D_{8.12}$ ins. l. 3-4 only after 2:

788* चम्पकाशोकपुंनागमधूकपनसासनैः ।
शोभितां पारिजातैश्च विधूमज्वलनप्रभैः ।
लोध्रनीपार्जुनैर्नागैः सप्तपर्णातिमुक्तकैः ।
मन्दारकदलीगुल्मलताजालसमावृताम् ।

[(l. 1) $D_{5-7.10.11}$ T_4 -[अ]ग(D_{10} [अ]गु)रु- (for -[अ]शोक-). Ñ$_2$ V_3 B -पुंनागैर् (for -पुंनाग-). G_1 -पवन- (for -पनस-). V_3 B -पनसादिभिः (for -पनसासनैः). —After l. 1, Ñ$_2$ V_3 B ins.:

788(A)* शालैस्तालैस्तमालैश्च गगनार्धसमुच्छ्रितैः ।

[B_3 सुमालैश् (for तमालैश्).]

—(l. 2) $D_{1.4}$ M_1 -ज्वलनोपमैः (for °नप्रभैः). Ñ$_2$ V_3 B वृक्षैर्बहुविधैश्चापि (B_1 °श्चैव) शोभिता(Ñ$_2$ V_3 B_1 °तां) हेमसप्रभैः (B_3 °संनिभाः). —After l. 2, $D_{1.4}$ T_{1-3} $G_{2.3}$ $M_{1-4.7-10}$ ins.; while G_1 M_6 cont. after 788(C)*:

788(B)* कर्णिकारवनैश्चापि शोभितां हेमसप्रभैः ।

[$T_{1.2}$ M_3 [ए]व (for [अ]पि). T_2 -सुप्रभैः.];

while G_1 M_6 ins. after l. 2:

788(C)* सुरभीणि च माल्यानि जलजानि शुभानि च ।

[G_1 सुगंधीनि (for च माल्यानि). G_1 जलानि च सुखानि च (for the post. half).]

—T_1 G $M_{1.2.8}$ om. l. 3-4. —(l. 3) Ś $D_{1.4.8.12}$ रोध्र- (for लोध्र-). Ś $D_{8.12}$ -नीराजनैर्; B_3 -नीलार्जुनैर् (for -नीपार्जुनैर्). B_1 नीपैः (for नागैः). Ś $D_{1.4.8.12}$ -पत्र- (for -पर्ण-). Ś$_3$ $D_{8.12}$ °मुक्तकैः; D_6 °नक्तकैः (for -[अ]तिमुक्तकैः). —(l. 4) V_3 असन- (for मन्दार-). V_3 $B_{2.4}$ -समावृताः; $T_{2.3}$ -समाकुलां (for -समावृताम्).]

3 For subst. in Ñ$_1$ V_1 $D_{2.3.9}$ cf. v.l. 2 and 8. V_3 $D_{1.4}$ om. (hapl.?) 3. M_1 reads 3 (transp. $^{a.b}$ and $^{c.d}$) after $2^{a.b}$. —^{a}) Ñ$_2$ B कुरबकैः (for कदम्बैश्च). —After 3^a, D_5 reads 4^b and the prior half of l. 1 of 789* for the first time repeating them in their proper places. —^{b}) Ś $D_{8.12}$ कारंटकैर्(D_{12} °कटैर्); $D_{5-7.10.11}$ T_4 च बकुलैर् (for कुरबकैर्). Ñ$_2$ B कदंबैश्चोपशोभितां($B_{2.4}$ °ताः). —^{c}) Ś Ñ$_2$ B_4 $D_{8.12}$ M_5 पाटलाभिश्च; B_2 कोविदारैश्च; $D_{5-7.10.11}$ T_4 दाडिमैश्चैव (for पाटलीभिश्च). —^{d}) B_2 पाटलाभिश् (for कोविदारैश्). Ñ$_2$ सु- (for च). Ś$_2$ B $D_{5-7.10.11}$ T_4 शोभितां; B_3 संभृतां (for संवृताम्). —After $3^{c.d}$, M_1 reads $2^{c.d}$ for the first time repeating it in its proper place.

4 For subst. in Ñ$_1$ V_1 $D_{2.3.9}$ cf. v.l. 2 and 8. —^{a}) Ñ$_2$ V_3 B G_3 सर्वर्तु-; M_5 सदा सु-; Ck.t as in text (for सर्वदा). Ñ$_2$ V_3 B दिव्यैः; $T_{1.2}$ G $M_{2-5.7-10}$ अन्यैः (for रम्यैः). —D_5 repeats 4^b and the prior half of l. 1 of 789* here (cf. v.l. 3). —^{b}) Ñ$_2$ V_3 B सु(Ñ$_2$ B_3 स)पुष्पितैः; T_3 M_1 मनोहरैः (for मनोरमैः). —After $4^{a.b}$, Ñ$_2$ V_3 B $D_{1.4-7.10.11}$ S ins.:

789* दिव्यगन्धरसोपेतैस्तरुणाङ्कुरपल्लवैः ।
तथैव तरुभिर्दिव्यैः शिलिपभिः परिकल्पितैः ।

[D_5 repeats the prior half of l. 1 here (cf. v.l. 3). —(l. 1) Ñ$_2$ -रसोपेतं; D_1 -सयुक्तैश्च (for -रसोपेतैस). Ñ$_2$

7. 45. 12
7. 42. 8
7. 44. 6

कोकिलैर्भृङ्गराजैश्च नानावर्णैश्च पक्षिभिः ।
शोभितां शतशश्चित्रैश्चूतवृक्षावतंसकैः ॥ ५
शातकुम्भनिभाः केचित्केचिदग्निशिखोपमाः ।
नीलाञ्जननिभाश्चान्ये भान्ति तत्र स्म पादपाः ॥ ६
दीर्घिका विविधाकाराः पूर्णाः परमवारिणा ।
महार्हमणिसोपानस्फटिकान्तरकुट्टिमाः ॥ ७
फुल्लपद्मोत्पलवनाश्चक्रवाकोपशोभिताः ।
प्राकारैर्विविधाकारैः शोभिताश्च शिलातलैः ॥ ८

B -कोमलैः; D1.4 -राजैः (sic); M6 -कोरकैः (for -पल्लवैः). —(l. 2) Ñ2 V3 B D1.4 M6 शोभितां (B2.4 °ताः) (for तथैव). D6 शिलाभिः (for शिल्पिभिः). M1 चारु- (for परि-). D1.4 -कल्पितां. ❀ Cg : दिव्यैः शिल्पिभिरिति । ऋतुभिरित्यर्थः । दोहलकादिभिर्वा । ; Ck : दिव्यैः शिल्पिभिरित्यर्थः । ; Ct : दिव्यैः शिल्पिभिर्वृक्षारोपणादिशिल्पवद्भिः. ❀]

—^{a}) Ś D8.12 -पुष्पाढ्यां D4–7.11 -पुष्पाढ्यैर् (for -पुष्पाढ्यैर्). —^{d}) Ś D8.12 -संकुलां; Ñ2 V3 B -कूजितैः (for -संकुलैः).

5 For subst. in Ñ1 V1 D2.3.9 cf. v.l. 2 and 8. —^{a}) M1 बर्हिणैश्चैव (for भृङ्गराजैश्च). —Ñ2 om. (hapl ?) 5^{bc}. D1 om. 5°–8. —^{c}) B2 शोभिताः (for शोभितां). V3 B1.2 पत्रपुष्पैश्च; B3.4 पुष्पपत्रैश्च; D4 सर्वतश्चित्रैश्; D5–7.10.11 शतशश्चित्रां (for शतशश्चित्रैश्). —^{d}) D6 कृत- (for चूत-). V3 -पत्र-; M1 -पुष्प-; Cv.g.t as in text (for -वृक्ष-). ❀ Cg : चूतवृक्षावतंसकैः चूतवृक्षाग्रस्थैरित्यर्थः । ; Ck : चूता(°त वृक्षा ?)वतंसकैः, चूतवृक्षपल्लवरूपावतंससंनिभैः । तत्समानवर्णैः । पक्षिविशेषणमिदम् ।; Ct : चूतवृक्षपुष्परजोऽवतंसभूतं येषां तैः पक्षिभिः. ❀

6 For subst. in Ñ1 V1 D2.3.9 cf. v.l. 2 and 8. D1 om. 6 (cf. v.l. 5). —^{a}) Ś D8.12 शातकौम्भ- (for शातकुम्भ-). D4 -निभैः कैश्चित् (for -निभाः केचित्). Ñ2 V3 B शातकुंभमयैः कै(B1 क)श्चित्. —^{b}) Ñ2 V3 B कैश्चिद्; D4 * * द् (for केचिद्). Ñ2 V3 B -शिखोपमैः; D4.12 -शिखाप्रभैः (D12 °भाः); G2 -शिखासमाः (for -शिखोपमाः). —^{c}) Ñ2 V3 B D4.11 -निभैश्चान्यैः; G1 M1.5 -निभाः केचिद् (for -निभाश्चान्ये). —^{d}) Ś D8 तत्र भांति (by transp.). T3 सु- (for स्म). K (ed.) तत्रत्य- (for तत्र स्म). Ñ2 B1 पादपैः शोभितां वरां; V3 B4 शोभिता वरपादपैः; B2.3 शोभिताः (B3 °तां) सुरपादपैः; B2 (m. also) पादपैः शोभितांतरा. —After 6, D5–7.10.11 T G M1–5.7–10 ins. l. 2 of 792*.

7 For subst. in Ñ1 V1 D2.3.9 cf. v.l. 2 and 8. D1 om. 7 (cf. v.l. 5). —^{a}) Ñ2 V3 B तत्र रुचिराः (for विविधाकाराः). —^{b}) D11 reads परमवारिणा in marg. G2 -वारिभिः (for -वारिणा). Ś D2.3.12 वृक्षाः (D4 * *) फलसमन्विताः; Ñ2 V3 B पूर्णाश्च परमांभसा (Ñ2 B2 °माद्भुताः). —^{c}) D5–7.10.11 T4 माणिक्यकृत- (for महार्हमणि-). Ś Ñ2 V3 B D4–8.10–12 T3 M3.5.6 -सोपानाः (for -सोपान-). —^{d}) Ñ2 V3 B3.4 D4.10.11 T1.3 G M2–8 Cg.k स्फाटिक- (for -स्फटिक-). ❀ Cg : स्फाटिकान्तरकुट्टिमाः स्फटिकमयसोपानप्रान्तस्नानार्हा निबद्धभूमयः । अन्यथा सर्वत्रान्तरे स्फटिककुट्टिमत्वे पद्माद्युत्पत्तिविरोधात् । ; Ck : स्फाटिकेति । स्फटिकरत्ननिबद्धान्तरालवत्कुट्टिमबद्धभूमिर्यासु ताः स्थिताः । ; so also Ct. ❀

8 D1 om. 8 (cf. v.l. 5). —^{a}) Ś D8.12 -भूतश्; M1 -युताश् (for -वनाश्). M5 -[उ]त्पलवती (for -[उ]त्पलवनाश्). B1 प्रफुल्लपद्मोपवनाश्; D4 पुष्पपद्मोत्पलावृताश्. —^{b}) G2 -कूजिताः (for -शोभिताः). —After 8^{ab}, B2 ins.:

790* नानापक्षिगणैर्युक्ता मधुपैः परिवारिताः ।

—Thereafter B2 cont.; while Ñ2 V3 B4 D5–7.10.11 S ins. after 8^{ab}:

791* दात्यूहरुतसंघुष्टा हंससारसनादिताः ।
तरुभिः पुष्पशबलैस्तीरजैरुपशोभिताः ।

[(l. 1) T1.2 G1.3 M1.2–5.8.10 न त्यूह्- (for दात्यूह-). Ñ2 B4 D5–7.10.11 -शुक-; B2 गण- (for -रुत-). Ñ2 B2 -संपूर्णा; M1 -घुष्टाश्च (for -संघुष्टा). V3 जलपक्षिगणाकीर्णा (for the prior half). D5 हिम- (for हंस-). V3 -शोभिताः; M1 -सेविताः (for -नादिताः).]

—^{c}) Ś Ñ2 V3 B1–3 D4.8.12 T1 G3 M3.6 प्रासादैर् (for प्राकारैर्). —^{d}) B4 शोभितैश् (for शोभिताश्). G3 शिलातलाः. —For 2–8, Ñ1 V1 D2.3.9 subst.; while Ñ2 B ins. after 1; D1 ins. after 5^{ab} (owing to om.); D4 ins. after 9^{ab} (first occurrence); D5–7.10.11 T G M1–5.7–10 ins. l. 2 after 6 and l. 5–6 after 9 (M8 l. 5–6 after 8) :

792* यत्राशोकः प्रियङ्गुश्च चम्पका नवमालिकाः ।
सुबहूनि सुगन्धीनि माल्यानि विविधानि च ।
अकालपुष्पास्तरवः शिल्पिभिः परिकल्पिताः ।
ते पुष्पिता बहुविधा बभुर्मायाकृता इव ।
संहर्षादिव जातानां वृक्षाणां पुष्पशालिनाम् । [5]
प्रस्तराः पुष्पशबला नभस्तारागणैरिव ।

[(l. 1) Ñ1 D1.4 तत्र (for यत्र). Ñ2 B2.3 D1.4 [अ]शोकाः (for [अ]शोकः). Ñ1 रक्त-; B3 वन-; D1.4 नक्त- (for नव-). Ñ1 -मल्लिकाः; D1.4 -मालकाः (for -मालिकाः). V1 D3.9 तत्राशोकान्प्रियंगूंश्च चंपकान्न(V1 °न्न)क्तमालिकाः(V1 °मल्लिकान्; D9 °मालकान्); D2 तत्राशोकप्रियंगाश्च चंपका नक्तमालकाः. —(l. 2) D5–7.10.11 T G M1–5.7–10 सुरभीणि च पुष्पाणि (for the prior half). M1 सुरभीणि (for विविधानि). —D1 om. l. 3. —(l. 3) B2 -पुष्पस्तबकाः (for -पुष्पास्तरवः). V1 D2–5.9 अकालगा(D3.9 °जा)श्चापि(D4 °जाताश्च) नगाः (for the

तत्र तत्र वनोद्देशे वैदूर्यमणिसंनिभैः ।
शाद्वलैः परमोपेताः पुष्पितद्रुमसंयुताः ॥ ९
नन्दनं हि यथेन्द्रस्य ब्राह्मं चैत्ररथं यथा ।
तथारूपं हि रामस्य काननं तन्निवेशितम् ॥ १०
बह्वासनगृहोपेतां लतागृहसमावृताम् ।
अशोकवनिकां स्फीतां प्रविश्य रघुनन्दनः ॥ ११

G. 7. 45. 19
B. 7. 42. 17
L. 7. 44. 12

prior half). D3.4 -कीर्तिताः (for -कल्पिताः).—(l. 4) Ñ1 पुष्पवंतः सुगंधाढ्याः; V3 D1.2.4 पुष्यंते ते (D1 °ष्पितास्ते) पि गंधाढ्याः; D3.9 पुष्पंत्यति (D3 °ति ते) सुगंधाढ्याः (for the prior half). Ñ2 B4 चतुर्माया-; B3 चतुर्मुख- (for बभुर्माया-). B2 -[आ]हृता (for -कृता). Ñ1 V1 D2-4.9 पुष्पं मायाकृतं यथा (V1 D3 तथा); D1 पुष्पमय्यास्वलंकृता (sic) (for the post. half).—After l. 4, B4 reads 9^{cd} for the first time repeating it in its proper place.—B3 repeats l. 5-6 after 793*.—(l. 5) D2.3.9 संघर्षादिव (D2 °नपि); D5-7. 10.11 T G M1-5.7-10 तत्र संघर्ष- (for संहर्षादिव). B2 -शोभिनां; B3 (first time) -मालिनां (for -शालिनाम्). ❀ Cg: संघर्ष-जातानां स्पर्धयैव जातानाम्, जातपुष्पाणामित्यर्थः ।; Ck: संघर्षात्स्पर्धयेव जातानां जातपुष्पाणामित्यर्थः ।; so also Ct. ❀—(l. 6) B1 किंशुकाः; B3 (both times) संभाराः; D2.9 स्वास्तराः; D3 संपूर्णाः; D4 स्वस्तेशः (sic) (for प्रस्तराः). D9 -शालाश्च (for -शबला). D1 सर्वे पुष्पस्तबका (subm.) (for the prior half). B3 (second time) बभुस् (for नभस्). Ñ1 V1 -गणा इव (for -गणैरिव). B1-3 (first time).4 D1-4.9 बभुस्तारा-गणा इव (for the post. half).]

9 Ñ2 B1-3 read 9 for the first time after 792* repeating it here. Ñ1 D4 read 9^{ab} twice. M5 transp. 9 and 10.—^{a}) D5-7.10.11 तत्रैव च (for तत्र तत्र). D6 T3 G1.2 M1.2.4-7.9 वनोद्देशा (D6 G1 M5.6 °शैर्); T2 शिलोद्देशैर् (for वनोद्देशे). Ś Ñ B (Ñ1 [both times; Ñ2 B1-3 first time]) D1-3.4 (both times).8.9.12 त (Ñ2 B1.2 य) त्रोद्देशाः सु (Ñ1 first time °शास्तु) रुचिराः; V1 तत्रोद्योगाय रुचिरा.—^{b}) Ś D1-9 (D4 both times).11 T G M1.3-6.8 वैदूर्यमणि-; B3 (first time) M2.9 वैदूर्यमाल- (M2.9 °मय-). Ś D8.12 -शोभिताः; Ñ V1.3 B D1-4.9 G2 M2.4.7 (Ñ B2.3 D4 both times; B1 first time) -संनिभाः (for -संनिभैः).—After 9^{ab} (first occurrence), D4 ins. 792*.—B4 reads 9^{cd} for the first time after l. 4 of 792* repeating it here.—^{c}) D2-4.7.8.10.11 T1-3 G M1.3.6.8 शाद्वलैः; Cg as in text (for शाद्वलैः). Ñ1 V1 B2 (second time) D1-4.9 उपसंपन्ना (Ñ1 °लजा; V1 D1.4 °छन्ना); B3 (first time) T2 परमोपेतैः; D5-7 T4 परमैर्युक्तां; D10.11 M4-6.8.10 Cg.t परमोपेतां; M1 बहुभिर्युक्तां; Ck as in text (for परमोपेताः). ❀ Cg.t: परमोपेतामत्यन्तसंयुक्ताम् ।; Ck: परमोपेता अत्यन्तसंयुक्ताः. ❀—^{d}) D5-7.10.11 T4 -काननां; M1.4.5.8.10 -संयुतां (for -संयुताः). Ś Ñ V1.3 B (Ñ2 B both times) D1-4.8.9.12 M6 सीता (Ś V1 D1.4.8.12 सीता; V3 क्रीडा) र्थमुपक (B3 °शि) ल्पिताः (M6 °तां).—After 9, Ñ2 V3 B (Ñ2 B after 9^{cd} [second occurrence]) ins.:

793* सर्वर्तुसुखदा रम्याः पुंस्कोकिलकलारवाः ।
[B3.4 सर्वत्र (for सर्वर्तु-). B2 -कृत- (for -कल-).]
—Thereafter, B3 repeats l. 5-6 of 792*; while D5-7. 10.11 T G M1-4.7-10 ins. l. 5-5 only of 792* after 9.

10 M5 transp. 9 and 10.—^{a}) Ñ1 भवनं (for नन्दनं). Ś Ñ1 V1.3 D1.2.8.9.12 G3 च; T1.2 M3 तु (for हि). D4 नंदनानं (sic) (for नन्दनं हि).—^{b}) N1 V1.3 B2-4 D1-7.9 T2.4 वनं; G2 ब्राह्मैश् (for ब्राह्मं). D7 M2 तथा (for यथा).—^{c}) D5-7.10.11 T1.2 G3 M6 तथाभूतं (M6 °रूपां) (for तथारूपं). M3 च (for हि). Ñ1 V1.3 D1-4.9 शचवस्य (V1 °मस्य च) त (D9 य) था (D2 °दा) रूपं.—^{d}) Ñ1 कानने (for काननं). Ś Ñ2 V1.3 D2.3.8-12 T1.2 G3 M3.10 Cg.k.t सन्-; T3 यन् (for तन्). V1.3 D1-4.9-11 T2 G3 M5 Cg.k.t -निवेशने (D8.10.11 T2 G3 M5 Cg.k.t °नं); T3 निवेदितं (for निवेशितम्). T4 काननं मुनिसेवितं; M6 कारणात्तां निवेशितां. ❀ Cg.k.t: ब्राह्मं ब्रह्म-निर्मितम् (Ct adds चैत्ररथं कुबेरस्य) संनिवेशनं समीचीनसंस्थानोपेतम्. ❀—After 10, Ñ1 V1.3 D1-4.9 T3 M2.4.7. 9.10 ins.:

794* नीलजीमूतसंकाशाः पद्मिन्यो विमले जले ।
हंसकारण्डवाकीर्णाश्चक्रवाकोपशोभिताः ।
[(l. 1) T3 M2.4.7.9.10 -वैदूर्यवर्णा (M4 °र्णैः) श्च (for -जीमूतसंकाशा.). Ñ1 V1.3 विमलैर्जलैः; T3 M2.4.7.9.10 बहुविस्तराः (for विमले जले).]

11 Ñ1 V1.3 D1-4.9 om. 11.—^{a}) D5 T4 M4.7 Cv -कृतोपेतां; T1 M2.3.6.10 -कृथोपेतां; Ck.t as in text (for -गृहोपेतां).—^{b}) D5 -वन-; D10.11 T3.4 M1.2.4.7-9 Cv.k.t -[आ]सन-; G1 M5 -शत-; Cg as in text (for -गृह-). Ś D8.12 -समन्वितां; M8 -समावृताः; Cv.g k.t as in text (for -समावृताम्). Ñ2 B D6.7 G (ed.) लतापादपशोभितां G [ed.] °संवृतां); T1.2 G3 M3 पुष्पितद्रुमसंयुतां; G2 संतानकसमावृतां. ❀ Cv: बह्वासनकृतोपेताम्, बहुभिस्तमालपन्नादिभिः कृतासनोपेताम्। लतासनसमावृताम्, एलालतादिभिः कृतासनयुक्ताम्।; Cg: बह्वासनगृहोपेताम्, अनेकावस्थानयोग्यगृहोपेतामित्यर्थः। लतागृहसमावृतां लतामयगृहसमावृताम्।; Ck: बह्वासनोचितैरनेकावस्थानयोग्यैर्गृहैरुपेताम्। तथा लतानामासनं परिक्षेपो यस्मिंस्तत्तथा। तैः समावृताम्। लतागृहैरुपेतामित्यर्थः।; Ct: बह्वासनगृहोपेतां बहूनामवस्थानोचितगृहयुतां-लतासनसमावृतां लतानामासनं परिक्षेपो येषु तैर्लतासनैर्लतामूहैः समावृतामुपेताम्. ❀—^{d}) Ś B3 D8 विवेश (for प्रविश्य).

G. 7. 45. 20
B. 7. 42. 17
L. 7. 44. 13

आसने तु शुभाकारे पुष्पस्तबकभूषिते ।
कुथास्तरणसंवीते रामः संनिषसाद ह ॥ १२
सीतां संगृह्य बाहुभ्यां मधुमैरेयमुत्तमम् ।
पाययामास काकुत्स्थः शचीमिन्द्रो यथामृतम् ॥ १३
मांसानि च विचित्राणि फलानि विविधानि च ।
रामस्याभ्यवहारार्थं किंकरास्तूर्णमाहरन् ॥ १४
उपनृत्यन्ति राजानं नृत्यगीतविशारदाः ।
बालाश्च रूपवत्यश्च स्त्रियः पानवशंगताः ॥ १५
एवं रामो मुदा युक्तः सीतां सुरुचिराननाम् ।
रमयामास वैदेहीमहन्यहनि देववत् ॥ १६

12 ^{a}) Ś1.2 D8.12 सं-; Ś3 Ñ2 B2–4 D6.7.10.11 T1.2 G3 M3.4 च; B1 M6.7.10 सु- (for तु). Ś1.2 D12 -नत-; D8 -वृत- (for -शुभ-). Ñ1 V1.3 D1–4.9 ततस्त(D3 °त्र त)त्र शुभे देशे(V3 °स्मिन्वनोद्देशे). —^{b}) B3 om. पुष्प-. Ś1 Ñ2 B1.3.4 D7.8.10–12 -प्रक(D12 °का)र-; Ś2.3 D6 -प्राकार-; Ñ1 V1 D1–4.9 -प्रस्तर-; B2 -प्रवर-; D5 -[आ]स्तरण- (for -स्तबक-). Ś B1–3 D8.12 T1.2 G M1.3 -शोभिते; Ñ1 V1 D2 -संवृते; D1.4 -संस्तृते; D3.9 -संस्तृते; T3 -पूजिते; M4.7.10 -संयुते (for -भूषिते). V3 प्रचुरे पुष्पसंवृते. —Ñ1 om. 12^{cd}. —^{c}) Ś Ñ2 V3 B1 D1.3.5.6–11 G2 कुश-; D2 अथ; T3 सुख-; M1.6 तथा (for कुश-). Ś V1.3 B2.4 D8.12 M6 -संकीर्णे; Ñ2 B1.3 D1–4.6.7.9–11 -संस्तीर्णे; Cg as in text (for -संवीते). ❀ Cg: कुथास्तरणसंवीते उपर्यास्तरणावृते ।; Ck.: कुथास्तरणमुपर्यास्तरणम्; Ct कुशास्तरणं नामोपर्यास्तरणम्. ❀ —^{d}) B2 D4.5.7 M2 4.6–10 स; D2.3.9 च; G1 तन् (for सं-). Ś2.3 -विषसाद (for -निषसाद). D5 हा (for ह).

13 Ñ2 illeg. for 13^{ab}. —^{a}) Ś2.3 स तां (for सीतां). Ñ1 V1.3 D1.2.4.9 T4 आलंब्य; B D3.6.7.10.11 आदाय; G2 संश्लिष्य (for संगृह्य). Ñ1 V1.3 B3 D1–4.6.7.9–11 हस्तेन; T4 हस्ताभ्यां; M5 पाणिभ्यां (for बाहुभ्यां). —^{b}) Ñ1 V1.3 D1–4.6.7.9–11 T4 मधुमैरेयकं शुचि(Ñ1 V3 D1.6 °चि:); B1 मधुपेयमनुत्तमं. —^{d}) Ñ1 V1.3 D1.3.4.9 इव (for यथा). M1 [ऽ]मृतं यथा (by transp.). Ñ2 D6.7.10.11 शचीमिव पुरंदरः; D2 (with hiatus) शची इंद्रमिवामृतं.

14 Ñ2 B1.2 (m. also as in text).3.4 D6.7.10.11 सुमृष्टानि (for विचित्राणि). —^{b}) B1.3.4 विविधानि फलानि च. —^{c}) Ś3 D8 रामम्; Ñ1 V1.3 D2–4 T4 रामाय (for रामस्य). D1 रामाभ्यव्यवहारार्थं (sic). —^{d}) Ñ1 V1.3 D1–4.9 T4 समुपानयन्; D5 T1 M3 तूर्णमानयन्. —After 14, B1 G (ed.) ins. 795*; D4 ins. 796*.

15 D4 om. 15. B1 transp. ^{ab} and ^{cd}. K (ed.) repeats 15 (^{ab} and ^{cd} transp.) after 795* within brackets. B2–4 D6.7.10.11 repeats 15^{ab} after 15. G1 reads 15^{ab} twice. —^{a}) Ś D8.12 उपावृ(D8 °नृ)त्य च; Ñ1 D1.2 T3 उपनृत्यंतु; Ñ2 B1–3 D6.7.10.11 K (ed.) (B2 first time; B3 both times; D6.7.10.11 K [ed.] second time) उपानृत्यंत; B4 (both times) D6.7.10.11 K (ed.) (all except B4 first time) Cg.t उपानृत्यंश्च (for उपनृत्यन्ति). Ñ2 D6.7.10.11 K (ed.) (all except Ñ2 second time) काकुत्स्थं; B1 रामस्य; D2 राजानः (for राजानं). ❀ Cg: उपानृत्यन्निति । उपनृत्यन्तीति वा पाठः । राजानमिति । राजानमुप राज्ञः समीपे ।; Ct: राजानमुपानृत्यन्राजसमीपेऽनृत्यन्. ❀ —^{b}) Ś1 D6.8.12 T3.4 G M1.3.5–10 (D6 G1 second time) नृत्यगीत-; V1 D2.3.9 गीतनृत्य- (by transp.); V3 गीतवाद्य- (for नृत्यगीत-). B1 सीताया हर्षवर्धनाः. —After 15^{ab} (first occurrence), B2–4 D8.7.10.11 ins.; while B1 G (ed.) ins. after 14; K (ed.) ins. (within brackets) after 15 (first occurrence):

795* अप्सरोरगसंघाश्च किंनरीपरिवारिताः ।

[B K (ed.) -गण- (for -[उ]रग-). G (ed.) नृत्यगीत-विशारदाः. =15^{b} (for the post. half).]

—Ñ2 om. 15^{cd}. —^{c}) Ñ1 V1.3 B4 D2.3.7.10.11 T4 K (ed. [second time]) दक्षिणाः; D1.6.9 दाक्षिण्यो (for बालाश्च). Ś D8.12 कामवत्यश्च; D1 तपवत्यश्च; D2 रूपमान्याश् (for रूपवत्यश्च). —^{d}) Ś D8.12 किं न; D6 पण- (for पान-). D5 T2 G3 M3.6.8 -वशानुगाः; T1 -विशारदाः (for -वशंगताः). Ñ1 V1.3 D1–3.9 T4 स्त्रियः सर्वगुणान्विताः; B3 राघवं पानकं गताः. —After 15, Ś Ñ1 V1.3 D1–3.4 (after 14 owing to om.).8.9.12 T4 ins.; while Ñ2 ins. after 15^{ab} (owing to om.); B2 D6.7.10.11 K (ed.) ins. after 15^{ab} (second occurrence):

796* मनोभिरामा रामास्ता रामो रमयतां वरः ।
रमयामास धर्मात्मा नित्यं परमभूषिताः ।
स तया सीतया सार्धमासीनो विरराज ह ।
अरुन्धत्या सहासीनो वसिष्ठ इव तेजसा ।

[Ś D8.12 om. l. 1. —(l. 1) V3 मनोभिरामै; B2 रामाभिराम- (for मनोभिरामा). D6 तु (for ता). T4 ता रामा (by transp.). D2 रामाय रमतां वरं (for the post. half). —(l. 2) Ś D6–8.12 -भूषितः; D1.4 -हर्षितः(D4 °ताः) (for -भूषिताः). Ñ1 दिव्यांबरविभूषिताः (for the post. half). —(l. 3) D4 तथा (for तया). B2 (marg. also) देववत् (for आसीनो). D6 नि- (for वि-). B2 च; D3 हा; T4 हि (for ह). V1 विजहार च; D1.4 स विराजते (for विरराज ह). —For l. 4, D1.4 subst; while D3 ins. after l. 4:

796(A)* रोहिण्या तु सहासीनश्चन्द्रमा इव तेजसा ।]

16 ^{b}) B1 D3.4 T3 शीतांशु- (for सीतां सु-). Ñ V1.3 D2.6.7.9–11 T4 सुरसुतोपमां; M1 रुचिरलोचनां (for

तथा तु रममाणस्य तस्यैवं शिशिरः शुभः ।
अत्यक्रामन्नरेन्द्रस्य राघवस्य महात्मनः ॥ १७
पूर्वाह्णे पौरकृत्यानि कृत्वा धर्मेण धर्मवित् ।
शेषं दिवसभागार्धमन्तःपुरगतोऽभवत् ॥ १८
सीता च देवकार्याणि कृत्वा पौर्वाह्णिकानि तु ।
श्वश्रूणामविशेषेण सर्वासां प्राञ्जलिः स्थिता ॥ १९
ततो राममुपागच्छद्विचित्रबहुभूषणा ।
त्रिविष्टपे सहस्राक्षमुपविष्टं यथा शची ॥ २०
दृष्ट्वा तु राघवः पत्नीं कल्याणेन समन्विताम् ।
प्रहर्षमतुलं लेभे साधु साध्विति चाब्रवीत् ॥ २१

G. 7. 45. 30
B 7. 42. 30
L. 7. 44. 23

सुरुचिराननाम्). —[c]) B1.2 कामयामास (for रमयामास). —[d]) Ś3 D8 [अ]देववत्; Ñ1 V1 B2.4 D1–4.9 राघवः; G2 पूर्ववत् (for देववत्). —After 16, V3 D5 (l. 2 only) ins. 797*.

17 [a]) Ś V3 D8.12 तां; B1.2.4 च (for तु). B2 तथैव (for तथा तु). ❀ Cv: तथा तु रममाणस्येत्यादिना सीतासंभोगकालः संवत्सर इति सूच्यते। वसन्ते प्राप्ते शिशिरात्ययेन संवत्सरपूर्तिर्भवति. ❀ —[b]) Ś V3 D8.12 भार्या वै (V3 D12 तां); D1.3.4 M6 तस्यतुः (for तस्यैवं). D1 दिवसाम्; D3–5 M3.8 Ck शैशिरः (D5 M8 °रं); Cg as in text (for शिशिरः). V3 प्रभुः; D1.4 तदा; D5 M8 शुभं; Cg.k as in text (for शुभः). B1.2.4 तस्याथ शिशिरागमः; B3 तस्यतुः शैशवः शुचिः. —B2 D2 om. 17[cd]. —[c]) Ś2.3 T1 G1.3 M1.6 अतिक्रामन्; V3 अभ्यक्रामन्; D4 अत्यक्रामन् (for अत्यक्रामन्). D7.10.11 Ct शुभः कालः (for नरेन्द्रस्य). B1.4 व्यतीतः पुरुषेन्द्रस्य. —[d]) G2 रावणस्य (sic) (for राघवस्य). D7.10.11 Ct शैशिरो भोगदः सदा. ❀ Cg: शिशिरः शुभोऽत्यक्रामदिति। पुनश्च संवत्सरोऽतीत इत्यर्थः। वानरादिसुहृत्संलापादिना क्रीडावसरा-भावात्तैः सह एकसंवत्सरो गतः। तद्विसर्जनानन्तरं क्रीडया पुनरेकः संवत्सरो गतः। तथा चाभिषेकानन्तरं वर्षद्वयं जातम्।; Ck: शैशिरः शुभो(ऽ)त्यक्रामदिति। पुनश्च संवत्सरोऽतीत इत्यर्थः. ❀ —For 17, Ñ V1 D6.9 T4 subst.; while V3 D5 (l. 2 only) ins. after 16; D2.7.10.11 K (ed.) subst. l. 1 only for 17[ab] and D7.10.11 K (ed.) ins. l. 2 after 17; T2.3 ins. after 20:

797* तथा तयोर्विहरतोः सीताराघवयोश्चिरम् ।
दश वर्षसहस्राणि गतानि सुमहात्मनोः ।

[(l. 1) T2.3 एवं (for तथा). Ñ1 विरहतोः (meta.) (for विहरतोः). —Ñ2 illeg. for the post. half. ❀ Ct: 'सीताराघवयोश्चिरम्' इत्यनन्तरम्, 'अत्यक्रामच्छुभः कालः शैशिरो भोगदः सदा' इत्येव श्लोकः। वानराणां गमनोत्तरं पुनश्च संवत्सरोऽतीत इति कृतकथ्याख्यानात्। 'दश वर्षसहस्राणि गतानि सुमहात्मनोः' इति प्रक्षिप्तमिति गम्यते। 'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः' इति वाल्मीकिशापाच्च। सीतात्यागोत्तरमश्वमेधप्रवृत्त्या तदन्ते 'दश वर्षसहस्राणि वाजमेधानथाकरोत्' इति वाल्मीक्युक्तेश्च। यद्वा वर्षशब्दो दिनपरः। विवाहोत्तरं तावन्ति गतानि। द्वादशाधिकमयोध्यायां चतुर्दश वने एकं पुनरयोध्यायामित्येवं किंचिदधिकसप्तविंशतिर्गतानीति बोध्यम्। पूर्वार्द्धे द्विधाभागेनेदम्. ❀ —(l. 2) Ñ1 एवं (for दश). —After the prior half, V3 ins.:

797(A)* दश वर्षशतानि च ।
शतवर्षेण चैतानि.

Ñ V1 सुमहात्मनः; V3 सह सीतया (for सुमहात्मनोः).]
—Thereafter, Ñ2 D6.7.10 K (ed.) cont.:

798* प्राप्तयोर्विविधान्भोगानतीतः शिशिरागमः ।;

while D5 ins. after 17:

799* प्राप्तस्तयोर्विहरतोर्वसन्तः प्रीतियुक्तयोः ।
मैथिल्याः पतिदेवाया रामस्य च महात्मनः ।

18 L (ed.) om. 18. —[a]) D6 पूर्वाह्ण- (for पूर्वाह्णे). Ś Ñ1 V1 B2 D1–5.8.9.12 T4 देव-; Ñ2 D6.7.10.11 धर्म-; G1 पर- (for पौर-). Ś Ñ1 V1.3 B D1–4.8–12 T4 G2 M1 -कार्याणि; Ñ2 D5–7 -कर्माणि (for -कृत्यानि). —Ś D8.9.12 om. (hapl.?) 18[b]–19[a]. —[b]) Ñ2 V1 T4 धर्माणि (for धर्मेण). —[c]) V1 सोर्थं (for शेषं). V3 -पञ्चार्धम्; B1 -भागानाम्; D2 M1 -भो(M1 -भा)गार्धम्; D5 भागं तु (with hiatus) (for -भागार्धम्). ❀ Cg: शेषं दिवसभागार्धम्, अपराह्ण इत्यर्थः।; Ck: शेषमवशिष्टं दिवसभागस्यार्धं पराह्णादिकाल इत्यर्थः।; Ct: शेषं दिवसभागार्धमिति। अवशिष्टमर्धमित्यर्थः. ❀ —[d]) V1.3 D2–5 G2 M5 -चरो (for -गतो). Ñ B D6 [ऽ]नयत् (for ऽभवत्).

19 Ś D8.9.12 om. 19[a] (cf. v.l. 18). —[a]) Ñ V1.3 B D1–4.7.10.11 T4 [अ]पि; D5.6 T3 M6 तु (for च). —[b]) Ś2.3 Ñ1 V3 D1–4.6.8.9.12 G1.2 M5 पूर्व- (for पौर्व-). Ś Ñ B2 D6–8.10–12 वै; V1.3 B1.3.4 D1–5.9 T4 M5.6.8 च (for तु). —[c]) Ś Ñ V1 B D T4 अकरोत्पूजां; V3 अभव** (lacuna); M6 भवनं विश्य (for अविशेषेण). —[d]) D5 T1.4 G3 M2.4.7–10 तदा; T2.3 G2 M3 तथा (for स्थिता). Ś Ñ V3 B D1–4.6–12 M6 अ(B1 चा)विशेषतः; V1 एव सर्वदा (for प्राञ्जलिः स्थिता).

20 [a]) D5 उपागम्य (for °गच्छद्). Ñ V1 B1.2.4 D1–4.6.7.9–11 T4 अभ्यगच्छत्ततो रामं. —[b]) M6 विचित्रा (for विचित्र-). Ñ1 B3 D1.3–5 T4 -[अं]बर- (for -बहु-). D1.3.4 T4 -भूषिता (for -भूषणा). Ñ2 B1.2.4 D6.7.10.11 विचित्राभरणांबराः V1 D2.9 चित्रांबरविभूषिता. —[d]) D1.9 उपविष्टा(D9 °तिष्ठेत्) (for उपविष्टं). Ś V3 D5.8.12 T G M1.3.5.8 शची यथा (by transp.). —After 20, T2.3 ins. 797*.

21 [a]) Ñ1 D2.9 च (for तु). D2.9 T4 सीतां (for

G. 7. 45. 31
B. 7. 42. 31
L. 7 44 24

अपत्यलाभो वैदेहि ममायं समुपस्थितः ।
किमिच्छसि हि तद्ब्रूहि कः कामः क्रियतां तव ॥ २२

प्रहसन्ती तु वैदेही रामं वाक्यमथाब्रवीत् ।
तपोवनानि पुण्यानि द्रष्टुमिच्छामि राघव ॥ २३
गङ्गातीरे निविष्टानि ऋषीणां पुण्यकर्मणाम् ।
फलमूलाशिनां वीर पादमूलेषु वर्तितुम् ॥ २४

एष मे परमः कामो यन्मूलफलभोजिषु ।
अप्येकरात्रं काकुत्स्थ वसेयं पुण्यशालिषु ॥ २५
तथेति च प्रतिज्ञातं रामेणाक्लिष्टकर्मणा ।
विस्रब्धा भव वैदेहि श्वो गमिष्यस्यसंशयम् ॥ २६
एवमुक्त्वा तु काकुत्स्थो मैथिलीं जनकात्मजाम् ।
मध्यकक्षान्तरं रामो निर्जगाम सुहृद्वृतः ॥ २७

इति श्रीरामायणे उत्तरकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

पत्नीं). —^{b}) Ñ$_{2}$ समप्रभां; D$_{5}$ समावृतां (for समन्वितां). Ś Ñ$_{1}$ V$_{1}$ D$_{1-4.8.9.12}$ शोभमाना(V$_{1}$ अंतर्वत्नी)मनिंदितां; B$_{4}$ शोभया परया युतां. —After 21, Ñ B D$_{6.7.10.11}$ ins.:

800* अब्रवीच्च वरारोहां सीतां सुरसुतोपमाम् ।

22 Ś om. (hapl.) 22–23^{b}. —^{a}) G$_{2}$ अपूर्व- (for अपत्य-). Ñ V$_{1}$ B D$_{1-4.6-9.12}$ T$_{4}$ M$_{4}$ -कालो; Cg.k.t as in text (for -लाभो). —^{b}) Ñ V$_{1}$ B D$_{1-4.6-9.12}$ तव; D$_{10.11}$ Cg.k.t त्वयि; T$_{4}$ तदा; M$_{6}$ मत्तो; M$_{8}$ माम् (for मम). M$_{1.10}$ स्वयुपस्थितः; Cg.k.t as in text (for समुपस्थितः). ❀ Cg: ममायमपत्यलाभस्त्वयि समुपस्थितः, तव गर्भलक्षणं दृश्यत इत्यर्थः ।; so also Ck.t. ❀ —^{c}) T$_{3}$ M$_{2.9}$ च (for हि). Ñ V$_{3}$ B$_{1.2.4}$ D$_{6-8.10-12}$ वरारोहे; V$_{1}$ D$_{1-4.9}$ T$_{4}$ M$_{6}$ च(D$_{2.9}$ त्वं; T$_{4}$ हि) कल्याणि; D$_{5}$ T$_{1.2}$ G$_{2}$ M$_{3.8}$ च(G$_{2}$ हि) कः कामः; G$_{1}$ च कान्कामान् ; G$_{3}$ च किं कामा; M$_{5}$ त्वं वैदेहि; M$_{7}$ हि तं ब्रूहि (for हि तद्ब्रूहि). B$_{3}$ तत्किमिच्छसि कल्याणि. —^{d}) Ñ$_{1}$ B$_{1.2}$ कामः कः (by transp.); Ñ$_{2}$ V$_{3}$ B$_{4}$ D$_{6.7.10.11}$ M$_{2}$ कामः किं; D$_{5}$ G$_{2}$ M$_{8}$ कर्तव्यं(D$_{5}$ G$_{2}$ °व्यः) (for कः कामः). T$_{4}$ प्रीतये; M$_{8}$ प्रीयते (for क्रियतां). D$_{8.12}$ इति (for तव). T$_{1.2}$ G$_{1.3}$ M$_{3}$ ब्रूहि सर्वं वरानने. ❀ Ct: किंकामः किंविषयो मनोरथः. ❀

23 Ś om. 23^{ab} (cf. v.l. 22). —^{a}) Ñ$_{2}$ B$_{1.2.4}$ D$_{6.7.10.11}$ Ct स्मितं कृ(D$_{6}$ श्रु)त्वा (for प्रहसन्ती). D$_{8.12}$ च; G$_{2}$ [इ]व; G$_{3}$ [इ]ति (for तु). —^{b}) D$_{5}$ T$_{4}$ G$_{2}$ M$_{8}$ राघवं वाक्यमब्रवीत्. ❀ Ct: स्मितं कृत्वा। स्वावतारकृत्यं पूर्णमिति ब्राह्मणशापस्य सत्यत्वकरणौचित्यं च हासेन सूचितम्. ❀ —For 23^{ab}, Ñ$_{1}$ V$_{1}$ D$_{1-4.9}$ subst.:

801* सीतापि सस्मितं वाक्यमुवाच मधुराक्षरम् ।
[Ñ$_{1}$ संमितं (for सस्मितं).]

—^{c}) D$_{5}$ तेषां (for तपो-). Ś$_{2.3}$ Ñ$_{1}$ V$_{1.3}$ B$_{3}$ D$_{1-4.8.9.12}$ M$_{7}$ रम्याणि (for पुण्यानि). B$_{4}$ आश्रमाणि पवित्राणि.

24 V$_{3}$ om. 24. —^{a}) V$_{1}$ T$_{3}$ G$_{2}$ M$_{1.2.5.6.8.9}$ -तीर-; M$_{4.7.10}$ -कूल- (for -तीरे). Ś Ñ$_{1}$ V$_{1}$ D$_{1-5.8.9.12}$ T$_{3.4}$ M$_{7.10}$ निविष्टानाम् (for निविष्टानि). Ñ$_{2}$ B$_{1.2}$ D$_{6.7.10.11}$ गंगातीरोपविष्टानाम् (Ñ$_{2}$ B$_{1}$ D$_{6}$ °नि). —D$_{11}$ reads 11^{b} in marg. —^{b}) B$_{3}$ D$_{2.9}$ M$_{1}$ मुनीनां (for ऋषीणां). Ś Ñ V$_{1}$ B$_{1.2.4}$ D$_{1-4.6-12}$ T$_{4}$ L (ed.) उग्र(D$_{8}$ अग्नि; L[ed.] उग्र) तेजसां; M$_{1}$ भावितात्मनां (for पुण्यकर्मणाम). —^{c}) Ñ B$_{1.2.4}$ D$_{7.10.11}$ देव; M$_{5}$ राम (for वीर). —^{d}) Ñ$_{1}$ समीपे परि-; B$_{3}$ फलमूलैश्च; T$_{3}$ पादमूले तु (for पादमूलेषु). B$_{4}$ पादमूलमुपासितुं. —For 24^{cd}, Ś V$_{1}$ D$_{1-4.8.9.12}$ T$_{4}$ subst.:

802* वन्यमाहारमिच्छामि समीपे परिवर्तितुम् ।
[V$_{1}$ D$_{1-4.9}$ T$_{4}$ वन्याहारा(D$_{2}$ °रे; D$_{9}$ °नाम)हम् (for वन्यमाहारम्).]

25 ^{ab}) B$_{1.2.4}$ पर एष हि कामो मे; G (ed.) पर एव हि मे कामो (for ^{a}). Ñ$_{1}$ यत्पूर्वं (for यन्मूल-). B$_{1}$ om. -फल-. Ñ B$_{2-4}$ D$_{6.7.10.11}$ -भोजिनां; V$_{1}$ B$_{1}$ D$_{1.2}$ T$_{4}$ -भोजनं (D$_{2}$ °नः); D$_{3.4.9}$ -भोजना (for -भोजिषु). Ś D$_{8.12}$ एष मे नृप कामोऽद्य फलमूली(Ś$_{1}$ D$_{9}$ °ले)यभोजने. —^{c}) V$_{3}$ अप्येष; D$_{1.4}$ अथैक-; D$_{5}$ अथैक-; G$_{2}$ अनेक-; M$_{8}$ उष्येत (for अप्येक-). Ñ$_{2}$ B$_{4}$ D$_{6.7.10.11}$ Ct -रात्रिं (for -रात्रं). ❀ Ct: अप्येकरात्रिमित्यनेन चिरकालवासमनोरथो ध्वनितः. ❀ —Ñ$_{2}$ om. (hapl.?) 25^{d}–27^{a}. —^{d}) V$_{3}$ D$_{5}$ T$_{1.2}$ G$_{2.3}$ M$_{1.3.6.8}$ -कीर्तिषु; T$_{3}$ M$_{2.4.5.7.9.10}$ -शीलिषु (for -शालिषु). Ś Ñ$_{1}$ V$_{1}$ B D$_{1-4.6-12}$ T$_{4}$ नि, B$_{1}$ सं)वसेयं(B$_{3}$ वसेयं वै) तपोवने (D$_{9}$ °नं). —After 25, B$_{4}$ ins.:

803* दृष्टं पूर्वं त्वया सार्धं यद्यप्रियतमं विभो ।
तत्पुनर्द्रष्टुमिच्छामि मुनिपत्नीसमागमम् ।

26 Ñ$_{2}$ om. 26 (cf. v.l. 25). —^{a}) Ś D$_{8}$ परिज्ञातं; V$_{3}$ B$_{4}$ प्रतिज्ञाय (for प्रतिज्ञातं). —^{b}) D$_{9}$ -कारिणा (for -कर्मणा). B$_{3}$ राघवेण महात्मना. —^{c}) Ś Ñ$_{1}$ V$_{1.3}$ B D$_{1-5.9-11}$ विश्रब्धा; Cg.k.t as in text (for विस्रब्धा). —^{d}) T$_{2}$ G$_{2}$ M$_{3.8-10}$ [अ]संशयः (for [अ]संशयम्). Ś V$_{1}$ B$_{2}$ D$_{1-4.8.9.12}$ T$_{4}$ श्वो(D$_{8}$ त्वं) यास्यसि(B$_{2}$ °स्यामि) तपोवनं; Ñ$_{1}$ B$_{1.3}$ श्वो याता(Ñ$_{1}$ गच्छ; B$_{3}$ गंता)सि तपोवनं; B$_{4}$ गमिष्यसि तपोवनं. —After 26, B$_{2}$ ins.:

804* इत्येवमुक्त्वा रघुवंशवर्धनः
प्रतापवान्स्वाखिलराजनन्दिनीम् ।
जगाम कक्षां स्वगृहस्य बुद्धिमा-
न्कथाः प्रकर्तुं विविधास्तथा प्रभुः ।

27 Ñ$_{2}$ om. 27^{a} (cf. v.l. 25). —^{a}) B$_{4}$ स (for तु). V$_{3}$ तु वैदेहीं; D$_{4}$ काकुत्स्थो हि (unmetric) (for तु

४२

तत्रोपविष्टं राजानमुपासन्ते विचक्षणाः ।
कथानां बहुरूपाणां हास्यकाराः समन्ततः ॥ १
विजयो मधुमत्तश्च काश्यपः पिङ्गलः कृशः ।
सुराजिः कालियो भद्रो दन्तवक्रः समागधः ॥ २
एते कथा बहुविधाः परिहाससमन्विताः ।
कथयन्ति स्म संहृष्टा राघवस्य महात्मनः ॥ ३
ततः कथायां कस्यांचिद्राघवः समभाषत ।
काः कथा नगरे भद्र वर्तन्ते विषयेषु च ॥ ४

G. 7. 46. 4
B. 7. 43. 4
L. 7. 45. 4

काकुत्स्थो). —[b]) Ñ V1 D1.3.4 वैदेहीं; V3 काकुत्स्थो; D2.9 जानकीं (for मैथिलीं). —[c]) Ñ2 अन्यत; B1–3 अन्य-(B2 °न्यं); D1 मेध्यां; D4 मध्यां; D9 संध्यं (for मध्य-). D1.4 कक्षांतरो; D8 S -कक्ष्यांतरं (for -कक्षान्तरं). Ñ2 B तस्मान् (for रामो). —[d]) Ñ B M6 स्व(Ñ1 B2 स; Ñ2 B1 सु; M6 [अ]थ)वेश्मनः; D6 सुहृद्धृतः (for सुहृद्वृतः). —After 27, Ś V1 B2 D2.3.8.9.12 ins.; while D1.4 T3.4 ins. before 7.42.1:

805* मन्त्रिभिर्मैत्रतत्त्वज्ञैर्बलमुख्यैश्च संवृतः ।

[V1 D2.9 -तत्त्वज्ञो; B3 -कुशलैर् (for -तत्त्वज्ञैर्). D2 स (for च). V1 सर्वशः (for संवृतः).];

Colophon: Ñ1 V1 D2.3.9 om. —*Kāṇḍa name*: M7 om. —*Sarga name*: Ś V3 D1.4.8.12 सीताप्रमोदः; Ñ2 B सीतादोहदः(B3 °दं); D5 सीतारामविलासः. —*Sarga no.* (figures, words or both): Ś V3 D12 om. Ñ2 B1.3 46; B2 32; B4 T3 47; D1.4 44; D5 45; D6–8.10.11 T1.2 G M1–5.7–10 42; T4 49; M6 40. —After colophon, T4 concludes with श्रीरामार्पणमस्तु; G M1.5.8 conclude with श्रीरामाय नमः; M6 with ॐ; M10 with श्रीरामचन्द्राय नमः.

42

☞ V3 missing for Sarga 42 (cf. v.l. 7.12.2). Ñ1 V1 D2.3.9 cont. the previous Sarga. —Before 1, D1.4 T3.4 ins. 805*.

1 [a]) M5 तथा; Cg.k.t as in text (for तत्र). Ś1 D8 ततोपविष्टं (archaic). Ñ1 V1 D1–4.9 T3.4 रामं तु (for राजानम्). —[b]) M3.5 उपासत. M6 पुरे जनाः (for विचक्षणाः). Ś V3 D8.12 उपासांचक्रिरे तदा; Ñ1 V1 D1–4.9 T3.4 सुहृदः पर्यु(V1 समु)पासते (T3.4 °सिरे). —For 1[ab], Ñ2 B subst.; while Ñ1 ins. before 1:

806* उपविष्टस्ततो रामः सुहृद्भिः परिवारितः

—[c]) Ś V3 D8.12 -जल्पानां (for -रूपाणां). M2.4.7–10 कथाभिर्बहुरूपाभिर्. —[d]) Ś V3 D8.12 M6 कथा(M6 हास्य)कारा: सुखं(V3 समा)हिताः; Ñ1 V1 D1–4.9 शृण्वानं (D1–4 °नः) सारचित्र(V1 °त्रि)तां; Ñ2 B अशृणोत्सार(B2.4 °णोत्स च)विस्तरं. ❀ Cg (within brackets): उपासन्ते उपासते। धात्वन्तरस्येदं रूपं वा।; Ck: कथानां बहुरूपाणामिति। प्रकथनद्वारेणेति शेषः। हास्यकारा इति। कर्मण्यण्।; Ct: बहुरूपाणां कथानां प्रकथनद्वारेण हास्यकारा उपासन्ते. ❀

2 [a]) T3 विलयो (for विजयो). ÑB [s]थ सुमंत्रश्च; V1 D1–4.9 T3.4 मधुमांश्चैव; V3 मतियुक्तश्च G1 M2 मधुमंतश्च (for मधुमत्तश्च). —[b]) Ś1 Ñ1 V1.3 B1.2.4 D1.3–5.8 T3 कश्यपः; D2.9 विशिष्टः (for काश्यपः). D5.7.10.11 मंगलः; M4 विजयः (for पिङ्गलः). G2 transp. काश्यपः and पिङ्गलः. Ś Ñ2 B1.2.4 D8 तथा; Ñ1 D5 7.10.11 कुलः; V3 ततः; B3 M6 शुभः; D1.4.12 सुतः; D2.9 कुहुः; D3 क्षमः; D6 T1.2 M1.3 कुटः; T3.4 कुरुः (for कुशः). —[c]) D5–7 पुराजिः(D6 °जीः); T1.3 M3 सुराजः (for सुराजिः). B1 कलियो; B2.4 M6 कालि(M6 °ल)को; B3 कपिलो (for कालियो). Ś V3 D8.12 L(ed.) पशुराजी(L[ed.]°जिः) कलिर्भद्रो; Ñ1 V1 D1–4.9 T3.4 सुराजी(D1 °जि; T3.4 °ज)-कश्च भद्रश्च. —[d]) Ñ1 V1 D1–4.9 T3.4 वज्रदंतो. Ś D8.12 दंतवज्रः स-; Ñ2 V3 B1 D5–7.10.11 T2 G2.3 दंतवक्त्रः सु-(D5 °क्तुस्त्र); B2 दत्तचक्रः स-; B3 दंतो रवः सु-; B4 दंतो वक्त्रः स-(for दन्तकवः स-). Ñ1 D1.3.4 [s]थ मागधः; V1 T3.4 [s]थ माधवः; D2.9 च मागधः; T1 G1 M(except M3) सुमागधः.

3 [a]) Ñ B उपविष्टा; D8 एते कथां (for एते कथा). D5 बहुविदः; D6 बहुविधां. ❀ Cg (within brackets): कथाः अतीतवार्ताः।; Ct: कथा वार्ताः. ❀ —[b]) D6 -समन्वितां. —[c]) Ś D8.12 स्म ते हृष्टा; Ñ1 कथां तत्र; Ñ2 B1.2.4 स्म रामस्य; V1 D1–4.9 T3.4 नरेंद्रस्य; B3 स्म हृष्टास्ते; M1.4.7.10 सुसंहृष्टा (for स्म संहृष्टा). —[d]) D11 reads स्म महात्मनः in marg. Ñ2 B1.2.4 कथास्तत्र(Ñ2 °स्य) (for राघवस्य). Ñ1 V1 D1–4.9 T3.4 समीपतः (for महात्मनः).

4 D11 om. 4–7. —[b]) Ñ B1.2.4 तानभाषत; D1.4 प्रत्य° (for समभाषत). —B4 om. 4[cd]. —[c]) Ś Ñ1 V3 D5.8.12 T1.2 G1.3 M1.3 का कथा. Ś Ñ1 D8.12 वर्तते भद्र; Ñ2 B1–3 इह वर्तते (for नगरे भद्र). V1 D1–4.9 T3.4 वर्तते का कथा भद्र(V1 तत्र). —[d]) Ś V3 D5.8.12 T1.2 G3 M1.3 वर्तते (for वर्तन्ते). T2 M5 विजयेषु; M1 नगरेषु; Cg.k.t as in text (for विषयेषु). Ñ V1 B1–3 D1–4.9 T3.4 पुरे ज(D2.9 जा)नपदे तथा; G1 विषयेषु च वर्तते; M6 वर्तते पुरवासिनां. ❀ For Cv cf. 5. Cg.t: विषयेषु देशेषु(Ct °त्रिति सामान्यतः प्रश्नः)।; Ck: विषयेषु राज्ञां विजयविषयेषु का कथा प्रवर्तते। सामान्यात्. ❀

G. 7. 46. 5
B. 7. 43. 5
L. 7. 45. 5

मामाश्रितानि कान्याहुः पौरजानपदा जनाः ।
किं च सीतां समाश्रित्य भरतं किं नु लक्ष्मणम् ॥ ५
किं नु शत्रुघ्नमाश्रित्य कैकेयीं मातरं च मे ।
वक्तव्यतां च राजानो नवे राज्ये व्रजन्ति हि ॥ ६
एवमुक्ते तु रामेण भद्रः प्राञ्जलिरब्रवीत् ।
स्थिताः कथाः शुभा राजन्वर्तन्ते पुरवासिनाम् ॥ ७

अयं तु विजयः सौम्य दशग्रीववधाश्रितः ।
भूयिष्ठं स्वपुरे पौरैः कथ्यते पुरुषर्षभ ॥ ८
एवमुक्तस्तु भद्रेण राघवो वाक्यमब्रवीत् ।
कथयस्व यथातथ्यं सर्वं निरवशेषतः ॥ ९
शुभाशुभानि वाक्यानि यान्याहुः पुरवासिनः ।
श्रुत्वेदानीं शुभं कुर्यां न कुर्यामशुभानि च ॥ १०

5 D_{11} om. 5 (cf. v.l. 4). —[a]) Ś D_5 $G_{1.3}$ M_6 मम; D_8 सम-; D_{12} राम- (for माम्). V_3 तानि (for कानि). Ñ$_1$ V_1 $D_{1-4.9}$ $T_{3.4}$ मय्याश्रिता(T$_{3.4}$ °तां) वा किं चाहुः; Ñ$_2$ मदाश्रयं किं किमाह; B_1 मदाश्रया कथायां तु; $B_{2.4}$ G (ed.) मदाश्रया वा काश्चाहुः (B$_4$ का आह; G [ed.] काः प्राह); B_3 मदुपाश्रिता का आहुः. ❀ Cv: वर्तन्ते विषयेषु च। मामाश्रिता नीति च पाठः. ❀ —[b]) Ñ$_1$ पौरा (for पौर-). Ñ$_2$ $B_{1.4}$ -जानपदो; B_3 -जानपदांस्. Ñ$_2$ $B_{1.4}$ जनः; V_1 (m. also as in text) B_3 तथा; G_2 नराः (for जनाः). —[c]) D_8 कां (for किं). $B_{1.4}$ वा; G_1 M_{10} नु (for च). B_2 किं सीतां वा; $D_{2.9}$ किंचित्सीतां; G_2 किंचित्कथां (for किं च सीतां). —[d]) Ś Ñ V_3 B $D_{5-8.10.12}$ M_6 च (for नु). V_1 $D_{1-4.9}$ $T_{3.4}$ भ्रातृनाश्रित्य (D_1 om. [hapl.]) किं च मे (V_1 किंचन; $D_{1.3.4}$ वा सखे).

6 D_{11} om. 6 (cf. v.l. 4). V_1 om. (hapl.?) 6[a-b]. —[a]) Ś V_3 $D_{8.12}$ M_6 च (for नु). $D_{5-7.10}$ उद्दिश्य (for आश्रित्य). Ñ B $D_{1-4.9}$ $T_{3.4}$ कैकेयीं(Ñ B शत्रुघ्नं) च (D_2 किं) सुमित्रां च. —[b]) $D_{1-4.9}$ $T_{3.4}$ कौशल्यां (for कैकेयीं). D_1 भरतमेव च; (hypm.); $D_{3.4}$ भरतं च मे; $D_{5-7.10}$ किं नु(D_5 तु) मातरं (for मातरं च मे). —[c]) Ś V_3 $D_{8.12}$ हि (for च). V_1 $D_{1-4.9}$ $T_{3.4}$ नृपतयो (for च राजानो). —[d]) $D_{1.4.6.7.10}$ T_{2-4} Ck.t वने(Ck °रे); M_8 न वै; Cg as in text (for नवे). T_3 राज्ञो (sic) (for राज्ये). $D_{2.9}$ वै राज्येन; D_5 न वै राज्यं (for नवे राज्ये). V_1 $D_{1-4.9}$ $T_{3.4}$ प्रयांति; Cg.t as in text (for व्रजन्ति). Ś$_1$ $D_{6.7.10}$ Ct च; $V_{1.3}$ ह; Cg as in text (for हि). ❀ Cg: किं न्विति। वक्तव्यतां च राजानो नवे राज्ये व्रजन्ति हीति च पाठः। नवे राज्ये सति राजानो वक्तव्यतां सम्यगसम्यग्वा कीर्तनीयतां व्रजन्ति हि।; Ck: वरे राज्ये वक्तव्यतां रक्षाप्रसङ्गेन कीर्तनीयतामित्यर्थः।; Ct: वने तापसाश्रमे राज्ये च धर्मादिविचारहीना राजानो वक्तव्यतां सर्वजनकृतदुर्भाषणविषयतां व्रजन्ति. ❀ —For 6[c-d], Ñ B subst.:

807* कथयन्ति गुणान्यांस्तु दोषान्वा ब्रूत तन्मम।

[Ñ$_1$ योन्ये (for यांस्तु). $B_{1.3}$ ब्रूहि (for ब्रूत). B_{1-3} तान् (for तन्).]

—Then B_2 cont.:

808* न च शङ्का त्वया कार्या सर्वं च परिकथ्यताम्।

7 D_{11} om. 7 (cf. v.l. 4). Ś$_1$ D_8 om. (hapl.) 7-8. —[a]) Ś$_2$ उक्त्वा(sic); B_3 $D_{1-4.9.12}$ T G_3 $M_{3.5}$ उक्तस् (for उक्ते). —[b]) M_1 वचनम् (for प्राञ्जलिर्). —After 7[a-b], $D_{1.4}$ ins. a long passage relegated to App. I (No. 6). —[c]) $D_{5.10}$ M_6 शुभाः कथा (by transp.) (for कथाः शुभा). Ś$_2$ Ñ $V_{1.3}$ $B_{3.4}$ $D_{1.3.4}$ $T_{3.4}$ शुभाशुभाः (B$_3$ °भ)कथा राजन्; Ś$_3$ $B_{1.2}$ $D_{2.9.12}$ शुभाः शुभाः कथा राजन्; G_2 स्थिताः शुभ्राः कथा राम. —[d]) T_1 G_3 M_8 विजयं; $G_{1.2}$ $M_{1.5}$ विषये (for वर्तन्ते). V_1 $D_{1-4.9}$ $T_{3.4}$ क्रियंते पुरवासिभिः.

8 Ś$_1$ D_8 om. 8 (cf. v.l. 7). M_5 om. 8[a-b]. —[a]) K (ed.) अमुं (for अयं). L (ed.) च (for तु). $D_{10.11}$ Ck.t विजयं (for विजयः). ❀ Ck.t: विजयमिति। उद्दिश्येति शेषः. ❀ —[b]) Ñ $B_{1.2.4}$ -वधाश्रयः; V_1 -वधे तथा; D_1 -वधस्तदा; $D_{2.9}$ -वधस्तथा; $D_{3.4}$ $T_{3.4}$ वधः सदा; D_{5-7} M_3 -वधार्जितः; $D_{10.11}$ -वधार्जितं; G_1 -समाश्रितः (for -वधाश्रितः). —[c]) Ñ$_2$ $B_{1.2}$ G_2 $M_{5.6}$ भूयिष्ठः. Ñ$_1$ V_1 $D_{1-4.9}$ $T_{3.4}$ कथ्यते; D_5 स्वपुरं; T_2 स्वपुरैः; L (ed.) तु पुरे (for स्वपुरे). —[d]) Ñ$_2$ V_3 $B_{3.4}$ $D_{5.11.12}$ T_1 G_2 $M_{2.4.5.8.10}$ Ct कथ्यंते. M_1 भरताग्रज (for पुरुषर्षभ). Ñ$_1$ V_1 $D_{1-4.9}$ $T_{3.4}$ पुरे ज(D$_{2.9}$ पौरजा)नपदे(D_9 दैस्) तथा. ❀ Ct: कथ्यन्ते। वार्ता इति शेषः. ❀

9 [a]) G_1 $M_{1.2.7.8}$ उक्ते (for उक्तस्). —[b]) $D_{1.3.4}$ रामः प्राह वचस्तदा; $T_{3.4}$ रामो वाक्यमथाब्रवीत्; M_1 रामो वचनमब्रवीत्. —B_4 om. (hapl.) 9[c]–10. —[c]) Ñ V_1 B_{1-3} कथय त्वं. V_3 $D_{2-4.6.7.9-11}$ $T_{1.2}$ $M_{1.3}$ यथातत्त्वं; D_1 यथा वृत्तं; G_2 कथास्तत्त्वं (before corr. °थ्यं); M_8 कथाः कथ्यं (for यथातथ्यं). —[d]) G_1 श्रुतं (for सर्वं). Ś$_1$ D_8 सर्वमे (D$_8$ °मि)व विशेषतः; Ñ V_1 $B_{1.2}$ $D_{1-4.9}$ $T_{3.4}$ किमाहुः पुरवासिनः; D_5 सर्वं निरवरोधतः.

10 B_4 om. 10 (cf. v.l. 9). —[a]) Ś $D_{8.12}$ शुभानि वाक्यानि मयि. —[b]) Ś V_3 $D_{5.8.10-12}$ $M_{6.7}$ कान्याहुः; Ñ$_1$ V_1 $D_{1-4.9}$ $T_{3.4}$ यानि मे (for यान्याहुः). Ñ V_1 $B_{1.2}$ $D_{1-4.9}$ $T_{3.4}$ गुणदोषतः. —[c]) M_6 श्रुत्वैतानि. D_8 M_7 शुभां (for शुभं). $D_{2.9}$ वाक्यं (for कुर्यां). —[d]) D_6 अकुर्याम्. Ñ$_2$ B_{1-3} अशुभं च(Ñ$_2$ न [sic]; B_1 हि) यत् (for अशुभानि च). Ñ$_1$ V_1 $D_{1-4.9}$ $T_{3.4}$ वर्जयेयम(D_4 च य)थाशुभं.

Arya Research Team

कथयस्व च विस्रब्धो निर्भयो विगतज्वरः ।
कथयन्ते यथा पौरा जना जनपदेषु च ॥ ११
राघवेणैवमुक्तस्तु भद्रः सुरुचिरं वचः ।
प्रत्युवाच महाबाहुं प्राञ्जलिः सुसमाहितः ॥ १२
शृणु राजन्यथा पौराः कथयन्ति शुभाशुभम् ।
चत्वरापणरथ्यासु वनेषूपवनेषु च ॥ १३
दुष्करं कृतवान्रामः समुद्रे सेतुबन्धनम् ।
अकृतं पूर्वकैः कैश्चिद्देवैरपि सदानवैः ॥ १४
रावणश्च दुराधर्षो हतः सबलवाहनः ।
वानराश्च वशं नीता ऋक्षाश्च सह राक्षसैः ॥ १५
हत्वा च रावणं युद्धे सीतामाहृत्य राघवः ।
अमर्षं पृष्ठतः कृत्वा स्ववेश्म पुनरानयत् ॥ १६
कीदृशं हृदये तस्य सीतासंभोगजं सुखम् ।
अङ्कमारोप्य हि पुरा रावणेन बलाद्धृताम् ॥ १७
लङ्कामपि पुनर्नीतामशोकवनिकां गताम् ।
रक्षसां वशमापन्नां कथं रामो न कुत्सते ॥ १८
अस्माकमपि दारेषु सहनीयं भविष्यति ।
यथा हि कुरुते राजा प्रजा तमनुवर्तते ॥ १९

G. 7. 46. 19
B. 7. 43. 19
R. 7. 45. 19

11 ^{a}) Ñ B1.2.4 कथय त्वं; D4 कथयंति. Ñ B1.2.4 D2.9 सु-; D4 स्व-; M1 स- (for च). V1 D4.9 T3.4 विस्रब्धं; B1.2 D6.7 -विश्रब्धो; D1-3 विश्रब्धं (for विस्रब्धो). —^{b}) D10.11 Ct निर्भयं. —^{c}) Ś Ñ V1.3 B D1.3-12 T3.4 M3.6 कथयंति. Ñ2 पुरे; B2 कथाः (for यथा). —^{d}) Ñ1 B M6 पुरे; Ñ2 यथा; D5-7 नाना-; D10.11 Ct पापा (for जना). Ñ1 B4 वा; D5-7 वै (for च). V1 D1-4.9 T3.4 तथा (D9 T3.4 °दा) जा (T3 ज) नपदा जनाः (D3.4 °दो जनः). ❀ Ct: पापाः पापानि. ❀

12 ^{a}) V1 D1-4.9 T3.4 काकुत्स्थेन (for राघवेण). —^{b}) D2 तु (for सु-). Ś V3 D8.12 प्रह्वः कृतांजलिः; D1.3.4 शुभतरं वचः (for सुरुचिरं वचः). D9 सुभद्रः सुचिरं वचः. —^{cd}) B3 -घोरं; G1 -बाहुः (for -बाहुं). Ś V3 D8.12 काकुत्स्थं (for प्राञ्जलिः). Ñ B1.2.4 वाक्यकोविदः; G1 M1.2.4.5.7.9.10 पृथिवीपतिं (for सुसमाहितः). V1 D1-4.9 T3.4 उवाच प्रांजलिर्भूत्वा राघवं वाक्यकोविदः (V1 D3 T3.4 °दं).

13 ^{a}) B3 राजन्यथा कथाश्चक्रुः. —^{b}) B3 शृणु पौरा (for कथयन्ति). Ś D8.12 शुभं (D8 °भे) त्वयि; V1.3 B3 D5 शुभाशुभाः. —^{c}) B3.4 चत्वरांगण-; M2 चत्व * * *-; G (ed.) चत्वरायन- (for चत्वरापण-). V1 T1.2 G3 M3 -वीथीषु; G2 -मुख्यासु (for -रथ्यासु). —^{d}) B3 प्रपासु (for वनेषु). D9 om. -पवनेषु च.

14 ^{a}) V3 B3 D1.3.4 दुष्कृतं (for दुष्करं). —^{b}) Ś D8.12 सागरे सेतुबंधने. —Ś V1 D8.12 T3.4 om. 14^{cd}. —^{c}) V3 D1-4.9 T1 G2 M10 न कृतं; D5-7.10.11 Ct अश्रुतं (for अकृतं). V3 D1.4 पौर्वकैः; D3 पूर्वजैः (for पूर्वकैः). G2 कश्चिद् (for कैश्चिद्). Ñ1 अकृतपूर्वं यैः कैश्चित्. —^{d}) G1 सवासवैः (for सदानवैः). Ñ V3 B सेंद्रैः (V3 B4 सर्वैः) रपि सुरासुरैः; D1.3.4 ईदृशं चाद्भुतं महत्; D2.9 समुद्रे सेतुबंधनं; M6 सुरैरपि सुदुष्करं.

15 ^{a}) Ś D1.3.4.8.12 स; Ñ1 सु-; V3 M1 तु (for च). —^{c}) D1.4 वशे (for वशं). —^{d}) B1.2 राक्षसैः सह (by transp.); M1 सह वानरैः. Ś V3 B3 D8.12 M6 हत्वा (V3 B3 M6 ऋक्ष) रक्षांसि चैव हि; Ñ तथाक्ष्वा राक्षसैः सह.

16 ^{a}) D5 हत्वैव; T1.2 G3 स हत्वा; G1 हत्वा तं (for हत्वा च). D5-7.10.11 M1 संख्ये (for युद्धे). T3.4 किं तु हत्वा दशग्रीवं. —^{b}) B2 आदाय; L (ed.) आदत्य (for आहृत्य). —^{d}) V3 स्वं; D8 M8 सु- (for स्व-). Ś V3 D8.12 पुनरागमत् (Ś2.3 °गतं); Ñ1 V1 D1-4.9 प्रत्यपादयत्; M4.6.7.10 पुनराविशत् (M6 °हरत्); M5 कथमानयत्; L (ed.) पुनरान्नयत् (for पुनरानयत्). Ñ2 B स्वं प्रावेशयदालयं.

21 a) Ñ1 V1.3 D1–5.9 ततो; D6 अर्ध- (for अथ). V1 D2.5.9 [अ]र्धं (for [अ]र्धं-). M2.4.7.9 -दिवसे (for -दिवसं). —b) D1 T1.2 G1.3 M1.5 भागीरथि- (for भागीरथ्या). D5 T2 जलाशयं (for जलाशयम्). Ñ B प्राप्य भागीरथीं नदीं. —After 21ab, G2 ins. 856*. —c) B वीरः; D2.9 G3 दीनं; M6 धीरः (for दीनः). —d) V3 रुरोद च; D3.5 स रुरोद (for प्ररुरोद). Ś3 B2.3 D6.7.10.11 महास्वनः; B1 G (ed.) स(G [ed.] म)हास्मवान् (for महास्वनम्).

Arya Research Team

G. 7. 49. 23
B. 7. 46 25
L. 7. 48. 23

सीता तु परमायत्ता दृष्ट्वा लक्ष्मणमातुरम् ।
उवाच वाक्यं धर्मज्ञ किमिदं रुध्यते त्वया ॥ २२
जाह्नवीतीरमासाद्य चिराभिलषितं मम ।
हर्षकाले किमर्थं मां विषादयसि लक्ष्मण ॥ २३
नित्यं त्वं रामपादेषु वर्तसे पुरुषर्षभ ।
कच्चिद्विनाकृतस्तेन द्विरात्रे शोकमागतः ॥ २४

ममापि दयितो रामो जीवितेनापि लक्ष्मण ।
न चाहमेवं शोचामि मैवं त्वं बालिशो भव ॥ २५
तारयस्व च मां गङ्गां दर्शयस्व च तापसान् ।
ततो धनानि वासांसि दास्याम्याभरणानि च ॥ २६
ततः कृत्वा महर्षीणां यथार्हमभिवादनम् ।
तत्र चैकां निशामुष्य यास्यामस्तां पुरीं पुनः ॥ २७

22 [a]) Ś Ds.12 हि; B2 सा; M3 यं (for तु). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 लक्ष्मणं दृष्ट्वा; Ñ2 B2.4 परम (B4 °मा) त्रस्ता; B1 परमावस्थां; T1 M3.6 परमायस्ता (for परमायत्ता). —Ñ2 illeg. for 22[b]. —[b]) Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 रुदंतं परमातुरं. —[c]) L (ed.) वचनं (hypm.) (for वाक्यं). Ś Ñ V1.3 B2–4 D1.3–5.7.8.10.11 T3.4 M5.6.8.10 धर्मज्ञा; T1.2 M3 धर्मज्ञं; G1 धर्मात्मन् (for धर्मज्ञ). —[d]) B किमर्थं (B3 °हा) (for किमिदं). Ñ1 V1.3 D2.3.5.9 पथि (for त्वया).

23 [a]) M4.7 आश्रित्य (for आसाद्य). —[b]) Ñ1 चिंताभि- (for चिराभि-). M6 मया (for मम). Ñ2 V1.3 D2.5.9 T3.4 प्रीतिर्हि मम वर्त (D2.9 विद्य; D5 वर्ध)ते; D1 प्रीतिर्हि वर्धते बहु; D3.4 प्रीतिर्हि समवर्धते (D4 °त). —[c]) Ñ1 V1 D1–5.9 T3.4 त्वं; M6 मे (for मां).

24 D5 T1 om. (hapl.) 24–25[b]. —[a]) M6 तु (for त्वं). D6.7.10.11 Cg -पार्श्वेषु; M3 -पार्श्वे तु; M5 -पादाभ्यां (for -पादेषु). Ś D8.12 वर्तयसे भ्रातुः; Ñ V1.3 D1.3.4 T3.4 च (Ñ2 त्वं) वर्तसे भ्रातुः; B त्वं पादयोर्भ्रातुः; D2.9 स्मरसि किं भ्रातुः (for त्वं रामपादेषु). ❀ Cg: पार्श्वेऽपीति पूजायां बहुवचनम्. ❀ —[b]) Ś Ñ V1.3 D1–4.8.9.12 T3.4 पादयोः (for वर्तसे). G1 रघुनंदन (for पुरुषर्षभ). M5 सहितः सन्नरोत्तम. —After 24[ab], Ñ V3 B D3 (B4 D3 l. 1 only) ins.:

857* नित्यमेवानुरक्तस्त्वं नित्यं चैव गुणैर्वृतः ।
संभावी त्वं महाबाहो शीलवान्दक्ष एव च ।

[(l. 1) B4 चैव (for एव). B2 च (for त्वं). D3 एव (for चैव). Ñ1 गुणान्वितः; B1 गुणैर्हितः; B4 गुणैर्युतः; D3 समाश्रितः (for गुणैर्वृतः). V3 च गुणसंयुतः (for चैव गुणैर्वृतः). —(l. 2) Ñ1 damaged for संभावी त्वं.]

—D1.4 read 24[cd] twice. —[c]) T3.4 क्वचिन्; G2.3 किंचिद् (for कच्चिद्). B1.2 निराकृतस्; D1 (first time) तिरस्कृतस् (for विनाकृतस्). Ś Ñ1 V1.3 D2.4 (second time).8.9.12 न तद्विनाभावात्; Ñ2 तदविना भ्रातुस्; D1 (second time) तं विना सौम्य (subm.); T3.4 न त्वां विना भ्राता (for विनाकृतस्तेन). —[d]) B य (B4 त)स्मात्ते; D1.4 (both first time) वनांते; D6 M10 सौमित्रे; D7.10.11 M1 द्विरात्रं; T2 M3 °त्राच्; M8 चिरं ते; G (ed.) यस्मात्तु (for द्विरात्रे). B1.2.4 D1.4 (D1.4 first time); G1 M5 शोक (for शोकम्). B1 आगमत्. Ś Ñ V1.3 D1–4 (D1.4 second time).8.9.12 त्वेदं दुःखमागतं; T3.4 तत्र दुःखं कथं त्विदं. ❀ Cg.k.t: शोकमागतः कच्चित् (Cg °च्चिदित्यन्वयः). ❀

25 D5 T1 om. 25[ab] (cf. v.l. 24). —[a]) M6 विदितो (for दयितो). Ś V1.3 B3 D1–4.8.9.12 M6 राजा; G2.3 कामो (for रामो). —[b]) Ñ V1 B1.3.4 D1.6.7.10.11 T2 G2.3 M3.10 जीविताद् (D1 °च्चा)पि; B2 जीवादपि च (for जीवितेनापि). —After 25[ab], Ś D8 ins.:

858* न चाहं तव शोचामि मा गा विक्लवतामिमाम् ।
[Ś corrupt for मा गा.]

—[c]) D2 तव (for न च). T3.4 M8 रामम् (for चाहम्). Ñ1 V1 B1 D5.10.11 एव; D2.9 M1 अपि (for एवं). M4 अस्वस्था (for शोचामि). —[d]) B यथा; D6 मैव; T1.2 G3 M3 नैव; G1.2 नैवं (for मैवं). G (ed.) [ए]व (for त्वं). Ś D8.12 बाष्पशो (corrupt) (for बालिशो). B भवान्; G1 मम (for भव). Ñ V1.3 D1–5.9 T3.4 मा गा विक्लव (Ñ2 °वि)तामिमां (cf. post. half of 858*).

26 [a]) B1 तारयाशु (for °यस्व). —[b]) D2.3 om. च (subm.). —[cd]) Ñ V1.3 B D1–5.9 M3 तेभ्यो (for ततो). Ñ1 वराणि; D6.7.10.11 T3.4 मुनिभ्यो; G (ed.) रत्नानि (for धनानि). Ś D8.12 तपोवनेषु (for ततो धनानि). Ñ1 V1.3 D1–5.9 रत्नानि (for वासांसि). B2 ददामि (for दास्यामि). K (ed.) दास्यामि वासांसि (by transp.).

27 [a]) M1 तत्र (for ततः). —[b]) D1–4.9 यथावद् (for यथार्हम्). T2 अभिवासनं (for °दनम्). —[c]) Ś D8.12 L (ed.) तथै (L [ed.] त्रै)कां च; M3 तत्र चैतां (for तत्र चैकां). Ñ B उषित्वैकां निशां तत्र; V1.3 D1–5.9 उष्य तत्र निशामेकां. —[d]) Ñ V3 B यास्यामि (for °मस्). Ś D8 M1 स्व (D8 सु)पुरीं; Ñ V1.3 B1.2.4 D1–5.9 नगरीं (V1.3 D2.9 °रं); D12 स्वपुरं (for तां पुरीं). Ñ1 B1.4 M1 ततः (for पुनः). T3.4 transp. पुरीं and पुनः. B3 पुनरेव ह (for तां पुरीं पुनः). —After 27, Ś Ñ1 V1.3 D1–5.7–12 T3.4 M3 ins.:

859* ममापि पद्मपत्राक्षं सिंहोरस्कं कृशोदरम् ।
त्वरते हि मनो द्रष्टुं रामं रमयतां वरम् ।

[(l. 1) D1.2.4.9 सिंहस्कंधे. V1 तनु- (for कृश-). —(l. 2) D1.4 मे; D7 [ऽ]ति- (for हि).]

—Thereafter D1.4 read colophon.

Arya Research Team

तस्यास्तद्वचनं श्रुत्वा प्रमृज्य नयने शुभे ।
तितीर्षुर्लक्ष्मणो गङ्गां सुखां नावमुपाहरत् ॥ २८

G. 7. 49. 30
B. 7. 46. 33
L. 7. 48. 30

इति श्रीरामायणे उत्तरकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

Arya Research Team

28 ^{a}) Ś Ñ$_2$ B$_{3.4}$ D$_{8.12}$ ततस् (for तस्यास्). V$_1$ D$_{1-4.9}$ भाषितं (for वचनं).—^{b}) D$_5$ विमृज्य; D$_9$ प्रगृह्य (for प्रमृज्य).—^{a}) Ś D$_{8.12}$ M$_1$ उपा(M$_1$ समा)नयत्; D$_{10.11}$ T$_2$ M$_{2.4.7.9}$ उपारुहत्; M$_5$ अथारुहत्; M$_6$ उपावहत् (for उपाहरत्). M$_3$ नाविकानब्रवीत्तदा. —For 28^{cd}, Ñ B$_{1.3.4}$ subst.:

860* मतिं तारयितुं चक्रे लक्ष्मणो मैथिलीं तदा ।

—Ñ$_1$ cont.; V$_{1.3}$ D$_{1.2}$(reads after colophon)$_{.3-5}$ T$_{3.4}$ subst. for 28^{cd}; Ñ$_2$ cont. after 863*; D$_{7.10.11}$ ins. after 28^{ab}; D$_9$ ins. before 46.1:

861* नाविकानाह्वयामास लक्ष्मणः परवीरहा ।
इमे स्म सज्जा नौश्रेति दाशाः प्राञ्जलयोऽब्रुवन् ।

[Ñ$_1$ V$_3$ om. l. 2. —(l. 2) D$_{7.10.11}$ इयं च (for इमे स्म). D$_{1.3.4.9}$ सज्ज (for सज्जा). T$_{3.4}$ इयं सज्जा सु- (for इमे स्म सज्जा). Ñ$_2$ V$_1$ D$_{2.5.9}$ चेयम् (for चेति). Ñ$_2$ V$_1$ D$_{2.5.9}$ इति ते तमथाब्रुवन् (for the post. half).]

—For 28^{cd}, D$_9$ subst.; D$_{6.7.10.11}$ M$_{2.3.7}$ ins. after 28; M$_9$ cont. after 865*:

862* गङ्गां संतारयामास लक्ष्मणस्तां समाहितः ।

[D$_9$ स स्वरयामास (for संतारया°) and परवीरहा (for तां समाहितः).]

—For 28, B$_2$ subst.; Ñ$_2$ B$_3$ cont. after 860*:

863* श्रुत्वा तु तस्या वचनं महात्मा
प्रमृज्य नेत्रे रुचिरे तदानीम् ।
स लक्ष्मणो लक्ष्मिविवर्धनोऽथ
नावं समानाय यथादरेण ।

[(l. 4) Ñ$_2$ B$_3$ यदा(B$_3$ तथा)दरेण (for यथादरेण).]

—After 28, M$_3$ ins.:

864* शीघ्रमानयताद्यैव नावं रम्यामलंकृताम् ।
तस्य तद्वचनं श्रुत्वा दाशाः प्राञ्जलयोऽब्रुवन् ।
सज्जा नौरियमस्तीति सौमित्रिं तं ससंभ्रमाः ।;

while, M$_9$ ins.:

865* सीतां चापि समारोप्य तापसालोकनोत्सुकाम् ।

Colophon: Ñ V$_1$ B$_{1.4}$ D$_5$ om.. —*Kāṇḍa name*: D$_{2.9}$ M$_7$ om.—*Sarga name*: Ś D$_{8.12}$ सीताधिवासः; V$_3$ सीतावनगमनः; B$_2$ सीतानिर्वासः; B$_3$ सीतानिर्वासनं; D$_{1.2}$ सीतावनवासः; D$_{3.4}$ सीतावनवासगमनं; D$_9$ सीताविवासनं; L (ed.) सीताविवासः. —*Sarga no.* (figures, words or both): Ś V$_3$ B$_3$ D$_{2.12}$ om.; B$_2$ 34; D$_{1.3.4}$ 47; D$_{6.7.10.11}$ T$_{1.2}$ G M$_{1-5.8-10}$ 46; D$_9$ 51; T$_3$ 53; T$_4$ damaged; M$_6$ 44; M$_7$ 36. —After colophon, T$_4$ concludes with श्रीरामार्पणमस्तु; G M$_{1.5.8}$ with श्रीरामाय नमः; M$_{10}$ with श्रीरामचन्द्राय नमः.

४६

G. 7. 49. 31
B. 7. 47. 1
L. 7. 49. 1

अथ नावं सुविस्तीर्णां नैषादीं राघवानुजः ।
आरुरोह समायुक्तां पूर्वमारोप्य मैथिलीम् ॥ १
सुमत्रं चैव सरथं स्थीयतामिति लक्ष्मणः ।
उवाच शोकसंतप्तः प्रयाहीति च नाविकम् ॥ २
ततस्तीरमुपागम्य भागीरथ्याः स लक्ष्मणः ।
उवाच मैथिलीं वाक्यं प्राञ्जलिर्बाष्पगद्गदः ॥ ३
हृद्गतं मे महच्छल्यं यदस्म्यार्येण धीमता ।
अस्मिन्निमित्ते वैदेहि लोकस्य वचनीकृतः ॥ ४
श्रेयो हि मरणं मेऽद्य मृत्योर्वा यत्परं भवेत् ।
न चास्मिन्नीदृशे कार्ये नियोज्यो लोकनिन्दिते ॥ ५

46

☞ V2 missing for Sarga 46 (cf. v.l. 7.12.2). Ñ V1 B1.4 D5 cont. the previous Sarga.

1 Before 1 D9 ins. 861*.—a) V1.3 D1–5.9 ततो (for अथ). Ś D8.12 M6.10 सुसंस्तीर्णां; B3 समानीतां; D2 सुखास्तीर्णां; D4.5 G (ed.) तु (G [ed.] प्र)विस्तीर्णां; T1.2 सुनिस्तीर्णां.—b) Ñ1 नैषादां. V1 इति राघवः (for राघवानुजः). B3 निषादेन स लक्ष्मणः. ❀ Cg.k: निषादस्य गृहस्येयं नैषादी (Cg °दीं ताम्); Ct: नैषादीं निषादोपनीताम्. ❀ —c) Ś B2.3 D8.12 सुसंयुक्तां; D6 समायत्तां (for समायुक्तां).—d) D12 आरुह्य (for आरोप्य).—For 1cd, Ñ V1.3 D1–5.9 subst.:

866* आरोप्य सीतां प्रथमं सोप्यारोहन्महारथः ।

[Ñ2 प्रथमं सीतां (by transp.). D1.3.4 [अ]भि- (for [अ]पि). Ñ V1 D1.4.9 [अ]रोहन्. D5 आरोहत्स; D9 सोनुरोह (for सोप्यारोहन्).]

2 a) M4 damaged for व सरथं. Ś Ñ V1.3 B1.2.4 D1–5.8.9.12 T3.4 [अ]पि (for [ए]व). D1.3.4 सुरथं; G (ed.) स्वरथे. T1.2 G3 सारथिं चैव (for चैव सरथं).—b) D12 अपि (for इति). D5 आह्वयतेति (corrupt) (for स्थीयतामिति).—Ś1 V1.3 D8 om. (hapl.) 2c–3b.—d) G1 प्राह याहीति (for प्रयाहीति च). Ñ1 D1–5.9 नाविकांश्चाभ्य(D9 °प्य)नो(Ñ1 D1.4 °चो)दयत्. ❀ Ct: प्रयाहि परं तीरमिति शेषः. ❀ —After 2, Ñ2 B ins.:

867* नाविकस्तु वचः श्रुत्वा लक्ष्मणस्य महात्मनः ।
वाहयामास तां नावं दक्षिणं कूलमादरात् ।

[(l. 1) B1 तद् (for तु).—(l. 2) B2 दक्षिणां दिशम्.]

3 Ś1 V1.3 D8 om. 3ab (cf. v.l. 2).—a) Ś2.3 D12 समासाद्य; B2 समा° (for उपागम्य).—b) M6 राघवः (for लक्ष्मणः).—After 3ab, D2.9 ins.:

868* अथ व्यवस्थापितवाङ्कथंचि-
त्सौमित्रिरन्तर्गतबाष्पकण्ठः ।
औत्पातिकं मेघ इवाश्मवर्षं
महीपतेः शासनमुज्जहार ।

—cd) D5 T1.2 G3 प्रांजलिर् (for मैथिलीं). M4 damaged for वाक्यं प्रा-. D5 वैदेहीं; T1.2 G3 औत्कंठ्याद् (for प्राञ्जलिर्). Ś Ñ1 V1.3 B2 D1–4.8.9.12 transp. मैथिलीं and प्राञ्जलिर्. Ñ V1.3 B1.2.4 D1.3–5 -विकुबः; B3 -विस्तरात्; D2.9 -विह्वलः; D6.7.10.11 T3.4 -संवृतः; G1 M2–4. 6.7.10 -गद्गदं; K (ed.) -संप्लुतः (for -गद्गदः).

4 B3 om. 4–5b. D5 om. 4.—a) Ś1.2 V1.3 B1.2.4 D1–4.9 T3.4 M6 हृद्गतो; Ś3 D8.12 त्वद्गतो; Ñ1 हृद्गुवो (for हृद्गतं). V3 हि (for मे). M1 ह तच् (for महच्). Ś D8.9.12 M6 महान्दाहो; Ñ V1 D2.3.9 T3.4 महान्शोको; V3 महान्कोधो; B1.2.4 महांस्तापो; D1.4 महाबाहुर् (for महच्छल्यं).—b) Ś D6–8.10–12 यस्माद्; T1.2 G1.3 M3 उक्तोस्मि; G2 यस्माद् (for यदस्मि). B1 यदार्येण च; M1 यस्म्यार्येण च (sic) (for यदस्म्यार्येण). Ñ1 V1.3 D1–4.9 T3.4 यदार्योपि हि(T3.4 च) बुद्धिमान्.—cd) D2.9 कस्मिन्. G2 M5 नियुक्तो (for निमित्ते). Ñ2 B1.2.4 लोकस्य नीतोहं (for वैदेहि लोकस्य). Ś D8.12 वचनात्कृतः; Ñ1 V1 D2 T3.4 वचने स्थितः; Ñ2 B1.2.4 G2 वचनीयतां(G2 °तः); M5 वचनीकृते. D9 कस्य वचने च स्थितः (unmetric, for d). ❀ Cv: एतन्मे महद्दुच्छल्यं यदार्येणास्मिन्कार्ये भवामि लोकस्य वचनीकृतः लोकस्य वचनीयः कृतः। लोकस्य वाच्ये यदस्मिन्कार्ये निमित्ते नियुज्येत, एतदेव मे हृच्छल्यमित्यर्थः।; Cg.k: हे वैदेहि! यस्मिन्निमित्ते यत्कृत्यानुष्ठानतः। अहं लोकस्य वचनीकृतः वचनीयः कृतः। यलोप आर्षः। निन्द्यः संपादितो भवेयम्। अस्मिन्निमित्ते धीमता सर्वज्ञेनार्येण यद्यस्मादहं नियुक्तस्तेन हेतुना मे महच्छल्यं हृद्गतम्।; Ct: वैदेहि, अस्मिन्निमित्ते यस्माद्धीमताप्यार्येण लोकनिन्दाहेतुभूते क्रूरकार्ये यदहं नियुक्तस्तल्लोकस्य वचनीकृतः। यलोप आर्षः। वचनीयो निन्द्यः कृतः, अतो मे महच्छल्यं हृद्गतं हृदयं प्रविष्टम्. ❀

5 B1.3 om. 5ab (for B3 cf. v.l. 4).—a) Ś2.3 [स]द्य (for हि).—M4 damaged from मे up to यत् in b. Ś2 [स]स्तु; D6 स्यान् (for सद्य). Ñ1 V1 D2.9 T3.4 ममाद्य(Ñ1 V1 °पि) मरणं श्रेयो; Ñ2 V3 B2.4 D1.3–5 मरणं हि मम(B4 परं) श्रेयो.—b) D6.7.10.11 T2 Cg.t मृत्युर्; Ck as in text (for मृत्योर्). Ñ V1.3 B2.4 D1–5.9 यदन्यद्वाप्य(Ñ1 V3 D2–4.9 °द्वा त)तोधिकं; T3.4 किं प्राणैः पार्थिवेन वा; G1.2 मृत्योर्नान्यद्वरीयसः.—c) Ś D8.12 तव; Ñ V1.3 B2.4 D1.3–5 न तु; D9 यतु (for न च). T3.4 एतस्मिन्. B3 देवि न त्वीदृशे कार्ये.—d) Ś Ñ B D8.12 नियोगो; V1.3 D2.3.9 विन्यासो; D5 विश्वासो; T3.4 निर्दिष्टो; G2 न योग्यो;

प्रसीद न च मे रोषं कर्तुमर्हसि सुव्रते ।
इत्यञ्जलिकृतो भूमौ निपपात स लक्ष्मणः ॥ ६
रुदन्तं प्राञ्जलिं दृष्ट्वा काङ्क्षन्तं मृत्युमात्मनः ।
मैथिली भृशसंविग्ना लक्ष्मणं वाक्यमब्रवीत् ॥ ७
किमिदं नावगच्छामि ब्रूहि तत्त्वेन लक्ष्मण ।
पश्यामि त्वां च न स्वस्थमपि क्षेमं महीपतेः ॥ ८
शापितोऽसि नरेन्द्रेण यत्त्वं संतापमात्मनः ।
तद्भूयाः संनिधौ मह्यमहमाज्ञापयामि ते ॥ ९
वैदेह्या चोद्यमानस्तु लक्ष्मणो दीनचेतनः ।
अधोमुखो बाष्पगलो वाक्यमेतदुवाच ह ॥ १०
श्रुत्वा परिषदो मध्ये अपवादं सुदारुणम् ।
पुरे जनपदे चैव त्वत्कृते जनकात्मजे ॥ ११

G. 7. 49. 42
B. 7. 47. 11
L. 7. 49. 11

Cg.k.t as in text (for नियोज्यो). V3 -निंदितः; M5 -वंदिते (sic) (for -निन्दिते). D6 लोकनिंदाविनिंदिते. ❀ Cv: न चास्मिन्नित्यादिश्लोकः सा त्वमित्यादेः परतो द्रष्टव्यः। पूर्वत्र तु लेखकैः प्रमादाल्लिखितः।; Cg: एवं हृच्छल्यं प्राप्नुवतो मे मृत्युमरणं हि वा यद्यदि स्यात्, अद्य तदेव मे परं श्रेयो भवेत्। न चेत्यादि। ईदृशे लक्ष्मणो निर्घृण इति लोकनिन्द्येऽस्मिन्वक्ष्यमाणरूपे कार्ये न चाहं नियोज्योऽस्मि नियोक्तुमर्होऽस्मि, तथा विनियुक्तस्य कार्यस्य सर्वथैव कर्तव्यत्वादिति शेषः।; Ck: एवं महच्छल्यं प्राप्नुवतो मे मृत्योर्मरणं हि वा यद्यदि स्यात्, अद्य तदेव मे परं श्रेयो भवेत्। न चेत्यादि। ईदृशे निर्घृणे(णो?) लक्ष्मण इति लोकनिन्द्ये (महत्य) स्मिन्वक्ष्यमाणरूपे कार्ये चाहं नियोज्योऽस्मि नियोक्तुमर्हो भवामि। अथापि नियुक्तः सर्वथैव कर्तव्यत्वादिति शेषः।; Ct: एवं महच्छल्यं प्राप्नुवतो मे यन्मरणं तत्प्रागवस्था मूर्छा मृत्युर्मुख्यं मरणं वा यद्भवेत्तत्परं श्रेयो भवेत्। न च न स्वीदृशे लोकनिन्द्येऽस्मिन्वक्ष्यमाणे कार्येऽहं नियोज्यो नियोक्तुमर्हो भवामि। अथापि राजनियोगस्य सर्वथा कर्तव्यत्वान्नियोगं करोमीति शेषः. ❀

6 [a]) Ñ B1.4 D3.5-7.10.11 T1.2 transp. न and च. D2.9 प्रसीदस्व न (for प्रसीद न च). Ś2 रोषोथ (sic); B4 D6.7.10.11 मे पापं (for मे रोषं). —[b]) Ś Ñ V1.3 B D1-5.8.9.12 T3.4 M6 मैथिलि; D6.7.10.11 शोभने (for सुव्रते). ❀ Ct: पापं कर्तुम्। दोषं ज्ञातुमित्यर्थः. ❀ —[c]) V1 -गतो (for -कृतो). Ñ2 B कृत्वांजलिं (for [अ]ञ्जलिकृतो). G2 भूत्वा (for भूमौ). ❀ Ck.t: अञ्जलिकृतः कृताञ्जलिः. ❀ —[d]) D2 पपात स ह (for निपपात स). Ś D8.12 महीतले; M4 damaged (for स लक्ष्मणः). —After 6, D2.9 ins.:

869* सुखेन लङ्कासमरे मृतं मा-
मजीवयन्मारुतिरास्तवैरः ।
आर्यां ससत्त्वां विपिनेऽपहातुं
श्रोतुं च तस्याः परिदेवितानि ।

[(1. 3) D2 विजने विहातुं (for विपिनेऽपहातुं).]

7 [a]) V1 कृत्वा (for दृष्ट्वा). —[c]) Ś Ñ1 V1.3 B2.3 D1-5.8.9.12 T3.4 भृशमुद्विग्ना; G2 शोकसंविग्ना.

8 [b]) M6 सत्येन (for तत्त्वेन). B1 T1.2 G2.3 M1.3.8.10 राघव (for लक्ष्मण). D6 ब्रूहि लक्ष्मण तत्त्वतः. —[c]) Ñ2 B1.2.4 M1 न हि; D7 T1.2 M2.4.7 न च (by transp.); T3.4 अपि (for च न). Ś Ñ1 V1.3 D1.3.8.9.12 हि त्वाम-स्वस्थम्; B3 त्वामिहास्वस्थम्; D2.4 त्वामवस्वस्थम्; D5 हि त्वा गच्छत्वम् (sic). —[d]) D6.7 च भूपतेः (for महीं°).

9 [a]) Ś D5 शासितो (for शापितो). Ñ2 [ऽ]हं; D5 हि (for ऽसि). V1 महेंद्रेण; D2.9 मम प्राणैर् (for नरेन्द्रेण). —[b]) Ś Ñ1 V3 D2.8.12 M6 यस्त्वं; Ñ2 B यदि (for यस्त्वं). D5 संत्रासम् (for संतापम्). D10.11 M1.10 आगतः (for आत्मनः). —[c]) Ś Ñ2 V1.3 B D1-5.8.12 T3.4 M6-9 न (for तद्). D1-5.9 T2 G2 M9 ब्रूयात्; M8 ब्रूयां (for ब्रूयाः). M2 आब्रूयाः (for तद्भूयाः). T3 संनिधिं. Ś3 B3 D8.12 M6 मेद्य (with hiatus) (for मह्यम्). —[d]) V1 स्वेयम्; D2.9 स्वयम् (for अहम्). ❀ Cg: यस्मात्त्वमेवं संतापप्रागतस्तस्मात्त्वं नरेन्द्रेणैव शापितोऽसि। मह्यं मम। आज्ञापयामि त इति त्वामित्यर्थः।; Ck: यद्यस्मात्त्वमेवं संतापमागतस्तस्मात्त्वं शापितोऽसि, अप्रत्युत्तरतया शापपूर्वं क्रूरे कर्मण्याज्ञप्तोऽसीत्यर्थः। मह्यं मम संनिधौ, आज्ञापयामि त इति। त्वामित्यर्थः।; so also Ct. ❀ —After 9, T4 G1 ins.:

870* मया च शापितश्चालि वद मे वेपते मनः ।

10 [a]) Ś D5.8.12 नोद्यमानस्; V3 [आ]देश्यमानस्; B3 प्रेक्ष्यमाणस्; D3 वोह्यमानस्; T2 G3 बाध्यमानस् (for चोद्य°). —[b]) Ś Ñ2 V1.3 B D5.8.12 T3.4 -मानसः; D2 -चेतसः; D11 -*तनः (for -चेतनः). —[c]) B2 पराङ्मुखो. Ś D1.3.4.8.12 बाष्पकंठो; Ñ1 M6 दीनमनाः; Ñ2 B बाष्पकलं; V1 D5.9 T3.4 ध्वस्तवपुर्; V3 दीनमुखो; D2 दुःस्थवपुर्; M1 (*inf. lin.*) बाष्पकलो (for बाष्पगलो). —[d]) G1 हा (for ह).

11 Note hiatus between [a] and [b]. —[a]) Ś Ñ1 V3 D1-5.8.9.12 M6 तु (M6 om. [subm.]) पर्षदो (for परिषदो). V3 [ऽ]स्माकं (for मध्ये). —[b]) Ñ V1.3 B D1-5.9 T3.4 परिवादं; D6.7.10.11 T1.2 G3 M3.7 ह्यपवादं; Cg.k.t as in text (for अप°). —Ś1 om. 11[c]-12[a]. —[c]) D8.12 जानपदे. —After 11, D6.7.10.11 T3.4 G1.2 M1-5.7.9.10 ins.:

871* रामः संतप्तहृदयो मां नियोज्य गृहं गतः ।

[D6 मा (for मां). D6.7.10.11 निवेद्य (for नियोज्य). G1 मां नियोजितवानिह (for the post. half).]

—Thereafter M3 cont.:

G. 7. 49. 43
B. 7. 47. 12
L. 7. 49. 12

न तानि वचनीयानि मया देवि तवाग्रतः ।
यानि राज्ञा हृदि न्यस्तान्यमर्षः पृष्ठतः कृतः ॥ १२
सा त्वं त्यक्ता नृपतिना निर्दोषा मम संनिधौ ।
पौरापवादभीतेन ग्राह्यं देवि न तेऽन्यथा ॥ १३
आश्रमान्तेषु च मया त्यक्तव्या त्वं भविष्यसि ।
राज्ञः शासनमाज्ञाय तवैवं किल दौर्हृदम् ॥ १४

तदेतज्जाह्नवीतीरे ब्रह्मर्षीणां तपोवनम् ।
पुण्यं च रमणीयं च मा विषादं कृथाः शुभे ॥ १५
राज्ञो दशरथस्यैष पितुर्मे मुनिपुंगवः ।
सखा परमको विप्रो वाल्मीकिः सुमहायशाः ॥ १६
पादच्छायामुपागम्य सुखमस्य महात्मनः ।
उपवासपरैकाग्रा वस त्वं जनकात्मजे ॥ १७

872* वनं प्रापयितुं त्वां वै निर्दोषामपि मैथिलि ।

12 Ś1 om. 12^a (cf. v.l. 11). M10 om. (hapl.?) 12. D6 om. (hapl.?) 12^{ab}. T3.4 G1 M1.2.4.7.8 transp. 12 and 13. B3 D7 transp. ^{ab} and ^{cd}. —^{a}) Ñ V1.3 B D1–5.9न तच्छ (D1.4 तन्न श; D5 न च श)क्यं कथयितुं. —After 12^{ab}, Ś D8.12 ins.:

873* शक्यं कथयितुं शुद्धे पातिव्रत्यसमन्विते ।

—V3 om. 12^{cd}. D6 transp. 12^{cd} and 13. —^{c}) Ś B3 D7.8.12 M6 न्यस्य (for न्यस्तानि). Ñ V1 B1.2.4 D1–5.9 यद्राज्ञा (V1 D2.9 राज्ञा हि) हृदये कृत्वा; G2 यानि वाक्यो हृदि स्थानि (corrupt). —^{d}) Ś Ñ V1 B1 D2.8.9.12 M6 नामर्षः; B2–4 स्वहस्ते; D1.3–5 विमर्शः; D10.11 G2 M7 Ck.t [अ]मर्षात्; G3 M8 [अ]मर्षः; Cv.g as in text (for [अ]मर्षः). ❀ Cv: अमर्षः पृष्ठतः कृतः, यैरपवादादिषु कोपो राज्ञा पृष्ठतः कृतः।; Cg: यानि वचनानि राज्ञा, अमर्षात् हृदि न्यस्तानि तानि तवाग्रतो मया न वचनीयानि वक्तुमशक्यानि। अत एवामर्षः मया पृष्ठतः कृतः, नोपन्यस्त इत्यर्थः।; Ck: यानि वचनानि यानि राज्ञामर्षाद्धृदि न्यस्तानि तानि हे देवि मया तवाग्रतो न वचनीयानि वक्तुमशक्यानि। अत एव मया तस्य वादः पृष्ठीकृतः नोपन्यस्तः।; Ct: यानि वचनानि राज्ञामर्षाद्धृदि न्यस्तानि तानि हे देवि, मया तवाग्रतो न वचनीयानि न वक्तुं शक्यानि, अत एव तेषां वादो मया पृष्ठतः कृतः. ❀

13 T3.4 G1 M1.2.4.7.8 transp. 12 and 13. D6 transp. 12^{cd} and 13. D7 transp. ^{ab} and ^{cd}. —^{a}) D1 दृष्ट्वा (for त्यक्ता). Ś Ñ V1.3 B1.2.4 D1–5.8.9.12 नरेंद्रेण (for नृपतिना). M8 transp. त्यक्ता and नृपतिना. —Ś2 om. from 13^b up to the prior half of l. 1 of 875*. —^{b}) M6 (with haitus) अपापा (for निर्दोषा). M8 नृप- (for मम). M8 निर्दोषामपि. B साध्वी कुलसमन्विता. —^{c}) Ś1.3 Ñ1 V1.3 B3 D1.3–5.8.9.12 T4 लोकापवाद्-; Ñ2 B1.2.4 लोकापवादाद्; D2 लोकापवादे. —^{d}) Ś1.3 Ñ V1.3 B D1–5.8.9.12 T3.4 तद्ग्राह्यं (B1 त्वं त्यक्ता) नान्यथा त्वया (Ñ B देवि नान्यथा; T3.4 °था कृतं). —After 13, B1 ins. (r. after 16):

874* तत्र गच्छस्व वैदेहि मा तेऽस्तु हृदये व्यथा ।

14 Ś2 B1 om. 14 (for Ś2 cf. v.l. 13). —^{a}) D8 om. च (subm.). Ñ2 B2.4 इहाश्रमांतेषु (Ñ2 °मांते हि; B2 °मेषु च). Ś1.3 D8.12 च तदा; M1 वचनात् (for च मया). —^{b}) L (ed.) त्वं त्यक्तव्या (by transp.). Ś1.3 D8.12 न संशयः (for भविष्यसि). —^{c}) Ś1.3 V3 D8.12 M4.6 राजशासनम्. Ñ2 आस्थाय; V1 B2 D1.3.4.10.11 G3 आदाय (for आज्ञाय). —^{d}) Ñ V1 B2–4 D3–5.9 [ए]व (for [ए]वं). V3 D6.7.10.11 तथैव; T2.3 तथैवं; G1.2 M1.3.10 तवैव. M5 om. किल. Ñ V1 B2–4 D2–5.9 दोहदः; G3 सौहृदं; Cg.k.t as in text (for दौर्हृदम्). Ś1.3 D8.12 तव चैव विदोषतां; D1 कृतमेतन्न संशयः; M6 तव चैव हि दौहृदात्. —After 14, Ś1.3 D8.12 ins., while Ś2 ins. after 13^a (owing to om.):

875* गङ्गातीरे महापुण्ये आश्रमे पुण्यकर्मणाम् ।
त्वं तु नेया मया गत्वा शासनात्पार्थिवस्य तु ।

[Ś2 om. the prior half of l. 1. Note hiatus between the two halvas.]

15 ^{b}) Ś B D8.12 M6 महर्षीणां; Ñ1 V1.3 D1–5.9 राजर्षीणां. B3 D6.9 तपोवने. —D6 om. 15^c–16^b. —^{d}) B4 विषादं मा (by transp.). Ñ1 V1 D2.9 मुनिसंघैर्वृ (V1 °धवृ)तं शुभं (D9 °निषेवितं); V3 D1.3–5 मुनिभिः (D5 सर्वतः) संवृतं शुभं.

16 D6 om. 16^{ab} (cf. v.l. 15). —^{a}) D7.10.11 T3 G2 [ए]व; T1.2 G3 M3 [इ]ष्टः; M1 [ए]वं; M5 [इ]मे (sic) (for [ए]व). —^{b}) Ñ1 D1–5.9 नो (for मे). M8 पुंगवः सखा (for मुनिपुंगवः). —^{c}) M8 ऋषिः (for सखा). G2 यः परमो (for परमको). —^{d}) Ś B3 D8.12 M6 सुमहानृषिः; Ñ1 V3 D1.3–5 भगवानृषिः; Ñ2 V1 B1.2.4 D2.9 T3.4 सुमहातपाः. ❀ Cg.k.t: परमकः परमानुकम्पावान्. ❀ —After 16, B1 repeats 874*.

17 B1 om. 17–18^b. —^{a}) Ś D8.12 उपागच्छ (for °गम्य). —^{b}) Ś D8.12 तस्यैतस्य; Ñ1 V1.3 D1–5.9 सुखं तस्य (for सुखमस्य). —^{c}) B3 उपासन- (for उपवास-). M8 -कृतैकाग्रा (for -परैकाग्रा). —For 17^{cd}, Ñ1 V1.3 D1–5.9 subst.:

876* रामस्य स्निग्धहृदया गच्छ त्वं मा व्यथां कृथाः ।

[V3 **हृदया. V1 वस (for गच्छ). D2 [अ]न्यथा; D5 वृथा (for व्यथां).]

Ayu Research Team

पतिव्रतात्वमास्थाय रामं कृत्वा सदा हृदि ।
श्रेयस्ते परमं देवि तथा कृत्वा भविष्यति ॥ १८

G. 7. 49.
B. 7. 47.
L. 7. 49.

इति श्रीरामायणे उत्तरकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

Arya Research Team

18 B1 om. 18^{ab} (cf. v.l. 17).—^{a}) Ś3 Ñ1 V1.3 D2.3.6.8.9.12 पतिव्रतत्वम् (sic). Ñ1 V1.3 D1–5.9 आदाय (for आस्थाय).—^{b}) Ñ1 V1 B2.4 D1–5.9 कृत्वा रामं (by transp.).—After 18^{ab}, V3 ins.:

877* जानन्शुद्धसमाचारा समापि त्वं विसर्जिता ।

—^{c}) B1 च (for ते). Ś D8.12 चैव परं; Ñ V1 B2.4 D2.3.5.9 T3.4 परमकं (for ते परमं). D1.4 परममेवेह.—^{d}) Ñ V1 D2.3.5.9 T3 तवै(D2.9 T3 °दै)वं(D5 °व) हि; V3 तथैव हि; D1.4 तव नित्यं; T4 तपश्चैव; G1 तदा कृत्वा (for तथा कृत्वा). Ś D8.12 विशुद्धैवं भविष्यसि.—After 18, Ś Ñ1 D1–5.8.9.12 T3.4 ins.:

878* लालितालालितानां हि सत्स्त्रीणां दैवतं पतिः ।

[D2.5.9 च (for हि). D1.3.4 ललितोललितो वापि(D3 वा च); T3.4 ललितो वा स्वललितो (for the prior half). D1.4 परमं; D2.9 सुस्त्रीणां; D5 स्त्रीणां च; T3.4 स्त्रीणां वै (for सत्स्त्रीणां).]; while Ñ2 B2–4 ins.:

879* इतीदमुक्त्वा प्ररुदन्स लक्ष्मणः
कृताञ्जलिर्बाष्पविधूतलोचनः ।
पपात देव्याः सहसाथ पादयोः
सुपुष्पितो वायुवशाद्यथा द्रुमः ।

[(l. 3) Ñ2 तु (for [अ]थ).];
whereas V1 ins. after 18:

880* ताडितानां च सत्स्त्रीणां दैवतं परमं पतिः ।

Colophon: Ñ1 V1 D1.2.4.9 om.—*Kāṇḍa name*: Ś1 D12 M7 om.—*Sarga name*: Ś Ñ2 V3 B D3.8.12 लक्ष्मणवाक्यं; D5 सीतालक्ष्मणसंवादः.—*Sarga no.* (figures, words or both): Ś V3 D12 om.; Ñ2 B4 51; B1 50; B2 35; B3 60; D3 48; D5–7.10.11 T1.2 G M1–5.7–10 47; T3 52; T4 54; M6 45.—After colophon, T4 concludes with श्रीरामार्पणमस्तु; G M1.5.8 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

४७

G. 7. 50. 1
B. 7. 48. 1
L. 7. 50. 1

लक्ष्मणस्य वचः श्रुत्वा दारुणं जनकात्मजा ।
परं विषादमागम्य वैदेही निपपात ह ॥ १
सा मुहूर्तमिवासंज्ञा बाष्पव्याकुलितेक्षणा ।
लक्ष्मणं दीनया वाचा उवाच जनकात्मजा ॥ २
मामिकेयं तनुर्नूनं सृष्टा दुःखाय लक्ष्मण ।
धात्रा यस्मात्तथा मेऽद्य दुःखमूर्तिः प्रदृश्यते ॥ ३
किं नु पापं कृतं पूर्वं को वा दारैर्वियोजितः ।
याहं शुद्धसमाचारा त्यक्ता नृपतिना सती ॥ ४
पुराहमाश्रमे वासं रामपादानुवर्तिनी ।
अनुरुध्यापि सौमित्रे दुःखे विपरिवर्तिनी ॥ ५

47

☞ V₂ missing for Sarga 47 (cf. v.l. 7.12.2). Ñ₁ V₁ D₁.₂.₄.₉ cont. the previous Sarga. D₅ begins with श्रीगणेशाय नमः.

1 Ñ₁ V₁ D₂.₅.₉ om. 1. Before 1, D₁.₄ ins. 882*. —[a]) M₆ तु तद्वाक्यं (for वचः श्रुत्वा). Ś Ñ₂ V₃ B D₁.₃.₄.₈.₁₂ श्रुत्वा तु लक्ष्मणस्यैतद्. —[b]) Ñ₂ V₃ B₁.₂.₄ D₃ वचनं; T₃ दार्मैतः (sic) (for दारुणं). Ś D₁.₄.₈.₁₂ वाक्यं परमदारुणं; B₃ वाक्यं घोरमुपस्थितं; M₆ श्रुत्वा सा घोरसंहितं. —V₃ om. 1[c-d]. —[c]) Ś D₆.₈ आपन्ना; Ñ₂ B₁.₄ आगच्छन्; B₂ D₁.₄.₁₂ M₆ आपेदे; B₃ आरोप्य; M₈ आरुह्य (for आगम्य). —[d]) Ñ₂ B₁.₂.₄ D₃ मैदिन्यां (for वैदेही). G (ed.) च (for ह). D₃ निषसाद ह; M₆ पतिता भुवि. —After 1, B₂ ins.:

881* छिन्नमूला यथा चैव कदली भुवि दृश्यते ।

2 [b]) D₁₀.₁₁ Ck.t -पर्याकुल-; T₁ -पूर्णाकुल-; T₄ -चार्याकुल-; Cg as in text (for -व्याकुलित-). Ś D₁.₄.₈.₁₂ शोक (D₁.₄ शब्द)व्याकुलिताक्षरं; Ñ₂ B D₃ भूत्वा बाष्पाकु(Ñ₂ °वि)लेक्षणा; M₆ गद्गदाकुलिताक्षरा. ❀ Cg: बाष्पव्याकुलितेक्षणेत्यनेन पुनः संज्ञाप्राप्तिः सूचिता।; Ck.t: बाष्पपर्याकुलेक्षणा। संज्ञां प्राप्येति शेषः. ❀ —For 2[a-b], Ñ₁ V₁.₃ D₂.₅.₉ subst.; D₁.₄ ins. before 1; D₃ ins. after 2[a-b]:

882* तथा वदन्तमत्यन्तं बाष्पसंरुद्धलोचनम् ।

[V₁ अत्यर्थं (for अत्यन्तं). D₁ वदंश्च तत्रैव. V₃ D₅ -संरक्त-; D₂.₉ -संदिग्ध- (for -संरुद्ध-).]

—Note hiatus between [c] and [d]. —[c]) Ś Ñ V₁ B D₁.₃–₅.₈.₁₂ M₆ जानकी वाक्यम् (for दीनया वाचा). V₃ D₂.₉ जानकी लक्ष्मणं वाक्यम्. —[d]) M₃ ह्युवाच. Ś Ñ₁ V₁.₃ D₃.₅.₈.₁₂ M₆ परमार्तं(V₃ D₃.₅ M₆ °र्थं)वत्; Ñ₂ B [अ]तीव दुःखिता; D₁.₄ पतिदेवता; D₂.₉ परमार्थवित् (for जनकात्मजा).

3 Ñ₁ V₁.₃ B₁ D₁.₂.₄.₅.₉ om. 3. —[a]) Ś D₈ मामकी; M₉ मामका; Cm.g as in text (for मामिका). —[b]) D₈ दृष्टा (for सृष्टा). —[c]) Ś D₈.₁₂ [अ]स्या यत्; M₆ यत्र (for यस्यास्). Ś Ñ₂ B₂–₄ D₃.₈ न(D₃ नु) मेद्यापि; D₁₂ M₆ न मे चापि(M₆ °त्र) (for तथा मेऽद्य). —[d]) Ś D₈.₁₂ दुःखस्यांतः; Ñ₂ B₃–₄ D₃ °मोक्षः; G₂ दुर्निमित्तं; M₆ °शांतिः; Cm.g.k.t as in text (for दुःखमूर्तिः). B₂ D₃ न दृश्यते; M₄ प्रशस्यते. ❀ Cg: मामिकेयं तनुर्धात्रा दुःखायैव सृष्टा। यस्मात्कारणाद्यस्या मे दुःखमूर्तिः प्रदृश्यते।; Ck: दुःखमूर्तिर्मूर्तिकृतदुःखाकारैव यतो मम तनुर्दृश्यते तस्माद्दुःखायैव सृष्टास्मि।; Ct: दुःखमूर्तिः सकलदुःखसमूहः. ❀ —After 3, D₁₁ ins. रामाय नमो नमः.

4 [a]) D₆ (with hiatus) एवं (for पापं). V₃ मयापकृतं. G₂ transp. पापं and पूर्वं. —[b]) Ñ₁ दारैर्वा (by transp.). Ś D₈.₁₂ M₆ विनाकृतः (for वियोजितः). —Ś₂ om. 4[c]–6[b]. M₅ om. (hapl.?) from तिना in 4[d] up to मयाप in 7[b]. —[c-d]) B₃ अहं. B₂ दुःख- (for शुद्ध-). M₉ शुची (for सती). Ñ₁ V₁.₃ D₁–₅.₉ T₃.₄ जानन्ध्रु (D₃ °तां शु)द्धसमाचारां यन्मां संत्यक्तवानृपः(Ñ₁ °न्पुनः). ❀ Ck.t: सती पतिव्रता. ❀

5 Ś₂ M₅ om. 5 (cf. v.l. 4). —[a]) D₄ तम् (for [अ]हम्). M₈ वत्स (for वासं). M₆ आश्रमावासं. Ñ₁ V₁.₃ D₁.₂.₉ पुरा तदा (V₁ °त्रा; D₁ °आ)श्रमावासं; D₃.₅ पुरातनाश्रमे वासं. —Ñ₂ illeg. for [b]. —[b]) M₆ -पादेषु (for -पादानु-). Ś₁.₃ D₈.₁₂ रामपार्श्वे तु(D₁₂ °श्वेषु) वर्तती; Ñ₁ V₁.₃ D₁–₅.₉ रामपादौ समाश्रिता; B निरता रामपादयोः. —M₈.₁₀ om. (hapl.) 5[c-d]. M₉ reads 5[c-d] after 6. —[c]) Ś₁.₃ Ñ₁ V₁.₃ D₂.₃.₈.₉.₁₂ T₃.₄ M₃ नार्चितयं वै(V₁.₃ °र्वती); B₃ न चिंतयामि; D₁.₄ नार्चितयत; D₅ नाज्ञासिषं वै; D₇ अनुरुध्यामि; T₁.₂ G₁.₃ M₁ अनिरुध्या(G₃ °द्धा)पि(G₁ M₄ °मि); G₂ M₁.₇.₉ अनुरुंध्यामि(M₁ °पि); M₂ अनुरोत्स्यामि; M₈ नातिरिच्यामि (for अनुरुध्यापि). Ñ₂ B₁.₂.₄ सौमित्रेणानुरुध्येहं(Ñ₂ B₃ °ध्येयं; B₄ °ध्ये च). —T₃ repeats 5[d] (var.) consecutively. —[d]) Ñ₂ D₆.₇.₁₀.₁₁ M₃ च; G₁ M₆ [ऽ]पि (for चि-). B₁.₂.₄ दुःखेन. Ñ₂ B₁ -वर्तिता; B₂.₄ -वर्जिता (for -वर्तिनी). Ś₁.₃ Ñ₁ V₁.₃ D₁–₅.₈.₉.₁₂ T₃(first time).₄ L (ed.) वर्तमाना(L [ed.] °ने) वि(T₃.₄ °नाति)भी(D₈.₁₂ °भू)षणं; B₃ दुःखदुःखेन वर्तमनि. ❀ Cv: पुराहमाश्रमे वासमित्याद्यर्धश्लोकानन्तरम्, अनुरुध्यामीत्यादि। एतदन्यत्र प्रमादाल्लिखितम्।; Cg: पुरेति। अनुरुध्यापि सोढ्वापि।; Ck: पुरेत्यादि। हे सौमित्रे पुरा पूर्वकाले रामपादानुवर्तिनी भूत्वा तद्बलादेव दुःखे वनवासदुःखेऽपि परिवर्तिनी वर्तमानापि तच्चानुरुध्य सोढ्वा आश्रमे वासमरोचयमिति

सा कथं ह्याश्रमे सौम्य वत्स्यामि विजनीकृता ।
आख्यास्यामि च कस्याहं दुःखं दुःखपरायणा ॥ ६
किं च वक्ष्यामि मुनिषु किं मयापकृतं नृपे ।
कस्मिन्वा कारणे त्यक्ता राघवेण महात्मना ॥ ७
न खल्वद्यैव सौमित्रे जीवितं जाह्नवीजले ।
त्यजेयं राजवंशस्तु भर्तुर्मे परिहास्यते ॥ ८
यथाज्ञां कुरु सौमित्रे त्यज मां दुःखभागिनीम् ।
निदेशे स्थीयतां राज्ञः शृणु चेदं वचो मम ॥ ९
श्वश्रूणामविशेषेण प्राञ्जलिः प्रग्रहेण च ।
शिरसा वन्द्य चरणौ कुशलं ब्रूहि पार्थिवम् ॥ १०

G. 7. 50. 9
B. 7. 48. 10
L. 7. 50. 10

शेषः । ; Ct : हे सौमित्रे, पुरा पूर्वकाले रामपादानुवर्तिनी भूत्वा दुःखे वनवासदुःखे परिवर्तिनी वर्तमानाप्यनुरुध्य तत्सोढ्वा आश्रमे वासमरोचयमिति शेषः. ❀

6 M5 om. 6; Ś2 om. 6^{ab} (for both, cf. v.l. 4). —^{a}) Ñ2 B1.2.4 तु (for हि). B3 कथमद्य (for सा कथं हि). Ś1.3 D8.12 पुण्ये (for सौम्य). Ñ1 V1.3 D1–5.9 T3.4 कथं त्व (V1 °थम)द्य वने सौम्य. —^{b}) D1.4 वृजिनीकृता; D2.9 विजने कृ(D9 °नीकृ)ते; D6.7 मुनिभिः सह; G2 च विनाकृता. —^{c}) G1 [इ]व (for च). —^{d}) G1 सुखं; G2 M1.2.4.7–9 इदं; Ck.t as in text (for दुःखं). ❀ Cg : विजनीकृता, इष्टजनविरहिता कृता । ; Ck : साम्प्रमिदानीं विजनीकृता, इष्टजनरहितता संपादिताहं कथं ह्याश्रमे वत्स्यामि कस्याहं मामकं दुःखमाख्यास्यामि विजने वने । पतितेति शेषः । ; Ct : साम्प्रमिदानीं विजनीकृतेष्टजनरहिता कृता कथमाश्रमे वत्स्यामि । कस्य च स्वीयं दुःखमाख्यास्यामि । विजनवनस्थेति शेषः. ❀ —For 6^{cd}, Ś Ñ V1.3 B D1–5.8.9.12 T3.4 M6 subst. :

883* किमाहारा कथाः काश्च करिष्यामि नृपात्मज ।

[M6 किमाहारं. Ś2 काश्चित् (for काश्च). Ñ1 V1.3 D1–5.9 T3.4 किमाहारं (D2.5 °र)विहारं(D3 °नोदं) च(V1.3 T3.4 वा) (for the prior half). Ñ2 B1.2 D4 नृपात्मजा; T3.4 किमात्मनः (for नृपात्मज). Ś B3 D8.12 M6 कथयिष्यामि केषु च(M6 वा) (for the post. half).]

—After 6, M9 reads 5^{cd}.

7 M5 om. up to मयाप in 7^{b} (cf. v.l. 4). —^{c}) Ś Ñ1 V1.3 D1–4.8.9.12 वा; B4 D6.7.10.11 T3.4 G1 M1.10 नु (for च). D5 आवक्ष्यामि. Ś Ñ V1.3 B1.2 D1–5.8.9.12 सिद्धेषु (for मुनिषु). —Ñ2 illeg. for ^{b}. —^{b}) V1 D2.5.9 यन्मयाप-; V3 किमु पापं M8 किं मया च (for किं मयाप-). Ñ1 कृतं; D1 किल; D5 नृपं (for नृपे). D6.7.10.11 T3.4 K (ed.) कर्म चा(D6.7 T4 वा)त्कृतं प्रभो(K [ed.] च किं). —^{c}) Ñ1 D1–4 यस्मिन्. Ś D8.12 हि; Ñ1 D1–5.9 तु; G2 नु (for वा). —^{d}) Ś Ñ B D1–5.8.9.12 [इ]ति वादिषु; V1.3 [अ]भिमानि(V3 °वादि)ता (for महात्मना). ❀ Ck : किं न्विति । महात्मना राघवेण केन कारणेन त्यक्ता । किं वा त्यागकारणमसत्कर्म त्वया कृतमिति पृष्टेषु मुनिषु किं नु वक्ष्यामि । त्यागकारणपापस्य कस्याप्यकरणाद्वक्तव्यं प्रत्युत्तरं न किमपि पश्यामीत्याशयः. ❀

8 ^{a}) B3 किम् (for खलु). Ñ1 D1–5.9 सा(D2.9 अ)हं खल्वद्य; T3.4 अद्यैव खलु; M4 न * * * व (damaged) (for न खल्वद्यैव). M6 नचिराज् (for सौमित्रे). —Ś D8.12 om. (hapl.) 8^{b}–9^{a}. —^{b}) Ñ V1.3 B1.2.4 D1–5.9 न(Ñ2 B1.2.4 किं; D2.9 स्व; D5 om. [subm.]) प्राणान् ; T3.4 प्राणांश्चेज् (for जीवितं). V2 B3 T1 M3 -तटे; Cg as in text (for -जले). —^{c}) M5 नाम; Cg.k.t as in text (for राज-). Ñ1 V1.3 D1.3–5 T3.4 -वंशाद् . —^{d}) Ñ1 V3 D1–5.9 राघवः (D2.9 °वं) (for भर्तुर्मे). V3 प्रति- (for परि-). Ñ B2–4 D1–5.9 -हास्यति; Cm.g.k.t as in text (for -हास्यते). V1 T3.4 परिहास्यति राघवः. ❀ Cg : न खल्विति । त्यजेयं राजवंशस्तु भर्तुर्मे परिहास्यते इत्युत्तरार्धपाठः । अत्यागकारणमुच्यते । राजवंशो राजसंतानः । परिहास्यते विच्छिद्यते, मयि गर्भस्य विद्यमानत्वादिति शेषः । मया देहो धर्तव्य इति भावः । यद्वा त्यजेयं राघवं वंशे भर्तुर्मा परिहास्यतीति पाठः । रामकृतकौर्यादद्यैव जाह्नवीजले जीवस्त्यक्तव्यः, तथापि तं न त्यजेयम् । कुतो भर्तुर्वंशे निष्कलङ्के राघवमेकं मा परिहास्यति मा परिहसतु । व्यत्ययस्त्वार्षः । जीवितत्यागे स्त्रीहत्यामूलोऽपवादो रामस्य स्यादिति भावः । अद्यैवेत्यनेन प्रसवानन्तरं तु त्याज्यमेवेत्यर्थः । ; Ck : न खल्वित्यादि । न त्यजेयमित्यत्र कारणमाह राजवंशस्तु, इत्यादि । राजवंशो राजसंतानः । स तु परिहास्यते विच्छिद्येतेति यावत् । मयि गर्भस्य विद्यमानत्वादिति शेषः । ततश्च मया देहो धर्तव्यः । त्वया च राजशासनं कर्तव्यम् । ; Ct : न खल्विति । तदत्यागहेतुमाह—राजवंश इति । राजसंतानः परिहास्यते विच्छिद्यते, इत्यर्थः । मयि गर्भस्य विद्यमानत्वात्. ❀

9 Ś D8.12 om. 9^{a} (cf. v.l. 8). —^{a}) Ñ1 अथाज्ञां; B1 यदाह; T1 Cg.t यथाज्ञं; T2 तदाज्ञं; G2 यथा त्वं; Ck तथाज्ञां. L (ed.) न(? तत्) खल्वद्यैव सौमित्रे. —^{b}) Ñ V1.3 B1.2 D9 त्यज्य (for त्यज). M4 [इ]मां. —^{c}) Ś D8 संदेशे; Ñ1 D9.12 निर्देशे. M4 damaged for स्थीयतां. —^{d}) Ś D8.12 कुरु (for शृणु). M1 चैतद्; M6 चैव (for चेदं).

10 ^{b}) Ñ1 B1.3 D10.11 M4 प्रांजलि-; Ñ2 V1 B2.4 D2–4.9 सांजलि-; V3 D1 T3.4 सांजलिः (for प्राञ्जलिः). Ś D1.3.12 T1.2 G1.3 प्रश्रयेण च; D3 -ग्रहणेन च; T3.4 जनकात्मजा; M1 प्रणयेन च; M6 प्रयतेन च (for प्रग्रहेण च). D5 राजवंशमिमं मयि. —^{cd}) M1 राघवं; Cv.t as in text (for पार्थिवम्). T3.4 शिरसाव(T4 °भि)नता भक्त्या सर्वाश्च

G. 7. 50. 10
B. 7. 48. 15
L. 7. 50. 11

यथा भ्रातृषु वर्तेथास्तथा पौरेषु नित्यदा ।
परमो ह्येष धर्मः स्यादेषा कीर्तिरनुत्तमा ॥ ११

यच्चं पौरजनं राजन्धर्मेण समवाप्नुयाः ।
अहं तु नानुशोचामि स्वशरीरं नरर्षभ ।
यथापवादं पौराणां तथैव रघुनन्दन ॥ १२

भवतीरिति. ❀ Cg.k: चरणौ आव(Ck °णौ व)न्द्येति, मदर्थमिति शेषः ।; Ct: प्रग्रहेण प्रकृष्टाञ्जलिग्रहणसमेतेन शिरसेत्यन्वयः । चरणौ वन्द्य । मत्प्रतिनिधितयेति भावः । पार्थिवं च वन्दयित्वा कुशलं ब्रूहि. ❀ —For 10^{cd}, Ñ V1.3 B1.2.4 D1.2.4.5.9 subst.; while B3 D3 ins. after 10^{ab}; whereas D7.10.11 ins. after 10 :

884* शिरसा वन्दनं कुर्याः सर्वासामेव लक्ष्मण ।

[Ñ1 V1.3 D1–5.7.9–11 [अ]भि(Ñ1 D1.3–5 [अ]व)नतो भ्रयाः (for वन्दनं कुर्याः). D5 वर्तमानं तु (for सर्वासामेव).]

—Thereafter D7.10.11 cont.; D6 T G M1–5.7–10 ins. after 10 :

885* जानीषे हि यथा शुद्धा सीता तत्त्वेन राघव ।
भक्त्या च परया युक्ता हिता च तव नित्यशः ।
अहं त्यक्ता च ते वीर प्रजास्वयशभीरुणा ।
यच्च ते वचनीयं स्यादपवादसमुत्थितम् ।
मया हि परिहर्तव्यं त्वं हि मे परमा गतिः । [5]

[(l. 1) M4 mostly damaged for the prior half. D7.10.11 जानासि च (for जानीषे हि). —(l. 2) T4 M3 परमया (for च परया). T3.4 सीता (for हिता). D6.10.11 T3.4 तव च (by transp.); G2 चरति. —(l. 3) G2 M1 साहं (for अहं). D7 वने; T3.4 M1.3 त्वया (for च ते). D6.7 T3.4 M3 प्रजावादेन(T3.4 M3 °दस्य); G2 M5 प्रजानिर्वाद-. D10.11 (both hiatus) अयशोभीरुणा जने (for the post. half). —(l. 4) T4 मे (for ते). —M4 mostly damaged for the post. half. D6 -समुच्छ्रितं (for -समुत्थितम्). D7.10.11 T4 M1 अपवादः समुत्थितः (for the post. half). —(l. 5) D6 T3.4 G1.2 M3 Cm [अ]पि; D10 T1 M3 च; M5 तत् (for first हि). ❀ Cg : अयशोभीरुणैव त्वया त्यक्ता, अनायैवेत्यर्थः । वचनीयं जुगुप्सनम् । तन्मया परिहर्तव्यम्, त्वदाज्ञया वनस्थल इति शेषः ।; Ck : अयशोभीरुणैव त्वया त्यक्ता नान्यथेति शेषः । वचनीयं जुगुप्सनम् । तन्मया परिहर्तव्यमिति त्वदाज्ञया वनस्थलेति शेषः ।; Ct : जनेऽयशोभीरुणा जननिमित्तायशोभीरुणैव त्वया त्यक्ता । नान्यथेति जानामीति शेषः । वचनीयं निन्दा । अपवादोऽभिशापः. ❀]

—D6.7.10.11 T G1.3 M1–5.7–10 cont.; Ś B3 D3.8.12 M6 ins. after 10; Ñ V1.3 B1.2.4 D1.2.4.5.9 cont. after 884* :

886* वक्तव्यश्चैव नृपतिर्धर्मेण सुसमाहितः ।

[D7.10.11 read 886* for the first time before l. 1 of 885*, repeating it here. Ś D6.8.12 T3.4 M6 विज्ञाप्यश्; B3 विज्ञाय (for वक्तव्यश्). V1 B4 D1.3–5.7.10.11(D7.10.11 first time) चापि; B3 [अ]धैव (for चैव). Ñ2 B4 D7.10.11 (D7.10.11 first time) धर्मेषु (for धर्मेण). Ś D8.12 तु; V2 च (for सु-).]

11 ^{a}) Ś D8.12 यद्वद् (for यथा). V3 पुत्रेषु. Ñ1 V1 D1–5.9 भ्रातृष्वेतेषु (for यथा भ्रातृषु). D5 सर्वेषु; M6 वर्तेत. —^{b}) Ś D8 तद्वद् (for तथा). Ñ2 B T3.4 M6 नित्यशः; V3 सर्वशः (for नित्यदा). Ñ1 V1 D1–5.9 पौरजानपदेषु च(D2.9 °ष्वपि). —^{c}) D6.7.10.11 ते (for स्यात्). Ś D8.12 M6 एष ते(Ś1 मे; M6 वै) परमो धर्मः; Ñ1 V1 B2 D1–5.9 T3.4 एष धर्मो हि(B2 °र्मोस्य; D9 °र्मोपि) सुमहान्; Ñ2 V3 B1.3.4 एष धर्मो हि परम(V3 महांश्चैव). —^{d}) V3 भूयात्; D6.7.10.11 तस्मात् (for एषा). T3.4 नीतिर् (for कीर्तिर्). D1 रघूत्तम (for अनुत्तमा). M6 एषा वै कीर्तिरुत्तमा.

12 ^{a}) Ś D8.12 G1 M4.6 यस्त्वं (for यच्चं). M3 मां च; M5 राम (for राजन्). Ñ1 V1.3 D1.3–5 T3.4 यस्त्वां(V3 D1.3.4 °था) सर्वाः प्रजा राजन्(Ñ1 °ज्ञो); D2.9 यस्त्वां सर्वात्मना राजन्; D6.7.10.11 यत्तु पौरजने राजन्. —^{b}) D6.7.10.11 समवाप्नुयात्; T1.2 G3 समाप्नुयाः; M6.9 समुपाश्नु(M9 °प्नु)याः (for समवाप्नुयाः). Ś D8.12 धर्मं तु(Ś1 च) परिपालयेः; Ñ1 V1 D3.4 हर्षपूर्णाः समाप्नुयुः; Ñ2 B हर्षपूर्णं(Ñ2 B2 °र्वं) प्रशाधि हि(Ñ2 °सयि); V3 तथैव रघुनंदन(=12^{f}); D1.2.9 हर्षपूर्णा वसंति च(D2.9 °र्णाननस्तु यः); D5 T3.4 हर्षपूर्णाः(T3.4 °र्वाः) समन्वयुः. —B1 om. (hapl.) from 12^{c} up to l. 2 of 887*. —^{c}) B3 om. तु (subm.). D2 अन्वहं (for अहं तु). D1.3–5 नात्र (for नानु-). —G1 damaged from शरीरं in ^{d} up to वादं in ^{e}. —^{d}) Ś D8.12 स्वं (for स्व-). B3–4 नरोत्तम; M1 नरेश्वर (for नरर्षभ). Ñ V1.3 D1–5.9 T3.4 विप्रयोगं त्वया सह(T3.4 विना). —^{e}) Ñ1 V1 जनापवादः(V1 °दं); Ñ2 V3 B3 D2.3.5.6.9 T3.4 M4.8 यथा(D2.3.5 °दा)पवादः. Ś D8.12 पौरेषु; Ñ2 B2–4 D2.9 M6 पौरेभ्यस्. —^{f}) Ś D8 ते चेह; Ñ2 V1 D12 तवेह; B2.4 D4.5 तवैव; D2.9 तवापि; M10 तथा ते (for तथैव). V3 पूर्णचंद्रसमद्युतिः; T3.4 तथा त्यक्तास्मि भर्तृणा (T4 * * *). ❀ Cv : यथापवादं पौराणां त्वया पौरैः कृतमपवादम् ।; Ck : यथापवादं पौराणामिति । परिहृत्य स्थितिर्भवति तथैव रघुनन्दन वर्तस्वेति शेषः ।; Ct : यथा पौराणामपवादं परिहृत्य स्थितिर्भवति तथैव रघुनन्दन वर्तस्वेति शेषः. ❀ —After 12, Ñ2 B2–4 D3 ins.; while B1 ins. after 12^{ab} (owing to om.) :

887* तत्र शोके मनः कार्यं मद्विनाशे नराधिप ।
अपवादभयात्त्यक्त्वा मां न शोकोऽस्तु ते पुनः ।
अहं तु खलु नात्मानमनुशोचामि लक्ष्मण ।
यदहं जनवादेन त्यक्ता दोषेण नात्मनः ।

एवं ब्रुवन्त्यां सीतायां लक्ष्मणो दीनचेतनः ।
शिरसा धरणीं गत्वा व्याहर्तुं न शशाक ह ॥ १३
प्रदक्षिणं च कृत्वा स रुदन्नेव महास्वनम् ।
आरुरोह पुनर्नावं नाविकं चाभ्यचोदयत् ॥ १४

स गत्वा चोत्तरं कूलं शोकभारसमन्वितः ।
संमूढ इव दुःखेन रथमध्यारुहद्द्रुतम् ॥ १५
मुहुर्मुहुरपावृत्य दृष्ट्वा सीतामनाथवत् ।
वेष्टन्तीं परतीरस्थां लक्ष्मणः प्रययावथ ॥ १६

G. 7. 50. 20
B. 7. 48. 25
L. 7. 50. 17

[B1 om. l. 1–2. —(l. 1) B2 न तु (for तत्र). Ñ2 B2.3 D3 मद्विना ते. B3 नरर्षभ. —(l. 2) B2 त्यक्ता; D3 तेन (for त्यक्त्वा). B3 अपवादेन मां त्यक्त्वा (for the prior half). B2 मात्र (for मां न) and मे (for ते). D3 मा न शोकं च वै पुनः (for the post. half). —(l. 3) D3 हेतुना (for अहं तु). —(l. 4) B3 अहं जनापवादेन (for the prior half).]

—After 12, D6.7.10.11 T G M1–5.7–10 ins.:

888* पतिर्हि दैवतं नार्याः पतिर्बन्धुः पतिर्गतिः ।
प्राणैरपि प्रियं कार्यं भर्तुस्तस्माद्विशेषतः ।
इति मद्भक्तिभावो वक्तव्यो धर्मसंगरः ।
निरीक्ष्य मां च गच्छ त्वमृतुकालातिवर्तिनीम् ।

[(l. 1) T4 damaged for पतिर्हि. D6.7.10.11 T3.4 G1 देवता (for दैवतं). D6.7.10.11 गुरुः; T2 G1 damaged (for गतिः). —(l. 2) D6.7.10.11 T1.2 G2.3 M3.8 तस्माद्भर्तुः कार्यं (by transp.); T3.4 यस्मात्पत्युः कुर्याद्. —T M3.8.9 om. l. 3–4. —(l. 3) D6 G1 धर्मसागरः; D10.11 G2 M1.5 Ck.t धर्मसं(D10.11 Ck.t मम सं)ग्रहः. ❀ Ck: मम संग्रह इति । मया रामं प्रति वक्तव्यसंदेशसंग्रह इत्यर्थः ।; so also Ct. ❀ —M2.7.10 om. l. 4. —(l. 4) M1 मार्य; M4 *च (for मां च). D6 मृत्युकालेनिवर्तिनीं (for the post. half). ❀ Cg: ऋतुकालातिवर्तिनीं गर्भलक्षणवतीम् ।; Ck: ऋतुकाल(°लाति ?)वर्तिनीं गर्भलक्षणवतीं मां निरीक्ष्य त्वं गच्छ पुनश्चापवादप्रसक्तिव्यावृत्त्या इति शेषः ।; Ct: ऋतुकालातिवर्तिनीं गर्भलक्षणवतीं मा मां निरीक्ष्य गच्छ । पुना रामादिकृतापवादप्रसक्तिनिवृत्तय इति भावः. ❀]

—Then M4.5 cont.:

889* पुनरप्याह सौमित्रिं शोकवेगपरिप्लुता ।

13 [a]) Ñ1 B3 M2.4.6–9 ब्रुवत्यां (for ब्रुवन्त्यां). Ñ2 एवं ब्रुवाणां तां सीतां; V3 D1–5.9 एवं ब्रु(D2 °तद्रु)वं(D1.9 °व)त्याः सीतायाः; B1.2.4 एवं तु वादिनीं सीतां. —[b]) Ś1 Ñ V1.3 B D1–5.9 T3.4 -मानसः; D8 G2 -चेतसः (for -चेतनः). —[c]) D6.7.10.11 T3.4 K (ed.) वंद्य(K [ed.] [आ]वंद्य) धरणीं(T3.4 वैदेहीं) (for धरणीं गत्वा). Ñ V1.3 B1.2.4 D1–5.9 मूर्ध्नाभिवाद्य भूयस्तां(Ñ1 B4 °मौ तां; Ñ2 °मौ तु; B1 °मौ वै; B2 °मौ च). —[d]) T3.4 च (for ह).

14 [a]) Ś Ñ1 B1.2.4 D1.2.4.8.9.12 G3 M3 तु; M8 स (for च). Ñ2 V1 D1–5.9 T G1.3 M3 तां; D12 ह; G2 M8 च; M6.10 [अ]थ (for स). Ñ1 V3 B1.2.4 D6.7.10.11 तां कृत्वा. B3 तां तु प्रदक्षिणं कृत्वा. —[b]) Ñ2 स च; V3 एष; D1.4.9 इव (for एव). Ś D8.12 रोदिति स्म(Ś2 D8 स). Ś B3 D8.12 M6 महायशाः; Ñ1 V3 D6.7.10.11 °स्वनः (for °स्वनम्). B1.2.4 प्ररुदन्निति निस्वनं(B4 °तिविस्तरं). —After 14[ab], D6.7.10.11 G1.2 M1.5 ins.:

890* ध्यात्वा मुहूर्तं तामाह किं मां वक्ष्यसि शोभने ।
दृष्टपूर्वं न ते रूपं पादौ दृष्टौ तवानघे ।
कथमत्र हि पश्यामि रामेण रहितां वने ।
इत्युक्त्वा तां नमस्कृत्य पुनर्नावमुपारुहत् ।

[(l. 1) M1.5 मा (for मां). —(l. 2) D6 G1.2 M1.5 मया (for तव). ❀ Ct: किं मां वक्ष्यसि । निरीक्ष्य मां गच्छेति किं वदसीत्यर्थः । शोकवशात्कालान्तरे प्रयोगो न दोषाय । तथा निरीक्षणस्यायोग्यतोपपादकम्—दृष्टपूर्वमिति. ❀ —(l. 4) G2 उपागमत्; M5 अथारुहत् (for उपारुहत्). M1 रुदन्नेव महास्वनं(=14[b]) (for the post. half).]

—[c]) G1 आरुह्य च (for आरुरोह). —[d]) Ñ1 V1 D1–5.9 T3.4 M9 नाविकांश् (for नाविकं). V1 T3.4 M6 [अ]भ्यचोद (V1 °देश)यत्; D2.5.9 [अ]भ्यनोदयत्; T2 G3 स चोदयत् (for [अ]भ्यचोदयत्). Ś D8.12 नाविकेनानिलोदयात्(Ś1.3 D8 °थां); Ñ2 B1.2.4 स्वरयामास नाविकं.

15 [a]) Ñ1 V1.3 D1–4.9 T3 तु गत्वा; T4 च गत्वा (by transp.) (for गत्वा च). V1 D5–7.10.11 T1.2 G3 M1.3 तीरं (for कूलं). —[b]) Ñ1 V1.3 D2.9 T3.4 -प्रपीडितः (for -समन्वितः). —Ś2 repeats 15[cd] after 17[ab]. —[c]) Ñ2 B1.2 D5 M2.7 शोकेन (for दुःखेन). —[d]) D5 G1.3 M1.2.5.7.9 अभ्या(M5 °प्या)रुहद्. D5 रुदन् (for द्रुतम्). Ñ2 B रथमारूढवान्पुनः. —For 15[cd], Ñ1 V1.3 D1–4.9 T3.4 subst.:

891* आरुरोह रथं दीनः सौमित्रिर्व्याकुलेन्द्रियः ।
[V3 वीरः (for दीनः).]

16 [a]) Ś Ñ V1.3 B D2.5.8.9.12 M6 अथावृत्य(B2 °वर्त्य; M6 °हृत्य); D6.7.10.11 G2 M1.3.10 परावृत्य; T2 असौ वृत्य; T3.4 G1 M2.4.7.9 उपावृत्य (for अपावृत्य). —[b]) Ś Ñ V1.3 B D1–5.8.9.12 T3.4 पश्यन्; M6 दृष्टिं (for दृष्ट्वा). Ś D8.12 अथ त्वरन्; V1.3 D2.9 T3.4 अ(V3 त)थारुदत्; D5 अनंतरं (for अनाथवत्). ❀ Ck: अनाथवत्, अनाथेव ।; Ct: अनाथवदनाथेव, न तु वस्तुतोऽनाथा । पूर्णचिद्घनस्वरूपत्वादिति भावः. ❀ —[c]) Ś D8.12 तिष्ठंतीं; D5–7.10.11 चेष्टंतीं; M2 *ष्टंतीं. G2 पथि (for पर-). Ś D5.8.12 -कूलस्थां (for -तीरस्थां). M10 परमस्वस्थां. Ñ V1.3 B1.2.4 D1–4.9 T3.4 चेष्ट(Ñ1 वेप; T3.4 वेष्ट)मानां परे तीरे(Ñ2 B1.2.4 पारे); B3

7. 50. 21
7. 48. 2 c
7. 50. 18

दूरस्थं रथमालोक्य लक्ष्मणं च मुहुर्मुहुः ।
निरीक्षमाणाप्युद्विग्नां सीतां शोकः समाविशत् ॥ १७

सा दुःखभारावनता तपस्विनी
यशोधरा नाथमपश्यती सती ।
रुरोद सा बर्हिणनादिते वने
महास्वनं दुःखपरायणा सती ॥ १८

इती श्रीरामायणे उत्तरकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

Arya Research Team

विचेष्टंतीं तु पार्श्वस्थां. —^{a}) Ñ1 V1.3 D1–4.9 T3.4 ततः; Ñ2 B1.2.4 तदा; G1 द्रुतं; G2 पथि (for अथ). B3 गंतुमारभत् (for प्रययावथ).

17 V3 om. 17^{ab}.—^{a}) M6 दूरं तं; M9 दूरस्थ-. Ñ1 लक्ष्मणं दृष्ट्वा; B1.2.4 च रथं दृष्ट्वा (for रथमालोक्य).—^{b}) Ñ1 रथं चैव (for लक्ष्मणं च).—After 17^{ab}, Ś2 repeats 15^{cd}. —After 17^{ab}, M6 ins.:

892* आलोक्य लक्ष्मणो वीरो वेपन्तीं परवीरहा ।

—^{cd}) D2.9 सोद्वेगां; D5 चोद्विग्नां; D10.11 तूद्विग्नां (for उद्विग्नां). Ñ2 V1.3 T3.4 निरीक्ष्यमाणा सोद्विग्ना(Ñ2 V1 °द्वेगा); M6 निरीक्षमाणश्चोद्विग्नः (for ^{c}). Ñ2 V1.3 T3.4 सीता (for सीतां). Ñ2 V3 M6 शोकं; V1 T3.4 दुःखं (for शोकः). B3 रुदंती भृशसंतप्ता सीता शोकमुपागमत्.

18 ^{a}) M1.2.4.6.7 सु- (for सा). D6.7.10.11 यशस्विनी. Ñ V1.3 B1.4 D1–4.9 T3.4 -[अ]भि(Ñ T3.4 -[अ]ति; V1.3 [अ]पि; B1 -[अ]व)निपीडिता सती (for -[अ]वनता तपस्विनी). B2 सा दुःखभारेण निपीडिता सती; B3 सा दुःखिता चोपहता ****.—^{b}) Ś1.3 B3 D5.12 T1.2 G2.3 M1.3.5.10 यशोधना(B3 T2 °ध *; M10 °धनं); Ñ1 V1.3 B4 D1–4.9 T3.4 यशस्विनी; Ñ2 B1.2 मन(Ñ2 तप)स्विनी; Ct as in text (for यशोधरा). Ñ V3 B D1–4.9 T3.4 भृशं; D5 तदा (for सती). ❀ Ct: दुःखभारावनता सेव। यशोधरा पातिव्रत्ययशोवती. ❀ —^{c}) Ś D3.12 वै (for सा). Ñ V1.3 B D1–4.9 त(B3 चा)स्मिन्बहु(B1 °न्वर)बर्हिणे (for सा बर्हिणनादिते). D5 सीता रुरोदार्तमयूरनादवत्.—^{d}) V1 G1 महास्वना; M6 मनस्विनी (for महास्वनं). Ś D5.8.12 M6 तदा (for सती). Ñ B बाष्पसमाकुले(B2 °परिप्लुते)क्षणा; V1.3 D1–4.9 T3.4 बाष्पसमा(D1 °कुला)कुला तदा (for दुःखपरायणा सती).

Colophon.—*Kāṇḍa name*: Ś1 D2.9 om.—*Sarga name*: Ś Ñ V1 B1.3.4 D1–4.8.12 लक्ष्मणोप(Ñ V1 B1.4 D3.4 °पा)वर्तनं(D2 °नः); V3 लक्ष्मणपरावर्तनं; B2 लक्ष्मणगमनं; D5 सीतापरित्यागः; D6 लक्ष्मणवर्तनं; D9 लक्ष्मणोपावर्तः.—*Sarga no.* (figures, words or both): Ś Ñ1 V3 B3 D2.12 om.; Ñ2 B2.4 D9 52; V1 37; B1 51; D1.4–7.10.11 T1.2 G M1–5.7–10 48; D3 49; T3 53; T4 55; M6 46.—After colophon, T4 concludes with श्रीरामार्पणमस्तु; G M1.5.8 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

४८

सीतां तु रुदतीं दृष्ट्वा ये तत्र मुनिदारकाः ।
प्राद्रवन्यत्र भगवानास्ते वाल्मीकिरव्यधीः ॥ १
अभिवाद्य मुनेः पादौ मुनिपुत्रा महर्षये ।
सर्वे निवेदयामासुस्तस्यास्तु रुदितस्वनम् ॥ २
अदृष्टपूर्वा भगवन्कस्याप्येषा महात्मनः ।
पत्नी श्रीरिव संमोहाद्विरौति विकृतस्वरा ॥ ३
भगवन्साधु पश्येमां देवतामिव खाच्च्युताम् ।
न ह्येनां मानुषीं विद्मः सत्क्रियास्याः प्रयुज्यताम् ॥ ४

G. 7. 51. 4
B. 7. 49. 6
L. 7. 51. 4

48

V2 missing for 1–4[a] (cf. v.l. 7.12.2). —Before 1, D3 ins.:

893* एवं सा राम रामेति विलप्य बहुशस्तथा ।
विलपन्ती जगामाशु वाल्मीकेराश्रमं शुभा ।

1 [a]) Ś V3 D2.8.9.12 T3.4 प्र-; B2 G1 M8 च; Cm g.k.t as in text (for तु). D5 श्रुत्वा (for दृष्ट्वा). D6 M3 K (ed.) सीतां रुदंतीं दृष्ट्वा तु (M3 तां दृष्ट्वा; K [ed.] दृष्ट्वा तां). —[b]) T2 damaged for ये त. D5–7.10.11 ते (for ये). K (ed.) तत्र वै (for ये तत्र). B1 -पुंगवाः (for -दारकाः). —D9 om. (hapl. see var. below) 1[c]–2[b]. —[c]) D5 भगवंतं तं (for यत्र भगवान्). B3 त्वरमाणास्ततो जग्मुर्. —[d]) B3 D5 यत्र (for आस्ते). B3 आश्रमं; D6 G1.3 M1.3 अग्रधीः; D7.10–12 M6 Ct उग्रधीः (for अग्र्यधीः). ❀ Ct : उग्रधीरुग्रतपोविषयबुद्धिः. ❀ —For 1[cd], Ñ1 V1.3 D1–4 T3.4 subst.:

894* प्राद्रवन्त स यत्रास्ते वाल्मीकिर्भगवानृषिः ।

[Ñ1 दुद्रुवुस्ते; D1.4 प्राद्रवंस्ते (for प्राद्रवन्त). V3 प्राद्रवंश्चैव यत्रासौ; D3 प्राद्रवन्यत्र सहसा (for the prior half).];
while Ñ2 B1.2.4 subst. for 1[cd]:

895* दुद्रुवुस्ते तदा सर्वे वाल्मीकिं मुनिपुंगवम् ।

[Ñ2 B1 वाल्मीकि-.]

2 V2 missing for 2; D9 om. 2[ab] (for both cf. v.l. 1). —[a]) Ś Ñ V1.3 B1–3 D1–5.8.12 M6 तेभिवा (Ś3 D6.12 °वं) द्य. B ततः (for मुनेः). —[b]) Ś Ñ V1.3 B3 D1–5.8.12 T3.4 M6 संभ्रांता (Ś B3 D8.12 M6 वाल्मीकेर्; D5 वाल्मीकीं) मुनिदारकाः. —[c]) Ś D8.12 M6 त्रस्ताः; D7 T1.2 G3 M1.3 Cm.g.k सर्वे (for सर्वे). Ñ1 V1.3 D1–4.9 T3.4 न्यवेदयंत (Ñ1 V3 °श्र; V1 °स्तु) तां चैव; Ñ2 B कारुण्यात्कथयामासुस् (B4 °यांचकुस्). —[d]) Ś D5.8.12 M6 तं; G1 च; G2 वै; M5 तद् (for तु). V1.3 तथैव; D1.3.4 T3.4 तं चैव; D2 मुनये; D9 तदेव (for तस्यास्तु). V3 D7 M1 रुदितं (for रुदित-). Ś V1 D1–5.8.9.12 T3.4 M6 -ध्वनिं; V3 मुनिं; M1 वने (for -स्वनम्). Ñ B तां (Ñ1 ते) तत्र रुदतीं तदा.

3 V2 missing for 3 (cf. v.l. 1). —[a]) Ñ V1.3 B1.2.4 D1–4.9 अचिंत्यरूपा; B3 वा नष्टपूर्वा; D5 T2 M9 अदृष्टपूर्वं (D5 °र्वो); G1 * दृष्टपूर्वा; G2 सा दृष्ट° (for अदृष्टपूर्वा). —T4 om. (hapl.) from 3[b] up to the prior half of l. 1 of 896*. —[b]) Ś D8.12 योषिन्; B1 [अ]प्येका; D5 °ष (for [अ]प्येषा). Ś D8 महास्वरा; Ñ2 B4 °मुने; D5 °स्वनः; D12 °स्वना (for महात्मनः). —[c]) G2 M6 पद्मा (for पत्नी). Ñ2 B इवो लक्ष्मीरिवापन्ना. —[d]) D6 हि रौति; T1 M3 बिभाति; T2 एकाकी (for विरौति). Ñ V1.3 B D1–4.9 T3 G (ed.) भूशमंगना (G [ed.] °माकुला); D6.7.10.11 G M1.2.4–10 विकृताननाः; T1.2 M3 °स्वना (for विकृतस्वरा).

4 V2 missing for 4[a] (cf. v.l. 1). —[a]) B1 स भवान्. Ś1 Ñ2 V1 B1–3 D3 [ए]तां; Ñ1 B4 D2.9 T3 M6 [ए]नां (for [इ]मां). Ś3 D8.12 पश्येमः; D7.10.11 पश्येस्त्वं; K (ed.) पश्य त्वं. —V2 resumes from 4[b] (cf. v.l. 7.12.2). —[b]) Ś D5.8.12 प्र-; B2 ख- (for खाच्). Ñ1 V1.3 D1–4.9 T3 खाच्च्युतां (V3 प्रद्योतां; D9 वा च्युतां) देवतामिव. —After 4[ab], D6.7.10.11 S (except M6) ins.:

896* नद्यास्तीरे तु भगवन्वरस्त्री कापि दुःखिता ।
दृष्टास्माभिः प्ररुदिता दृढशोकपरायणा ।
अनर्हा दुःखशोकाभ्यामेका दीना अनाथवत् ।

[T4 om. up to the prior half of l. 1 (cf. v.l. 3). —(l. 1) T3.4 च (for तु). D6.7.10.11 transp. तीरे and तु. M10 वरा (for वर-). T3.4 च (for का). —(l. 2) M8 पृष्टा (for दृष्टा). D6 स-; M3 सु- (for प्र-). T3.4 M8 -रुदती (for -रुदिता). D6.7.10.11 M2.4.7–9 दृढं (for दृढ-). —(l. 3) M8.9 अनर्हा. T G2.3 M2–5.7.10 (all with hiatus) -शोकार्ता; M1 °नाम्; M8.9 °र्ताम्; Ct as above (for -शोकाभ्याम्). G1 ह्येका दीना; M8.9 एकां दीनाम्. T [अ]प्यनाथवत्; G M3.5 ह्य (G3 त्व)नाथवत्. ❀ Cm : अनर्हा दुःखस्येति शेषः । ; Cg.k : अनर्हेति, दुःखस्येति शेषः (। Ck अनाथवद्वर्तते तामिमां साधु पश्य सम्यग्दृष्ट्वानुगृहाणेति पूर्वेण संबन्धः) ।; Ct : अनर्हा दुःखस्येति शेषः । दुःखशोकाभ्यां दीना अनाथवद्वर्तते तामिमां साधु पश्येः, दृष्ट्वानुगृहाण च. ❀]

B (ed.) reads 4[c]–6 (along with insertions) within brackets. —[c]) M4 damaged for न ह्येनां. B1 एहि (for न हि). Ś Ñ1 V D2.9.12 T2 [ए]तां; Ñ2 B1–3 D6 [इ]मां; D1.4.8 T1 M3.8 [ए]षां (erroneously) (for [ए]नां). Ś D8.12 विप्र (for विद्मः). B4 मन्यामहेमानुषीं तां; G1.3 न ह्येषा मानुषी विद्वन् (G3 °प्र). —[d]) T1 M3.5.7 [अ]स्यां (for [अ]स्याः). M2.4.5.7.9 प्रदीयतां (for प्रयुज्यताम्). Ś D8.12 गमनं प्रति युज्यतां; Ñ1 V B4 D1–5.9 T3.4 लक्ष्म्या परमया

: 7. 51. 5
: 7. 49. 6
: 7. 51. 5

तेषां तद्वचनं श्रुत्वा बुद्ध्या निश्चित्य धर्मवित् ।
तपसा लब्धचक्षुष्मान्प्राद्रवद्यत्र मैथिली ॥ ५

तां सीतां शोकभारार्तां वाल्मीकिर्मुनिपुंगवः ।
उवाच मधुरां वाणीं ह्लादयन्निव तेजसा ॥ ७

तं तु देशमभिप्रेत्य किंचित्पद्भ्यां महामुनिः ।
अर्घ्यमादाय रुचिरं जाह्नवीतीरमाश्रितः ।
ददर्श राघवस्येष्टां पत्नीं सीतामनाथवत् ॥ ६

स्नुषा दशरथस्य त्वं रामस्य महिषी सती ।
जनकस्य सुता राज्ञः स्वागतं ते पतिव्रते ॥ ८

आयान्त्येवासि विज्ञाता मया धर्मसमाधिना ।
कारणं चैव सर्वं मे हृदयेनोपलक्षितम् ॥ ९

सु(D5 कृ)तां; B3 कृपा स्वस्याः प्रयुज्यतां. —After 4, D6.7.10.11 S (except M6) ins. :

897* आश्रमस्याविदूरे च व्यक्तं सा शरणं गता ।
त्रातारमिच्छते साध्वी भगवंस्त्रातुमर्हसि ।

[(l. 1) T3.4 [अ]ति- (for [अ]वि-). D7 -दूरं (for -दूरे). T1.2 M3.5 सा; G1.3 तु (for च). M1 -दूरेण (for -दूरे च). T3 त्यक्तं (for व्यक्तं). T1.2 M3 हि; M5 च (for सा). D6.7.10.11 त्वामियं (for व्यक्तं सा). G2 M2.4.8.9 शरणागता. —D11 om. from l. 2 up to 7. —(l. 2) D6 T3.4 M1.2. 5.7.10 इच्छती (for इच्छते).]

5 D11 om. 5 (cf. v.l. 4). —[a]) M4 damaged for तद्वचनं. D6.7.10 G2 M8.10 तु (for तद्). —[b]) D1.3.4 मुनिर् (for बुद्ध्या). Ś D8.12 वै मुनिः (for धर्मवित्). D5 तपसा लब्धचक्षुषा. —[c]) T1 G3 M3.5 मनसा (for तपसा). Ñ2 [आ]दित्य-; V2 B दिव्य- (for लब्ध-). Ś D5.8.12 वाल्मीकिः सु(D5 °किस्तु)महातेजाः M6 तपसा लक्षयित्वाशु. ❀ Cv : तपसा लब्धचक्षुष्मानिति पाठः. ❀ —[d]) V3 अगमद्; M8 प्राद्रवन् (for प्राद्रवद्). Ñ2 श्रुत्वा यत्र स मैथिली (corrupt); B1 प्राद्दृश्यस्तत्र मैथिली (sic); B2 प्रायाद्यत्र स मैथिली; B4 क्षपश्यत्तत्र मैथिलीं. —After 5, V2 D6.7.10 ins. 899*, while B4 ins. :

898* ततस्तैः सहितो विप्रः प्रतस्थौ मैथिलीं प्रति ।

6 D11 om. 6 (cf. v.l. 4). —[a]) D6.7.10 -द्रुत्य; M4.5.9 -प्रेक्ष्य (for -प्रेत्य). V2 B1–3 ततः शिष्यैः परिवृतः. —[b]) V2 दृष्ट्वा; B1–3 M6 गत्वा (for पद्भ्यां). D6.7.10 -मतिः (for -मुनिः). M1.5 चित्रपादपसंकुलं. —For 6[ab], Ś Ñ V1.3 B4 D1–5.8.9.12 T3.4 subst.; while V2 D6.7.10 ins. after 5 :

899* तं प्रयान्तमभिप्रेक्ष्य शिष्या ब्रह्मर्षिमन्वयुः ।

[D7 transp. तं and प्रयान्तम्. V2 अति- (for अभि-). B4 D6.7.10 -प्रेत्य (for -प्रेक्ष्य). V2 damaged for शिष्या. Ś D8.12 महर्षिम् (for ब्रह्मर्षिम्). Ñ2 अन्ययुः (for अन्वयुः). V2 B4 सर्वे तदान्व(V2 °दा य)युः; D6.7.10 होनं महामतिं (for ब्रह्मर्षिमन्वयुः).] —[c]) Ś1 Ñ2 V2 B1 D3.5.8.12 अर्घम्. B4 आवेद्य (for आदाय). Ś D12 तु चिरं; V1 सु°; V2 B4 M10 विपुलं (for रुचिरं). —[d]) V1.3 D1–4.9 T3.4 जाह्नव्यास्. Ś Ñ B1–3 D5.6.8.12 M6 आविशत्(Ś1 D8 °न्); V1.3 D1–4.7.9.10 T3.4 आगमत्(D4.9 T3.4 °न्); V2 B4 T1.2 M3 आश्रितां(V2 B4 °ताः) (for आश्रितः). —D5 om. 6[c]–8[b]. Ś Ñ V B D1–4.8.9.12 M6 om. 6[c/f]. —[e]) G2 [इ]मां (for [इ]ष्टां). D6 राघवश्रेष्ठां; T1(before corr.) राघवश्रेष्ठां. —[f]) D6.7.10 सीतां पत्नीम् (by transp.).

7 D5.11 om. 7 (cf. v.l. 6 and 4 respy.). —V2 reads 7[ab] twice (second occurrence in marg.). —[a]) Ś B4 D8.12 स (for तां). Ś V2 (first time) B4 D8.12 M6 दुःख- (for शोक-). Ñ1 V1.3 D1–4.9 तां(D2.9 स) सीतामतिदुःखार्तां; Ñ2 V2 (second time) B1–3 ततः सीतां सुदुःखार्तां. —[b]) M4 damaged from कि up to ड in °. Ś V2 (second time) B3 D8 M6 मुनि(M6 ऋषि)सत्तमः; Ñ1 V1.2(first time).3 B4 D1–4.9 T3.4 भगवानृषिः. —After 7[ab], B2 ins. :

900* दृष्ट्वा तत्र समासीनां रोदमानां भयाकुलाम् ।

—[c]) Ñ1 V1.3 D1–4.9 आबभाषे मधुरया(V1 रुचिरया; V3 स मधुरां; D1.3.4 स मधुरं). —[d]) Ś Ñ V B D1–4.8.9.12 M6 साम्ना(Ñ1 V1 D1–4.9 वाचा; V3 वाचं) प्र(B2 प्रा)ह्लादयन्निव. ❀ Ck : तां सीतां मुनिपुत्रैर्दृष्ट्वानुप्राह्यत्वेनोक्तां शोकभारार्तां सीतां दृष्ट्वा वाल्मीकिरुवाच । एवमिह सोपस्कारं ग्रन्थयोजनाशक्त्या 'अनाथवत्' सीतां तामित्येतन्मध्ये योजनार्थं कांश्चिच्छ्लोकान्प्रक्षिपन्ति, बहुषु कोशेषु सन्ति ते । ; Ct : एतदुत्तरम्, 'तां सीताम्' इति श्लोकः । मध्ये 'नह्येनां मानुषीं विद्म' सत्क्रियास्याः प्रयुज्यताम् । आश्रमस्याविदूरे च त्वामियं शरणं गता ॥ त्रातारमिच्छते साध्वी भगवंस्त्रातुमर्हसि । तेषां तु वचनं श्रुत्वा बुद्ध्या निश्चित्य धर्मवित् ॥ तपसा लब्धचक्षुष्मान्प्राद्रवद्यत्र मैथिली । तं प्रयान्तमभिप्रेत्य शिष्या होनं महामतिम् । तं तु देशमभिद्रुत्य किंचित्पद्भ्यां महामतिः । अर्घ्यमादाय रुचिरं जाह्नवीतीरमागमत् ॥ ददर्श राघवस्येष्टां सीतां पत्नीमनाथवत् ॥' इति श्लोकचतुष्टयमधिकं प्रक्षिप्तमिति कतकः । तां सीतां मुनिपुत्रैर्दृष्ट्वानुप्राह्यत्वेनोक्तां शोकग्रस्तां तां सीतां तत्समीपे गत्वा दृष्टां वाल्मीकिरुवाचेति सोपस्कारः संबन्धः. ❀

19 ^{a}) V1 सो (for यो). D6 स्वयं हस्तागतं दृष्ट्वा. —^{b}) Ñ1 V1 प्रहरेच्; Ñ2 V2.3 B D3.5 M6 प्रदद्यात्; D1.4 प्रहारं; D2.9 प्रहरन्; T2 G2 प्रसभं; M2 प्रदरं; G (ed.) ददाति; Cm.g.k.t as in text (for प्रसरं). Ñ2 V2 B2.4 D3.5 M6 प्रसरं; V3 शरणं; B1.3 D1.4 प्रसभं; D9 शात्रवान् (for शत्रवे). Ś D8.12 प्र(D8 न)ददाति रणं; M1 शत्रवे प्रसरं (by transp.) (for प्रसरं शत्रवे). Ś Ñ2 V2.3 B D1.3–5.8.12 M6 रिपोः; Ñ1 V1 D2.9 रिपुः; D6 [ऽ]दिशत्; D7.10.11 T3.4 दिशेत् (for ददौ). ❀ Cm.g.k.t: प्रसरमवकाशम्. ❀ —V2 reads 19^{c-d} in marg. —^{c}) Ñ1 V1 D1.2.4.5 सहते; Ñ2 V2 B स(B2.3 सु) महान्; D9 हन्यते; T2 M8 सहसा (for स हतो). Ñ2 V2 B D7.10.11 T3.4 -बुद्धिः स्यात् (for -बुद्धित्वाद्). Ś V3 D3.8.12 M6 स हन्यते मंदबुद्धिर्. —^{d}) Ñ1 V1 D1.2.4.5.9 सोपि कापुरुषः स्मृतः; Ñ2 V2 B स लोके पुरुषाधमः (V2 °षस्तथा). —After 19, Ś Ñ1 V3 D1–5.8.9.12 T3 L (ed.) ins.:

1037* किमुक्त्वा बहु युध्यस्व वध्योऽसि मम दुर्मते ।

[D5 मम (for बहु). T3 किं बहूक्त्या च; L (ed.) विमुक्तबाहुर्. Ś D8.12 विमुक्तं (D12 °क्तो) बाहुयुद्धस्त्वं (corrupt) (for the prior half). Ñ1 व ******* (damaged) (for the post. half).];

while Ñ2 B1.2 D7.10.11 ins. after 19; whereas V2 B3.4 cont. after 1039*:

1038* तस्मात्सुदृष्टं कुरु जीवलोकं
शरैः शितैस्त्वां विविधैर्नयामि ।
यमस्य गेहाभिमुखं हि पापं
रिपुं त्रिलोकस्य च राघवस्य ।

[(l. 1) B2 स्व- (for सु-). —(l. 2) B3 विमलैर्; B4 विलयं (for विविधैर्). B1 विमलीकृतैश्च. —(l. 3) V2 B2–4 हि पाप; B1 नयामि (for हि पापं). —(l. 4) B1.4 सदेवकस्य (for च राघवस्य). B2 यथा त्रिनेत्रो त्रिपुरं त्रिलोके; B3 यथैव रुष्टस्त्रिपुरं त्रिनेत्रः.]

—After 19, V2 B3.4 ins.:

1039* एवमेव हि शत्रूणां वर्तितव्यं यथा तथा ।
तस्मात्त्वां निहनिष्यामि शरेणानतपर्वणा ।

[(l. 2) V2 तच्छ्रुत्वा; B3 तच्च त्वां; B4 त्वामथ (for तस्मात्त्वां). B3 [अ]नेन (for [आ]नत-). V2 B3 -वर्चसा (for -पर्वणा).]

Colophon: D1–5.9 om. —*Sarga name*: Ś Ñ1 V1 D8.12 शत्रुघ्नवाक्यं; Ñ2 V3 B D6 लवणाक्षेपः; V2 लवणाधिक्षेपः. —*Sarga no.* (figures, words or both): Ś Ñ1 V2.3 B4 D12 om.; Ñ2 T3 73; V1 52; B1 74; B2 59; B3 72; D6.7.10.11 T1.2 G M1–5.7.9.10 68; D8 65; T4 76; M8 66; M3 67. —After colophon, T4 concludes with श्रीरामार्पणमस्तु। श्रीरामाय नमो नमः; G M1.5.8 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

Anna Research Team

६१

G. 7. 75. 1
B. 7. 69. 1
L. 7. 72. 1

तच्छ्रुत्वा भाषितं तस्य शत्रुघ्नस्य महात्मनः ।
क्रोधमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् ॥ १
पाणौ पाणिं विनिष्पिष्य दन्तान्कटकटाय्य च ।
लवणो रघुशार्दूलमाह्वयामास चासकृत् ॥ २
तं ब्रुवाणं तथा वाक्यं लवणं घोरविक्रमम् ।
शत्रुघ्नो देवशत्रुघ्न इदं वचनमब्रवीत् ॥ ३
शत्रुघ्नो न तदा जातो यदान्ये निर्जितास्त्वया ।
तदद्य बाणाभिहतो व्रज त्वं यमसादनम् ॥ ४
ऋषयोऽप्यद्य पापात्मन्मया त्वां निहतं रणे ।
पश्यन्तु विप्रा विद्वांसस्त्रिदशा इव रावणम् ॥ ५
त्वयि मद्बाणनिर्दग्धे पतितेऽद्य निशाचर ।
पुरं जनपदं चापि क्षेममेतद्भविष्यति ॥ ६

61

D1–5.9 cont. the previous Sarga.

1 ^{a}) Ñ1 D3.5 रोषतप्तस्य (for भाषितं तस्य). V1 D1.2.4.9 श्रुत्वा रोषपरीतस्य.—^{b}) B3 राघवस्य (for शत्रुघ्नस्य). —G1 damaged after म up to य in 4^{b} reading 2^{ab} only after 1042*. —V2 reads 1^{cd} (except रोष [see var.]) in marg. —^{c}) Ś Ñ V B D1–5.8.9.12 M6 रोषम् (for क्रोधम्). —^{d}) D1 om. (hapl.); G (ed.) रक्षस् (for first तिष्ठ). Ñ2 V2 B राक्षसः स नरोत्तमे(Ñ2 V2 °मः).

2 G1 damaged for 2 (2^{ab} first time) (cf. v.l. 1). Ś V2 D8.12 om. 2. —^{a}) G1.2 पाणिं पाणौ (by transp.). B4 D6.7.10.11 T1.2.4 स निष्पिष्य; M2.4.6.7 च निष्पीड्य; M10 च नि° (for विनिष्पिष्य). —^{b}) D6 (marg. also as in text) T1.2.4 G1.3 M Ck कटकटाय्य; Ct as in text (for कटकटाय्य). G2 कटकटायन्. B2 (marg. also) दंतैर्दंतान्समस्पृशन्; B4 क्रोधताम्रायतेक्षणः. —For 2^{ab}, Ñ1 V1 D1–5.9 T3 subst.:

1040* निपीड्य पाणिना पाणिं दन्तैर्दन्तांस्तथापिषत् ।

[V1 D2.3.5 निष्पीड्य. D1.4 तदा (for तथा). Ñ1 [अ]परान्; D9 [अ]पिषन् (for [अ]पिषत्). D3.5 अ(D5 च)संस्पृशन् (for तथापिषत्).]

—T1.2 M1.8 om. 2°–7. —^{c}) Ñ2 V2 B1.2 भारं च भुवि (Ñ2 भूमौ; B2 तं वि) निक्षिप्य; B3 भारं भुवि विनिक्षिप्य; B4 शत्रुघ्नस्तु स चाक्षिप्य. —^{d}) Ñ1 V1 D2.3.9 T3 राक्षसः स(Ñ1 damaged from स up to तथा in 3^{a}; D9 om. [subm.]; T3 तं) नरांतकः; Ñ2 V2 B M6 तिष्ठ तिष्ठेति चाब्रवीत्(=1^{d}); D1.4.5 राक्षसः समरांतकः. —After 2, D9 ins.:

1041* उवाच निर्घृणो वाक्यं महानादं विनद्य च ।
मया विनिर्जिताः पूर्वं राजानो बहुविक्रमाः ।
भस्मीकृतश्च बलवान्मांधाता तव पूर्वजः ।
अमराश्चैव बलिनो द्वंद्वयुद्धमुपागताः ।
मम रोषपरीतस्य पुनः कः स्थातुमर्हति । [5]
कालदिष्टोऽसि यद्बालयान्मत्सञ्जु(?)र्विस्मयं गतः ।

3 G1 damaged for 3 (cf. v.l. 1). T1.2 M1.8 om. 3; Ñ1 damaged up to तथा in ^{a} (for both, cf. v.l. 2). —^{a}) Ñ2 V1.2 B D1–4.9 तदा (for तथा). Ñ2 V2 B पापं; D8 दृष्ट्वा (for वाक्यं). M3 तमाह्वयंतं सौमित्रिर्. —^{b}) D5.8 राक्षसं (for लवणं). Ś Ñ V B D1–5.9.12 T3 भीम- (for घोर-). Ñ1 D6.7.10.11 T4 M3 -दर्शनः; M5 -विक्रमः (for -विक्रमम्). —^{c}) D6 (marg. also) नित्य- (for देव-). Ñ2 B D8 -शत्रुं तम् (B1 [with hiatus] तु; D8 [with hiatus] च) (for -शत्रुघ्न). —^{d}) G2 वचनं चेदम् (for इदं वचनम्).

4 G1 damaged up to य in ^{b} (cf. v.l. 1). T1.2 M1.8 om. 4 (cf. v.l. 2). —^{a}) D6 शत्रुघ्ने. B2 D6 T3 G2.3 M3–5.9 तथा (for तदा). D6 जाते; T4 M3 राजा; G2 जेता (for जातो). B4 त्वया जेयो (for तदा जातो). —^{b}) D6 G2 M3.5.6.9 यथा (for यदा). Ś D8.12 [अ]द्य विजितस्; Ñ1 V1 D1–5.9 T3 चान्ये (Ñ1 T3 [अ]न्ये नि)हतास् (for [अ]न्ये निर्जितास्). B4 यथान्यो निर्जितस्त्वया. —^{c}) Ñ2 V2 B1.2.4 मम (for तद्). Ñ1 V1 D1–5.9 शत्रुघ्नः; M5 तदस्य; M9 अभेद्य- (for तदद्य). B3 मम बाणैर्नाभिहतो (sic). —^{d}) G1 damaged for ज त्वं य. Ñ V1 D2–5.9 यास्यसे(Ñ1 D5 °ते); D1 यास्यसि त्वं (hypm.); D8 युज त्वं (for व्रज त्वं). V1 -पत्तनं (for -सादनम्).

5 T1.2 M1.8 om. 5 (cf. v.l. 2). —^{a}) Ñ2 V2 B तु; G2.3 हि (for ऽपि). Ś Ñ1 V1 D1–5.9.12 ऋषयोऽप्यद्य; D8 सर्वभूतानि (for ऋषयोऽप्यद्य). Ñ2 V2 B पश्यंतु (for पापात्मन्). —^{b}) Ś D8 [अ]द्य (for त्वां). M4 निहते. Ñ2 V2 B पापात्मानं हतं रणे(B1.4 रणे हतं); D12 यदैव निहतो रणे; T3.4 M3 ये त्वया निहता रणे(M3 पुरा). —Ñ1 damaged for ^{cd} (except णम्). —^{c}) Ñ2 V2 B मदीय-; V3 पश्यंति (for पश्यन्तु). Ś Ñ2 V2.3 B D8.12 शरविद्धांगं(Ñ2 D8 °सं); D1 * * वि * गं; D3–5 विप्रविद्धांगं; T3 विप्रदिग्धांगं (for विप्रा विद्वांसस्). D2.9 प्रपश्यंतु महात्मानः.

6 T1.2 M1.8 om. 6 (cf. v.l. 2). —^{a}) Ñ1 D1–5.9 बाणाग्नि- (for मद्बाण-). Ś1 -निहतः; B4 -निर्भिन्ने (for -निर्दग्धे). —^{b}) D1.4.5 पातिते. V2 च (for ऽद्य). Ñ1 V2.3 B D3.6.7.10.11 G1 M5 निशाचरे(B1 °*); Ñ2 महीतले (for निशाचर).

Arya Research Team

अद्य मद्बाहुनिष्क्रान्तः शरो वज्रनिभाननः ।
प्रवेक्ष्यते ते हृदयं पन्नगंशुरिवार्कजः ॥ ७
एवमुक्तो महावृक्षं लवणः क्रोधमूर्छितः ।
शत्रुघ्नोरसि चिक्षेप तं शूरः शतधाच्छिनत् ॥ ८
तदृष्ट्वा विफलं कर्म राक्षसः पुनरेव तु ।
पादपान्सुबहून्गृह्य शत्रुघ्ने व्यसृजद्बली ॥ ९
शत्रुघ्नश्चापि तेजस्वी वृक्षानापततो बहून् ।
त्रिभिश्चतुर्भिरेकैकं चिच्छेद नतपर्वभिः ॥ १०
ततो बाणमयं वर्षं व्यसृजद्राक्षसोरसि ।
शत्रुघ्नो वीर्यसम्पन्नो विव्यथे न च राक्षसः ॥ ११
ततः प्रहस्य लवणो वृक्षमुत्पाट्य लीलया ।
शिरस्यभ्यहनच्छूरं स्रस्ताङ्गः स मुमोह वै ॥ १२
तस्मिन्निपतिते वीरे हाहाकारो महानभूत् ।
ऋषीणां देवसंघानां गन्धर्वाप्सरसामपि ॥ १३

G. 7. 75. 13
B. 7. 69. 13
L. 7. 72. 13

—[c]) V2 B1–3 जनपदश् (sic); D2.9 जानपदं. Ś V3 D3.6. 8.10–12 M5 पुरे ज(D8.12 जा)नपदे (for पुरं जनपदं). D4.5. 8.11 वा (for च). Ñ2 V2 B [ए]च (for [अ]पि). D7 पुरो जनपदस्यापि. —[d]) Ñ1 D1–5.9 शिवश्; V1 M6 स्वस्थम्; V2 धर्मम्; B बलम्; G2 क्षेत्रस् (for क्षेमम्). D6.7.10.11 एव (for एतद्). Ś V3 D12 निवृत्तिश्च; Ñ2 मम चैतद्; D8 निर्भयश्च; L (ed.) निर्वृत्तिश्च (for क्षेममेतद्).

7 T1.2 M1.8 om. 7 (cf. v.l. 2). —[a]) V1 मे; D8 स (for मद्-). Ś Ñ V B D1–4.8.9.12 M5.6 -चाप-; D7 G1 -बाण-; T3 -पाणि-; M2.6.7.10 -तूण- (for -बाहु-). Ś D1.3–5.8 T3 M5 -निर्मुक्तः; V1 D2.9.12 -वि(D2.9 -नि)क्षिप्तः; B1 -विभ्रांतः (for -निष्क्रान्तः). —[b]) Ś D8.12 -विभद्युतिः; V1 T2 -निभः स्वनः; D1.4 -निभः श्वसन्; D2.3.5.9 -[अ]नल-द्युतिः; Cm.t as in text (for -निभाननः). Ñ1 शरो वज्रा-निलस्वनः. —[c]) D2.7 प्रवेक्षते; D3 प्रावेक्ष्यते; M3 प्रवेक्ष्यति. D8 ते हृदये; T4 महातीक्ष्णः; M8 त्वद्हृ° (for ते हृदयं). —[d]) T3 यथा (for इव). D1.4 बिवरं पन्नगो यथा; G1 रुधिरं तव पास्यति. —After 7, G1 ins. :

1042* एवमुक्तः स लवणः शत्रुघ्नेन महात्मना ।

—Thereafter, G1 reads 2^{ab}.

8 G2 reads 8^{ab} twice. V2 reads 8^{a} in marg. —[a]) T1.2 G2 (second time) M1.8 सं(G2 सु; M1 प्र)गृह्य सु-; G1 स संगृह्य (for एवमुक्तो). Ś Ñ1 V1 D1–5.8.9.12 ततः प्रगृह्य वृक्षं तु(D5 लवणो); G (ed.) स उत्पाट्य महच्छालं. —[b]) D5 वृक्षं तु (for लवणः). —Ñ2 damaged from ° up to धा in [d]. —[c]) V3 D10(marg.) -[उ]परि (for -[उ]रसि). Ñ2 V2 B M6 शत्रुघ्नं प्रति चिक्षेप. —[d]) Ñ2 B चासौ; D8 शूलं (sic) (for शूरः). D6.7.10.11 स च तं (for तं शूरः). Ś D8.12 बहुधा; V1.3 B3 D2–5.9 M6 दशधा (for शतधा). V2 (damaged except द) B3 दश(marg. also शत)धाक्षिपत्.

9 [a]) G2 विविधं; M2 विमलं; M5.8 विपुलं (for विफलं). —[b]) Ś D8 च; Ñ2 B4 हि; V3 D3.5 M3 सः; B2.9 ह (for तु). —[c]) M9 स (for सु-). V2 om. गृह्य. Ś Ñ1 V1 D1–4.8.9.12 G (ed.) वृक्षाननेकानु(G [ed.] °क्षान्महत उ)त्पाट्य; D5 वृक्षाननेकांस्तत्रत्यान्; M6 गृहीत्वा च बहून्वृक्षान्. —[d]) B3 D9 शत्रुघ्नं. Ś1.3 D8.12 [स]न्यसृजद्; Ś2 न्यसृजद् (for व्यसृजद्). Ñ2 V2 B1.2.4 D6.7.10.11 शत्रुघ्नाया(Ñ2 B1.2 °घ्नस्या)सृजद्(V2 °क्षिपद्). Ñ1 V1 D1–5.9 समवासृज (D9 °क्षिप)त्; T2 °द्युधिः; M1 विनिपातयत् (for व्यसृजद्बली).

10 [a]) V1 शतशश् (for शत्रुघ्नश्). G3 M6 [स]पि च (by transp.) (for चापि). —[b]) D3 आपतितान् (for आपततो). —[c]) B2 एभिश् (for त्रिभिश्). Ñ2 B1–3 चैकैकं. —[d]) Ñ2 B [आ]नत- (for नत-). —For 10^{cd}, Ś Ñ1 V1 D1–5.8.9.12 T3 G (ed.) subst.; Ñ2 ins. after 10^{ab} :

1043* चिच्छेद सायकैस्तीक्ष्णैरेकैकं सप्तधा त्रिधा ।

[G (ed.) दीप्तैर् (for तीक्ष्णैर्). Ś1 शतधा; Ñ2 स द्विधा (for सप्तधा). Ś D8.12 [अ]च्छिनत् (for त्रिधा). G (ed.) त्रिभिः सप्तधा (unmetric) (for सप्तधा त्रिधा).]

11 [b]) Ś1.3 Ñ V1 B3 D1–5.8.9.12 अ(B3 वि; D1.4 सो)सृजद् (for व्यसृजद्). Ñ1 V1 B4 D1–7.9–12 T3.4 M6 -[उ]परि (for -[उ]रसि). —Ñ1 damaged for ^{cd} (except राक्षसः). —[c]) M1 [स]पि महातेजा (for वीर्य-सम्पन्नो). —[d]) V1 सुसंक्रुद्धः; D2.9 उद्धतः स (for विव्यथे न). V1.3 D5.6.10.11 स (for च). B2.3 च न (by transp.). V2 (marg. also as in text) क्षोभो नाभूच्च रक्षसः.

12 [a]) G3 स तं (for ततः). —[b]) D2.9 वृक्षान्. D6 उत्साद्य; D7.10.11 T4 उद्यम्य (for उत्पाट्य). Ñ2 V3 B1 D5–7.10.11 T3.4 वीर्यवान् (for लीलया). —[c]) Ś B2.3 D1.4.8.12 [अ]भि(B2 D1.4 [अ]भ्या)हतः; T1–3 G2 M1.8.9 [अ]भिहनच् (for [अ]भ्यहनच्). Ś Ñ V1.3 B1–3 D1.3.8.12 G1.3 M1.5.6.8–10 शूरः; D2.9 क्रुद्धः (for शूरं). G (ed.) भृशं जघान शिरसि. —V2 reads [d] in marg. —[d]) V2 च; B3–4 सं-; D1.4 प्र- (for स). V2 B2–4 सः; T4 ह; M2.7 च (for वै). Ś Ñ1 V1.3 D1–5.8.9.12 T3 पपात ह (for मुमोह वै).

13 [a]) D2.9 शत्रुघ्ने (for तस्मिन्नि-). D3 पातिते. G2 अभिहते (for निपतिते). Ś Ñ V B2.3 D1–5.8.9.12 M6 भूमौ; B1.4 M5 शूरे (for वीरे). —After 13^{ab}, B2 ins. :

1044* चकम्पे वसुधा तत्र दृष्ट्वा कार्यं भयावहम् ।

—[c]) G (ed.) सिद्ध- (for देव-). D2.9 देवतानां च (for °संघानां). —V2 reads 13^{d}–14^{b} in marg. —[d]) Ñ1 V1.3

G. 7. 75. 14
B. 7. 69. 14
L. 7. 72. 14

तमवज्ञाय तु हतं शत्रुघ्नं भुवि पातितम् ।
रक्षो लब्धान्तरमपि न विवेश स्वमालयम् ॥ १४
नापि शूलं प्रजग्राह तं दृष्ट्वा भुवि पातितम् ।
ततो हत इति ज्ञात्वा तान्भक्षान्समुदावहत् ॥ १५
मुहूर्ताल्लब्धसंज्ञस्तु पुनस्तस्थौ धृतायुधः ।
शत्रुघ्नो राक्षसद्वारि ऋषिभिः संप्रपूजितः ॥ १६

ततो दिव्यममोघं तं जग्राह शरमुत्तमम् ।
ज्वलन्तं तेजसा घोरं पूरयन्तं दिशो दश ॥ १७
वज्राननं वज्रवेगं मेरुमन्दरगौरवम् ।
नतं पर्वसु सर्वेषु संयुगेष्वपराजितम् ॥ १८
असृक्चन्दनदिग्धाङ्गं चारुपत्रं पतत्रिणम् ।
दानवेन्द्राचलेन्द्राणामसुराणां च दारुणम् ॥ १९

D2.3.5-7.9-11 T3.4 M6 तथा; D1.4 M7 तदा (for अपि). Ñ2 V2 B गंधर्वाणां च सर्वशः (B1.4 सहस्रशः).

14 V3 reads 14^{ab} in marg. (cf. v.l. 13). Ñ1 damaged after ज्ञा in ^{a} up to ति in ^{b}. —^{a}) Ś V3 D8.12 स तमाज्ञाय; Ñ2 T1.2 M3 स तु (Ñ2 तं स) विज्ञाय; V2 B1 तम (B1 तं तु) विज्ञाय (for तमवज्ञाय). Ñ2 B1 M6 नि-; V3 च (for तु). B3 लक्ष्मण: (for तु हतं). V1 D2.3 तमवज्ञाहतं दृष्ट्वा; B2 ततः स विज्ञाय हतं; B4 तं विज्ञाय हतं शत्रुं; D1.4.5.9 न च (D5.9 तं तु) वृक्ष (D9 °क्षा) हतं दृष्ट्वा. —^{b}) Ś B2 D1-5.8.9 12 T2 M7 वि (Ś D8.12 तु) निपातितं; V3 शत्रुतापनं; B4 तु विपा°; G (ed.) पतितं भुवि (for भुवि पातितम्). —After 14^{ab}, D3 ins.:

1045* हाहाकारो महानासीद्दुःखितानां मुहुर्मुहुः।

—^{c}) T3 ततः; G2 रणे (for रक्षो). D2.9 T1.3 M8 लब्ध्वा (T3 कक्ष्यां) तरम्; Cm.g.k.t as in text (for लब्धान्तरम्). Ñ1 T3 अथ; D2.9 पापः (for अपि). —^{d}) Ñ1 V3 D8.12 (all with hiatus) आविवेश; D2.9 T3 प्रविवेश (for न विवेश). Ś V3 D8.12 स्वकं गृहं; V1 स्वमाश्रमं (for स्वमालयम्).

15 ^{a}) Ñ2 B1.3 स; B2 च (for प्र-). Ñ1 V1 D1-5.9 नाप्यगृह्णान्महच्छू (D1.4.9 °हाशू) लं; V2 नापि जग्राह तच्छूलं; B4 न चापि शूलं जग्राह. —^{b}) Ñ1 D1-5.9 दृष्ट्वा तं (by transp.); V1 दृष्ट्वा तु (for तं दृष्ट्वा). Ñ1 तु नि-; V1 D2.5.9 M2.10 विनि- (for भुवि). Ñ2 G (ed.) दैवोपहतमान (G [ed.] °चेत) सः; V2 B1.3.4 मृतोयमिति दानवः; B2 दूतोयमिति मानवः. —After 15^{ab}, D1 erroneously repeats 14^c-15^b. —^{c}) Ñ1 हतं (for ततो). Ś Ñ1 V1 B2 D1-5.8.9.12 T3 M6 हतम् (for हत). —V2 reads ^{d} in marg. —^{d}) D6 G1.2 M5 भक्ष्यान्स (for तान्भक्षान्). T2 G2.3 M3.8 समुदा (T2 °पा) हरत् (for समुदावहत्). Ś Ñ1 V1.3 D1-5.8.9.12 तं भक्षं (D1.4 तद्भक्ष्यं; D2.3.12 तं भक्ष्यं) समुपाहरन् (Ñ1 V1.3 D1-5 °त्); Ñ2 V2 B (except Ñ2 B2 all with hiatus) अ (Ñ2 ह्य; B2 सो) गृह्याद्वारमासिषं; T3 तं भक्षं * * मुद्यतः (damaged).

16 ^{a}) Ś D8.12 मुहूर्तं. D1 लब्ध- (for लब्ध-). D1-5.9 -संज्ञं (for -संज्ञस्). V1.2 च (for तु). —^{b}) Ś D8.12 ततस्; G1 पुरस् (for पुनस्). Ñ1 V1 D1-5.8 एव (for तस्थौ). D3 धृत- (for धृत-). Ñ1 V1 D1-5.9 -[आ]युधं. Ñ2 V2 B शत्रुघ्नः पुनरुत्थितः. —M6 om. 16^{cd}. —^{c}) Ñ1 V1 D1-5.9 शत्रुघ्नं; Ñ2 V2 B अतिष्ठद् (for शत्रुघ्नो). D6.7.10.11 T4 M3 वै पुर-; T3 वै रिपु- (for राक्षस-). D5 -द्वारे. —Ñ1 damaged for ^{d}. —^{d}) T1 M3 मुनिभिः (for ऋषिभिः). T2 संप्रपूज्य च. Ś Ñ2 V2.3 B D8.12 M7 पूजितः परमर्षिभिः; V1 D1-5.9 मुन (D5 ऋष) यः समपूजयन्.

17 B2 transp. 17 and 18. —^{a}) Ś Ñ2 V3 B D8.12 स; D7 T1.2 G2.3 M1.3 तु (for तं). Ñ1 V1 D1-5.9 प्रजग्राह (for अमोघं तं). —^{b}) Ñ1 स घोरं; V1 D1-5.9 सो (D2 [with hiatus] अ) मोघं (for जग्राह). —V2 om. 17^{cd}. —^{c}) Ñ V1 D1-5.9 T3 ज्वलज्ज्वलनसंकाशं. —^{d}) Ś Ñ V3 D1-5.8.9.12 T3 दीपयंतं; T1 दीप्त°; M1 पूज°; M6 द्योत°; G (ed.) भास°; Ct as in text (for पूरयन्तं).

18 Ñ1 V1 D1.2.4.5.9 om. 18-19. B2 transp. 17 and 18. —^{a}) Ś D8 -वेगं; Ñ2 -स्वनं; V2 B -[आ]ननं; D12 -सितं (for -[आ]ननं). Ś D8 -शितं; Ñ2 V2 B -मुखं (for -वेगं). —G (ed.) om. 18^{bc}. —^{b}) D6.7.10.11 -संनिभं (for -गौरवम्). —D11 om. 18^{cd}. —^{c}) D3.6 M7 नत- (for नतं). D6 M7 -पर्व च (M7 स) (for पर्वसु). Ñ2 V2 B निर्मितं हरि (B1 ब्रह्म) णा पूर्वं; M8 नतपर्वसु पर्वसु. —^{d}) Ś2.3 संयोगेषु; B4 संगरेषु (for संयुगेषु). D3 [अ]निवर्तिनं (for [अ]पराजितम्).

19 Ñ1 V1 D1.2.4.5.9 om. 19 (cf. v.l. 18). G (ed.) om. 19^{ab}. —^{a}) B2 -शोणित- (for -चन्दन-). D6.7 G1 Cm.t -लिप्तांगं; Cg.k as in text (for -दिग्धाङ्गं). —^{b}) D8 T4 M2.4.8.9 -पत्र-; M1 -वक्त्रं; M6 -पर्व- (for -पत्रं). T4 -परिष्कृतं. D6.7 T3 चारुचंद्रा (D7 °चंद्रं; T3 °वक्त्र) परिष्कृतं. —^{cd}) V3 रावण-; M9 मानव-; Cm.g.k.t as in text (for दानव-). B1-3 M7 -न (M7 -सु) रेंद्राणाम्; T4 -[अ]सुरेंद्राणाम्; Ct as in text (for -[अ]चलेन्द्राणाम्). B3 पुरुषाणां; M7 om. (for असुराणां). D7.10.11 T3.4 G1.2 M2.3.5.8 Cg च दारुणं; B2 चारुदर्शनं (hypm.) (for च दारुणम्). Ñ2 V2.3 B1.4 M6 पु (B1 शू) राणां चावदारुणं (V2 °हारकं); D3 सर्ववेगविदारणं (for ^{d}). Ś D8.12 वानरें (D12 °रणें) द्रमहेंद्राणां सर्ववेगाप (D8.12 °व) हारकं. —After 19, Ñ2 V2 B2.3 G (ed.) ins.:

तं दात्तमिव कालाग्निं युगान्ते समुपस्थिते ।
दृष्ट्वा सर्वाणि भूतानि परित्रासमुपागमन् ॥ २०
सदेवासुरगन्धर्वं समुनिं साप्सरोगणम् ।
जगद्धि सर्वमस्वस्थं पितामहमुपस्थितम् ॥ २१
ऊचुश्च देवदेवेशं वरदं प्रपितामहम् ।
कच्चिल्लोकक्षयो देव प्राप्तो वा युगसंक्षयः ॥ २२
नेदृशं दृष्टपूर्वं न श्रुतं वा प्रपितामह ।
देवानां भयसंमोहो लोकानां संक्षयः प्रभो ॥ २३
तेषां तद्वचनं श्रुत्वा ब्रह्मा लोकपितामहः ।
भयकारणमाचष्टे देवानामभयंकरः ॥ २४
वधाय लवणस्याजौ शरः शत्रुन्नधारितः ।
तेजसा यस्य सर्वे स्म संमूढाः सुरसत्तमाः ॥ २५

G. 7. 75. 25
B. 7. 69. 25
L. 7. 72. 25

1046* धनुष्याधीयमाने तु तेन तस्मिन्शरोत्तमे ।
प्राज्वलच्च नभस्युल्का निर्घाताश्च प्रपेदिरे ।

[(l. 1) B2.3 मनुष्य- (for धनुषि). B2 [आ]रोप्यमाणे; B3 [आ]नीयमाने (for [आ]धीयमाने). G (ed.) च (for तु). G (ed.) [अ]स्मिंस्तु (for तस्मिन्). —(l. 2) B3 आकुलंतो (sic); G (ed.) प्राज्वलंत (for प्राज्वलच्च). Ñ2 V2 B2 [उ]ल्को (for [उ]ल्का). B3 नभस्त्यक्त्वा.]

20 [b]) D6 om. (hapl.) after सु in [b] up to सु in [d]. Ñ2 V2 B2.3 D7.10.11 T4 समुपस्थितं; G2 समये स्थितं (for समुपस्थिते). Ñ1 V1 B4 D1–5.9 T3 युगक्षयमिवापरं (B4 °मुपस्थितं; D5 °मिवागतं); B1 समुद्भूतं युगांतके. —[c]) M6.7 वै सर्व- (for सर्वाणि). V2 (marg.) B1.3.4 तं दृष्ट्वा सर्वभूतानि. —[d]) Ś Ñ V1.2 B2–4 D1–5.8.9.12 परं (for परि-). Ś V1 D1.3–5.8.12 मोहम्; Ñ1 D2.9 हर्षम् (for -त्रासम्).

21 [a]) Ñ1 V1 D1–5.9 सहदेवर्षि-; Ñ2 V2 B ततः सदेव-; M7 सदेवं सह- (for सदेवासुर-). B1.3.4 D4 M3 -गंधर्व- (for -गन्धर्वं). —[b]) D3 ससिद्धं; D6.7.10.11 T2.4 Ct मुनिभिः; M3 तापसं (for समुनिं). Ñ1 V1 D1.2.4.9 ससिद्धाप्सरसोरगं (Ñ1 °सां गणं; V1 D2 °सो गणं); Ñ2 V2 B1.3.4 सयक्षऋषिचारणं; B3 सहयक्षर्षिचारणं; D5 ससिद्धं सासुरोरगं; G (ed.) सहसिद्धाप्सरोगणं. ❀ Ck: समुनिमिति। लुगभाव आर्षः।; Ct: मुनिभिः सहितमिति शेषः. ❀ —[c]) Ś Ñ1 V3 D8.12 सर्वं तथा (Ñ1 यथा; V3 तदा); V1 D1–5.9 सर्वमथ; M6.7 सर्वं च न (for हि सर्वम्). Ñ2 संमूढं; G1 अस्वास्थ्यं (for अस्वस्थं). —[d]) Ś V2.3 B1–3 D8.12 M6.7 उपागमत्; Ñ1 V1 B4 D1–5.9 उपाद्रवत्; Ñ3 उपाव्रजत् (for उपस्थितम्).

22 [a]) Ñ2 B अथ तं; D1–5.9 T3 M6 उवाच (for ऊचुश्च). T1 G1 सर्वे; T2 G2 M1.3 सर्व-; K (ed.) देवा (for देव-). —[b]) M1 ते (for प्र-). B ऊचुर्देवाः पितामहं. —D5.10.11 om. (hapl.?) 22°–23[b]. —[c]) Ś Ñ1 V2 B1.2 D2.8.12 कश्चिल्; D2.7 कच्चिल् (for कच्चिल्). B2 लोके (for लोक-). Ś V3 D8.12 प्राप्तः; Ñ1 V1 D3.6.7 T4 नायं; V2 (marg. also as in text) नाथ; D1.4 नाथ; D2.5 नाम; T3 [ऽ]द्यायं (for देव). —[d]) Ñ V1.2 (marg. also as in text) D1–4.9 T1–3 G3 M1.3.4 संप्राप्तः; Cv as in text (for प्राप्तो वा). Ś V3 B3 D8.12 M7 सुरसंक्षयः; Ñ V1 D1–4.9 T3 सुरसत्तम; V2 (marg. also as in B1) [ऽ]यं भयावहः; B1.2 [अ]थ सुरक्षयः; T1.2 G3 M1.3.4 वा युगक्षयः (for युगसंक्षयः). B4 प्राप्तोथ वा सुरक्षयः.

23 D5.10.11 om. 23[ab] (cf. v.l. 22). D3.4 transp. [ab] and [cd]. —[a]) B2.3 पूर्वदृष्टं (for दृष्टपूर्वं). Ś Ñ V3 B2.4 D2.3.9.12 M2.4.6.8.9 नः; V1 (also) T1.2 G3 M1.3 च; B1 D6.7 T3.4 तु; B3 (also as in text) D1.4 हि; G2 तं; M5.10 तच् (for न). D3 नेदृशो दृष्टपूर्वो नः. —[b]) D3 श्रुतो (for श्रुतं). D1.4 T1.2 G3 M3 न श्रुतं; Ck श्रुतं च; Ct as in text (for श्रुतं वा). Ś V1.2 B1.3.4 D2.3.9.12 वापि; Ñ B2 चापि; D1.4 च प्र-; M1 नैतत् (for वा प्र-). T3 न श्रुतं वा पितामह. —Ñ2 V2 B om. 23[cd]. —[c]) Ñ1 D1.2.4.5.9 क्षयकृद्भाणे (Ñ1 °ल्काले); V1 उपरुद्धानां; D3 क्षयकालोसौ (for भयसंमोहो). T3 दैत्यानां जयकृच्छूलो. —[d]) Ñ1 V1 M1 देवानां; Ct as in text (for लोकानां). Ś V3 D8.12 संशयः प्रभोः; Ñ1 V1 D1–5.9 T3 संक्षयोपमः; D6.7.10.11 T4 M1–4.9 Ct संक्षयं प्रति; M3 संक्षयं विभो (for संक्षयः प्रभो). ❀ Cv: लोकानां (संक्षयं?) प्रतीति पाठः. ❀ —After 23, D1 ins. 1048*.

24 D1 om. 24[ab]. V2 transp. [ab] and [cd]. —[a]) Ñ1 damaged; V1 रुद्राणां; D2–5.9 T3 सुराणां (for तेषां तद्). M7 इति तेषां वचः श्रुत्वा. —[b]) V2 ब्रह्म- (for ब्रह्मा). Ñ1 V1 D2–5.9 T3 व (D4 ना)रदः सर्वभूतकृत्; M6.7 देवः सलिलसंभवः. —For 24[ab], Ś Ñ2 V3 B D8.12 subst.; V2 (marg.) ins. after 24[ab] (transp.):

1047* देवानां भाषितं श्रुत्वा देवः कमलसंभवः ।

[Ñ2 V2 B वचनं (for भाषितं). —Ñ2 illeg. for the post. half. V3 D12 सलिल- (for कमल-).]

—V2 reads 24[cd] in marg. —[c]) Ś V2.3 B (B1 [before corr.]) D8.10–12 T1 G2 M2.4 आचष्ट. —For 24[cd], Ñ V1 D2–5.9 T3 subst.; V2 cont. after 1047*; D1 ins. after 23; D6.7.10.11 T4 G1.3 M2.4.5.7.10 ins. after 24:

1048* उवाच मधुरां वाणीं शृणुध्वं सर्वदेवताः ।

[V2 T3 मधुरं वाक्यं (for मधुरां वाणीं). V2 शृणुत त्रिदिवौकसः; D5 शृणुध्वं वचनं मम (for the post. half).]

25 D2 om. 25. —[a]) T1 राक्षसस्य (for लवणस्य). Ś V3 D8.12 M6.7 [अ]सौ; Ñ1 V1 D1.3–5.9 T3 [अ]द्य;

Arya Research Team

G. 7. 75. 25
B. 7. 69. 25
L. 7. 72. 26

एषो हि पूर्वं देवस्य लोककर्तुः सनातनः ।
शरस्तेजोमयो वत्सा येन वै भयमागतम् ॥ २६
एष वै कैटभस्यार्थे मधुनश्च महाशरः ।
सृष्टो महात्मना तेन वधार्थं दैत्ययोस्तयोः ॥ २७
एवमेतं प्रजानीध्वं विष्णोस्तेजोमयं शरम् ।
एषा चैव तनुः पूर्वा विष्णोस्तस्य महात्मनः ॥ २८
इतो गच्छत पश्यध्वं वध्यमानं महात्मना ।
रामानुजेन वीरेण लवणं राक्षसोत्तमम् ॥ २९
तस्य ते देवदेवस्य निशम्य मधुरां गिरम् ।
आजग्मुर्यत्र युध्येते शत्रुघ्नलवणावुभौ ॥ ३०

Ñ₂ om.; V₂ B [अ]थ (for [आ]जौ). —[b]) Ñ₁ शरं; D₈ पारः (for शरः). Ñ₁ -धारितं; D₉ -प्रेरितः; T₄ M₆ -पातितः; Ck.t as in text (for -धारितः). —Ñ₂ illeg. for 25°–26[b]. —[cd]) V₁.₂ B₁.₂.₄ D₆.₇.₁₀.₁₁ T₃.₄ M₇ तस्य; D₃ चास्य (for यस्य). Ñ₁ सर्वे. Ñ₁ V₁ D₉ च; D₁.₄ वै; D₃ M₆ हि; D₅ [ऽ]पि; T₁ G₂ M₃.₅ स्थ; T₂ G₃ M₁ स्युः (for स्म). Ś V₂.₃ B₃–₄ D₃.₁₂ संमूढाः सर्वे ते (V₂ वै; B₃ हि; B₄ च); B₁ D₆.₇.₁₀.₁₁ T₃.₄ संमूढाः सर्वे स्म (by transp.). D₄ ** सत्तमाः (for सुरसत्तमाः).

26 Ñ₂ illeg. for 26[ab] (cf. v.l. 25). D₄ reads 26 twice. —[a]) V₂ reads up to पूर्वं (see var.) in marg. D₃ अयं (for एषो). V₂.₃ B₃–₄ D₁₂ M₆.₇ वै; T₃ [ऽ]पि (for हि). Ś Ñ₁ V B₂–₄ D₁.₂.₄ (both times).₅.₇.₈.₁₂ T₃ G₁ M₂.₆.₇.₉.₁₀ पूर्व- (for पूर्वं). D₁₀.₁₁ Ct पूर्वस्य (for हि पूर्वं). Ś D₃.₈.₁₂ M₁.₉ -देहस्य; Ck.t as in text (for देवस्य). B₁ एष एव शरश्चास्य; D₂ एषो हि देव पूर्वस्य; G (ed.) विष्णोरेवं हि देवस्य. ❀ Ck: एषो पूर्वस्येति छान्दसः संधिः ।; so also Ct. ❀ —[b]) Ś D₈ -कर्ता (for -कर्तुः). V₂ B महात्मनः; V₃ स्वयंभुवः (for सनातनः). —B₄ om. 26°–27[b]. —[c]) D₈ पारस् (for शरस्). Ś D₈.₁₂ येनः; Ñ V₁ D₁.₂.₄ (both times).₉ T₃ यस्माद्; V₂ B₂ भीमो; V₃ प्राप्ताः; D₃.₅ T₃ G₁ M₂.₄–₇.₁₀ दिव्यो; K (ed.) वत्स (for वत्सा). —[d]) K (ed.) तेन (for येन). D₆ T₁.₂ G M₁–₅.₈–₁₀ वो (for वै). Ś D₃.₁₂ L (ed.) भयं चो (D₁₂ वो) पद्द (L [ed.] °द्द) तं भवेत्; Ñ₁ भयकृतमहद्भयं; Ñ₂ भयं वः समुपागमत्; V₁ भयं वस्तानितं महत्; V₂ B₃ M₆.₇ भयं वो (B₃ वा) यत्कृतं (V₂ °तं) भवे (M₇ °व) त्; V₃ भयं चोपकृतोभवत्; B₁ भयं वो प्रकृतं भवेत्; B₂ भयं वोपगतं यतः; D₁–₄ (both times).₅ T₃ भयं वो (T₃ वै) यत्कृतं (D₃ °ते) महत्; D₉ भयं वोपकृतं महत्.

27 B₃.₄ om. 27[ab] (for B₄, cf. v.l. 26). —[a]) D₂ एको; D₅ पुरा (for एष). Ñ₁ V₁ D₁–₅.₉ T₃ हि (for वै). Ś Ñ₂ V₃ B₁.₂ D₃.₁₂ स एषः; V₂ स एव (for एष वै). M₆.₇ य एष कैटभस्यार्थं. —[b]) Ś V₃ (marg.).₃ D₅.₈.₁₂ T₃ मधोश्चैव (D₅ °श्चापि); M₆ मध्वर्थं तु (for मधुनश्च). D₂ महात्मनः; T₁ G₂ महात्मनः; M₃ दुरात्मनः (for महाशरः). —[c]) M₃ (before corr.) सृष्टो (for सृष्टो). M₅ वधार्थिना (for महात्मना). K (ed.) येन; Cg.k.t as in text (for तेन). D₅ सृष्टो महार्थं श्रुतस्तेन (unmetric). —[d]) D₂ यथार्थः; D₃.₇.₁₀.₁₁ T₃ वधार्थे (for °र्थं). D₁.₄ द्वयोः; M₃.₉ तदा (for तयोः). Ś Ñ₂ V B D₃.₈.₅.₈.₉.₁₂ T₃ रक्षसोर्द्वयोः; Ñ₁ राक्षस-द्वयोः (sic); M₃.₇ दितिपुत्रयोः (for दैत्ययोस्तयोः).

28 B₄ om. 28[ab]. —[a]) D₆.₇ T₄ M₅.₇.₁₀ एवमेतत्; T₃ G₃ एतमेकं; G₃ M₆.₈ एतमेवं (by transp.) (for एवमेतं). G₂ प्रजानाति; M₆.₇ विजानीध्वं. Ś D₃.₁₂ L (ed.) एवं (L [ed.] °व) प्रजानीत; V₁ T₃ एष (T₃ °तत्) प्रजानीते; D₂–₄.₉ एनं (D₉ °ष) प्र (D₂.₃ वि) जानीत; D₅ एतद्विजानीत (for एतं प्रजानीध्वं). Ñ₁ एतमेकं विजानीत; Ñ₂ B₂ D₁₀.₁₁ M₃ Cg.k.t एक (Ñ₂ °ष) एव प्रजानाति (B₂ °नीत); V₂ B₁.₃ एष एकः प्रजानां हि; V₃ T₃ एक (T₃ °व) मेकः प्रजानाति; D₁ एकमेनं प्रजानीत. —[b]) Ñ V B₃ D₁₀.₁₁ T₁–₃ M₃ Ck.t विष्णुः. Ñ₂ V₃ B₁–₃ तेजोमयः शरः (for °मयं शरम्). —[c]) V₂.₃ B₁.₄ D₆.₉ M₁.₃.₉ एवः; Cv.m.g.k.t as in text (for एषा). B₃ D₁₀.₁₁ G₃ M₁.₉ Cg.k.t एवः; D₆ देव-; D₇ दैव-; D₁₂ वै च; Cv as in text (for चैव). T₁.₂ G₃ एषैव हि (for एषा चैव). Ñ₂ B₁.₃ विष्णोः (for पूर्वा). G (ed.) एष वै स शरः पूर्वं. ❀ Cg: एषा एवेत्यसंधिरार्षः ।; so also Ck.t. ❀ —[d]) Ś D₃.₁₂ विष्णोश्चैव; Ñ₂ B₁ शत्रुघ्नस्य (for विष्णोस्तस्य). Ś Ñ V₃ B₂.₃ D₁–₅.₈.₉.₁₂ M₆ रघूत्तमः; Cm.g.k.t as in text (for महात्मनः).

29 D₇ transp. [ab] and [cd]. —[a]) T₁.₃.₄ M₉.₁₀ गच्छथ. Ś V₁ D₃.₁₂ प्रयात यूयं; Ñ₁ तथानष्टयं (sic); Ñ₂ V₂.₃ B तस्माद्गच्छत (B₂ °थ); D₁.₃–₅ तद्यात यूयं; D₂.₉ तदद्य यूयं; M₆ ता गच्छतेह (sic) (for इतो गच्छत). —D₃ om. from पश्यध्वं up to यत्र in 30°. V₂ marg.; V₃ पश्यामो (for पश्यध्वं). —B₄ om. 29[cd]. —[c]) Ś Ñ V B₁–₃ D₁.₂.₄.₅.₈.₉.₁₂ G₁ M₂.₄–₇.₁₀ लवणं (for वीरेण). —[d]) Ś Ñ₂ V₂ (marg. after निरु).₃ B₁–₃ D₃.₁₂ G₁ M₂.₅–₇.₁₀ निरुद्वेगं (Ś D₃ वध्यमानं; Ñ₂ निरु* * [illeg.]; V₂.₃ °द्वेग-; B₂.₃ °द्वेगा; G₁ M₂.₅–₇.₁₀ °द्विग्ना) निशाचरं; Ñ₁ V₁ D₁.₂.₄.₅.₉ M₈ निरुद्विग्ना (Ñ₁ भयम्) महासुरं (Ñ₁ °राः).

30 D₃ om. up to यत्र in [c] (cf. v.l 29). —[a]) Ś V₃ B₂ D₃.₁₂ ते तत्र (by transp.). —[b]) Ś D₃.₁₂ मधुराक्षरं; Ñ₁ V₁ D₄ °रां गिरां; Ñ₂ V₂ (marg.).₃ B D₆.₇.₁₀.₁₁ T G₂.₃ M₁.₃.₈.₉ वचनं सुराः (for मधुरां गिरम्). —[c]) Ñ₁ D₂.₅.₉ आगच्छन् (for आजग्मुर्). —D₁ om. from यत्र up to ददृशुः in 31°. V₃ D₅ M₄ तत्र (for यत्र). Ś Ñ V₂ (from तद् up to [d] in marg.).₃ B D₃.₅.₈.₁₂ G₁ तद्युद्धं (D₃ °द्धे); M₂.₄–₇.₁₀ तद्युद्धं (for युध्येते). —[d]) D₆

तं शरं दिव्यसंकाशं शत्रुघ्नकरधारितम् ।
ददृशुः सर्वभूतानि युगान्ताग्निमिवोत्थितम् ॥ ३१
आकाशमावृतं दृष्ट्वा देवैर्हि रघुनन्दनः ।
सिंहनादं मुहुः कृत्वा ददर्श लवणं पुनः ॥ ३२
आहूतश्च ततस्तेन शत्रुघ्नेन महात्मना ।
लवणः क्रोधसंयुक्तो युद्धाय समुपस्थितः ॥ ३३
आकर्णात्स विकृष्याथ तद्धनुर्धन्विनां वरः ।
स मुमोच महाबाणं लवणस्य महोरसि ।
उरस्तस्य विदार्याशु प्रविवेश रसातलम् ॥ ३४

G. 7. 75. 34
B. 7. 69. 34
L. 7. 72. 37

-लवणासुरौ. Ś Ñ V2.3 B D3.5.8.12 G1 M2.4–7.10 शत्रुघ्नस्य च(M4 तु) रक्षसः (Ñ2 V2.3 B च रक्षसा; M5 महात्मनः).

31 D1 om. up to ददृशुः in ° (cf. v.l. 30). D2.9 om. 31^{ab}. —^{a}) Ś Ñ V1 B1.3.4 D3–5.8.12 M6 घोर-; V2 (marg.) सूर्य-; V3 om. (for दिव्य-). Ñ1 D3.5 -संनादं (for -संकाशं). —V3 om. (hapl?) 31^{cd}. —^{d}) D2.8 -[अ]ग्निर् (for -[अ]ग्निम्). Ñ1 D6 [आ]स्थितं; B2 [उ]च्छ्रितं; T1 [उ]द्धतं (for [उ]त्थितम्). —After 31, V2.3 (after 31^{ab} due to om.) ins.; B2 ins. after 33 :

1049* अथोवाच स शत्रुघ्नो लवणं राक्षसाधमम् ।
प्रवेष्टव्यं न दुर्बुद्धे मृत्युस्तेऽहमुपागतः ।
ततः श्रुत्वा तु लवणो वाक्यं शत्रुघ्नचोदितम् ।
अस्त्रं च वैष्णवं दृष्ट्वा भैरवं स समुद्यतम् ।
क्षुब्धचेता उवाचेदं शत्रुघ्नमपराजितम् । [5]
मुहूर्तं तिष्ठ दुर्बुद्धे रघूणां कुलपांसुल ।
यावत्कृत्वाह्निकं क्षिप्रमाहारं च पुनर्गृहात् ।
निष्क्रमामि सशूलोऽद्य ततस्त्वं न भविष्यसि ।
शत्रुघ्नश्चाब्रवीद्वीरो मोक्ष्यसे न मयि स्थिते ।
प्रेतलोकगतश्च त्वमाह्निकं वै करिष्यसि । [10]
ततः क्रुद्धोऽब्रवीद्वाक्यं लवणो दुष्टमानसः ।
यस्मान्न क्षमसे पाप बुभुक्षुं मां क्षणान्तरम् ।
तस्मात्ते नगरी कृत्स्ना क्षुधार्ता विद्रविष्यति ।
मुक्त्वा स पापं लवणः शत्रुघ्नमभिदुद्रुवे ।

[(l. 1) V2 न बलं (for लवणं). B2 -[अ]धिपं (for -[अ]धमम्). —(l. 3) B2 क्रुद्धोति- (for श्रुत्वा तु). V3 -देशितं (for -चोदितम्). B2 श्रुत्वा शत्रुघ्नभाषितं (for the post. half). —(l. 4) V3 समपद्य तं (for स समुद्यतम्). —(l. 5) V2 (marg. also क्रुद्धचेता)क्षुब्धं च तम् (for क्षुब्धचेता). —(l. 7) V2 reads गृहात् in marg. —(l. 10) B2 प्रेतलोकं. —(l. 12) V2 reads क्षणान्तरम् in marg. —(l. 13) V2 तस्माद्धो; B2 भयार्त- (for तस्मात्ते). B2 विचरिष्यति (for विद्रवि°). —(l. 14) V2 शापं (for पापं). V3 अपि (for अभि-).]

32 T1.2 M1.8 om. 32–34^{b}. —^{a}) V2 B1.2.4 आकर्णम् (for आकाशम्). V2 B1.2.4 कृत्वा (for दृष्ट्वा). V3 ब्रह्माणं चागतं दृष्ट्वा. —^{b}) Ś Ñ V1 B2 D1–5.8.9.12 देवतैर्; V2 B1.4 धनुः सः V3 राघवो; M7 देवैः स (for देवैर्हि). —^{c}) Ñ1 D2.3.5.9 ततः; V2 B1.3.4 महत्; D6.7.10.11 T3.4 M3 भूतं; M9 पुनः (for मुहुः). B2 मुहुः कुर्वन्; M4 पुरस्कृत्वा. —^{d}) Ñ1 पश्यतः V1 D1.2.4.5.9 प(D1 द)श्यते; D3 T3 [अ]पश्यन्त (for ददर्श). Ś Ñ1 V1 D1–5.8.9.12 T3 M7 मुहुः (for पुनः). Ñ2 V2 B1.3.4 पुनर्लवणमाह्वयत्; B2 दृश्यते लवणस्य सः; G2 हर्षेण च परिप्लुतः.

33 T1.2 M1.8 om. 33 (cf. v.l. 32). B2 om. 33^{ab}. —^{a}) Ñ1 B3 आहूय. Ś1 marg.; Ñ1 B4 D3.5 तु (for च). Ñ2 B1 D6.7.10.11 T3.4 M3 च पुनस्; B3 लवणस् (for च ततस्). —^{b}) Ñ1 V1 D1–5.9 महाहवे (for महात्मना). —After 33^{ab}, D11 ins., ॐ नमो भगवते वासुदेवाय नमः. —^{c}) Ś D8.12 क्रोधसंतप्तो; Ñ1 V1 D1–5.9 रघुमुख्येन; Ñ2 °रक्ताक्षो; V2 B2–4 °संरक्तो (for क्रोधसंयुक्तो). G1 रक्षः कोपसमायुक्तो. —^{d}) M2 समवस्थितः (for समुपस्थितः). Ñ2 V2 B वृक्षमा(B2 °क्षाना)दाय विष्ठितः. —After 33, B2 ins. 1049*.

34 T1.2 M1.8 om. 34^{ab} (cf. v.l. 32). —^{a}) B2 D2.9 आकर्ण्. Ś V3 D8.12 हि; Ñ1 D1.3–5 च; D2.9 तु (for स). —^{b}) V2(reads from धन्विनां up to ^{d} in marg.) धन्विनां वरः; B1.2.4 धनुषां वरं (for धन्विनां वरः). —^{c}) M3 तं (for स). Ś Ñ V B D1–5.8.9.12 T3 मुमोच तं (for स मुमोच). —^{d}) Ś Ñ V B D1–5.8.9.12 T3 शत्रुघ्नो लवणं प्रति(Ñ2 B °णोरसि; V2 ल****[illeg.]). —After 34^{cd}, Ś Ñ1 V1.3 D1–5.8.9.12 T3 ins.:

1050* मुच्यमानस्य लक्ष्याथ इषो रूपं तदाभवत् ।
पूर्णाहुत्या सिच्यमाने रूपमग्नाविवातुलम् ।
दहमानः स तान्वृक्षाञ्शरो वज्रोऽद्भुतोपमः ।
पपात सुमहातेजा लवणस्य तदोरसि ।

[(l. 1) Note hiatus between the two halves. D2.9 T3 सृज्यमानस्य (for मुच्य°). Ñ1 मु*****स्याथ (damaged); V1 विसृज्यमानस्यास्याथ; D3 मुच्यमानशरस्यास्य (for the prior half). T3 विष्णो (for इषो). T3 तथा (for तदा). —(l. 2) D1.2–5 T3 सिच्यमानं. Ś D8 आहुत्या सिच्यमानस्य (for the prior half). D1.3–5 अग्नेर् (for अग्नौ). Ś D8.12 वह्नेरिव तदा (for रूपमग्नाविव). Ñ1 V1 D1.4 [आ]कुलं; V3 ज्वलन्; D9 [अ]नलं (for [अ]तुलम्). —(l. 3) Ś D8.12 द(D8 गृ)ह्यमानः; D1.4 दाहमानः (for दह°). V3 T3 च (for स). T3 शत्रोर् (for शरो). Ś D12 वक्र-; D2.9 T3 वज्र-; D8 चक्र- (for वज्रो). D1.4 बह्वर्कसंप्रभः; D2.5 वज्राहतो(D5 °नलो)पमः (for वज्रोऽद्भुतोपमः). —(l. 4) Ś स (for सु-). D2.5.9 ततो (for तदा).]

G. 7. 75. 35
B. 7. 69. 35
L. 7. 72. 37

गत्वा रसातलं दिव्यः शरो विबुधपूजितः ।
पुनरेवागमत्तूर्णमिक्ष्वाकुकुलनन्दनम् ॥ ३५
शत्रुघ्नशरनिर्भिन्नो लवणः स निशाचरः ।
पपात सहसा भूमौ वज्राहत इवाचलः ॥ ३६
तच्च दिव्यं महच्छूलं हते लवणराक्षसे ।
पश्यतां सर्वभूतानां रुद्रस्य वशमन्वगात् ॥ ३७
एकेषुपातेन भयं निहत्य
लोकत्रयस्यास्य रघुप्रवीरः ।
विनिर्भयावुद्यतचापबाण-
स्तमः प्रणुद्येव सहस्ररश्मिः ॥ ३८

इति श्रीरामायणे उत्तरकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

—[e]) G (ed.) स निर्भिद्य (for विदार्याशु). Ñ2 V2 B1.3.4 स चोरस्तस्य निर्भिद्यः B2 शरो रक्षश्च निर्भिद्य. —[f]) Ś D3.12 महीतलं (for रसातलम्). —For 34[e/f], Ñ1 V1 D1–5.9 T3 subst.:

1051* निर्भिद्योरस्तदा तस्य सशरोऽमरपूजितः ।
रसातलं विवेशाशु सर्पराज इव श्वसन् ।

[(l. 1) D5 [उ]रस्ततस्; T3 °स्थलं (for °स्तदा). Ñ1 D2.9 विनिर्भिद्योरसस्; D3 बभौ घोरस्ततस् (for निर्भिद्योरस्तदा). Ñ1 रण-; V1 शर-; D2.9 नर- (for sмर-). —D9 om. l. 2. —(l. 2) Ñ1 om. the prior half. D5 प्रविश्य (for विवेश). D2.5 T3 [अ]थ (for [आ]शु). D2.4 इवाश्वसन्.]

35 [a]) Ñ1 V1.3 D1–5.9 M6 क्षात्वा रसातले; D3.12 गत्वा रसातले. Ñ2 V2.3 B चैवः T2 G2 M3 दिव्यं (for दिव्यः). T3 रसातलादथागत्य. —[b]) Ñ1 D1–5 स शरो रिपुमर्दनः; V1 स शरो विविदारणः; T3 स शरोमरपूजितः. —[c]) D5 अनु- (for एव). V2 reads from णं up to [d] in marg. —[d]) Ñ1 V1 D1–5.9 इक्ष्वाकुमपराजितं; G (ed.) शत्रुघ्नस्य महाकरं.

36 T1 G2 transp. 36 and 37. M7 om. from -शर- in [a] up to नि in[b]. —[b]) T2 तु (for स). Ñ3 V2 B [ऽ]थ (B3 [ऽ]पि) राक्षसः (for निशाचरः). —[c]) Ś2.3 सुमहाः; D3.12 सुमहान् (for सहसा). Ñ1 D1–5.9 T1 G2 पपात सु(T1 G2 स)महातेजाः T2 M1 स (M1 नि)पपात महातेजा. —[d]) V3 D12 M6 द्रुमः (for [अ]चलः). —After 36 (transp.), T1 G2 ins. 1052*.

37 T1 G2 transp. 36 and 37. Ñ1 damaged up to व in [b]. —[a]) D2.9 ततः (for तच्च). B2 सुमद् (sic); D2.9 महा- (for महच्). K (ed.) महत्तेन. Ś Ñ2 V B1.2.4 D T3.4 transp. दिव्यं and शूलं. B3 G1 M2.4–7.10 तच्च शूलं महावीर्यं(B3 °वेगं). —[b]) T4 याते (for हते). Ñ -रक्षसि (for -राक्षसे). G (ed.) लवणे निहिते युधि. —[c]) V2 (before corr. as in text).3 B4 D3.5–7.10.11 -देवानां (for -भूतानां). —[d]) D1.3–5 G2 करम् (for वशम्). T3 अभि- (for अनु-). Ś V3 D8.12 M6 करमागमत्; L (ed.) करमागतं (for वशमन्वगात्). —After 37, Ñ1 V1 D1.3–5.9 T2 M3 ins.; D2 T3 G3 M1 ins. after 38; T1 G2 ins. after 36 (transp.):

1052* ततश्च ते देवमहर्षयश्च
गन्धर्वसिद्धाः सहिताप्सरोभिः ।
अपूजयन्दाशरथिं समेता
दिष्ट्येति दिष्ट्येति मुहुर्वदन्तः ।

[(l. 1) Ñ1 V1 D1.2.4.9 T3 तु (for च). T3 om. ते. T2 ततश्च देवा ऋषयश्च सर्वे. —(l. 2) D5 -यक्षाः (for -सिद्धाः). D1.3–5 सह च (for सहिता). D9 शिरोभिः (for -[अ]प्सरोभिः). —(l. 3) D3 संपूजयन्. Ñ1 V1 D1–5.9 समेत्य (for समेता). —(l. 4) Ñ1 च दिष्टेति (for [इ]ति दिष्ट्येति). T1.2 M3 नदंतः.]

—Thereafter M1 cont.; Ñ2 B1.3.4 ins. after 37; V2 B2 (l. 4 only) D6.7.10.11 T4 G1.2 M2.4–10 ins. after 38:

1053* ततो हि देवा ऋषिपन्नगाश्च
प्रपूजिरे ह्यप्सरसश्च सर्वाः ।
दिष्ट्या जयो दाशरथेरवास-
स्त्यक्त्वा भयं सर्प इव प्रशान्तः ।

[Ñ2 illeg. for l. 1. —(l. 1) M4 om. हि. G1 M5 देवाः सह-; G2 M4 देवाः सर्षि- M6.7 देवर्षि स- (for देवा ऋषि-). M2 सहर्षयः पन्नगाश्च. V2 अथर्षयो देवगणाः ससिद्धाः; B1.3.4 ततः स देवर्षिगणाः सपन्नगाः; M1 ततो देवा ऋषयः पन्नगाश्च; M10 तथैव सिद्धर्षिमहोरगाश्च. —(l. 2) G2 प्रपूजितैर् (sic); G (ed.) अपूजयन् (for प्रपूजिरे). Ñ2 B1.3.4 M1.3 स-; T4 G1 M2.5–7.10 च (for हि). Ñ2 B1.3.4 सिद्धाः; M1 सेंद्राः (for सर्वाः). V2 प्रपूजयंत्यप्सरसश्च वीरं. —(l. 3) Ñ2 V2 B1.3.4 G2 M8.9 तवाद्य; G1 त्वयाप्तो; M1 त्वयाद्य; Ct as in text (for अवाप्तस्). —(l. 4) D6 सर्वजन-; G2 M8.9 सर्व एव (for सर्प इव). G2 M8 प्रशांताः; M9 प्रहृष्टाः (for प्रशान्तः). Ñ2 V2 B1.3.4 दिष्ट्या च (B4 om. च) लोकाः सर्व एव(Ñ2 V2 बहुशः; B3 जगति) प्रस-(Ñ2 °प)न्नाः; G1 M2.4–7.10 लोकाश्च सर्वे प्रवदंति तु(G1 ह्)ष्टाः; M1 सर्वा दिशः सर्व एव प्रशांताः.]

38 [a]) M5 स तं (for भयं). D1.3.4.8 M6 विहत्य; D6.7.10.11 T4 M6 निपात्य (for निहत्य). Ñ2 V2 B एकेषुणा चैव निहत्य शत्रुं. —[b]) Ñ2 V2 B [अ]पि; D9 [अ]द्य (for [अ]स्य). Ñ1 damaged after घु up to [अ]थ (see var.) in [c]. V1 D1–5.9 T1.2 G2 M1.3 रघूत्तमः सः (D5 °मस्य; D9 °मश्च) (for रघुप्रवीरः). —Ñ2 illeg. for [cd]. —[c]) B2 विनिर्गताद्; G1 स दीर्घबाहू (for विनिर्भयाद्). V2

६२

हते तु लवणे देवाः सेन्द्राः साग्निपुरोगमाः ।
ऊचुः सुमधुरां वाणीं शत्रुघ्नं शत्रुतापनम् ॥ १
दिष्ट्या ते विजयो वत्स दिष्ट्या लवणराक्षसः ।
हतः पुरुषशार्दूल वरं वरय राघव ॥ २
वरदाः स्म महाबाहो सर्व एव समागताः ।
विजयाकाङ्क्षिणस्तुभ्यममोघं दर्शनं हि नः ॥ ३
देवानां भाषितं श्रुत्वा शूरो मूर्ध्नि कृताञ्जलिः ।
प्रत्युवाच महाबाहुः शत्रुघ्नः प्रयतात्मवान् ॥ ४
इमां मधुपुरीं रम्यां मधुरां देवनिर्मिताम् ।
निवेशं प्राप्नुयां शीघ्रमेष मेऽस्तु वरो मतः ॥ ५

G. 7. 76. 5
B. 7. 70. 5
L. 7. 73. 5

D6.7.10.11 T3 M9 उत्तम- (for उद्यत-). Ś V2.3 B D8.12 T3 M5–7.10 -पाणिस् (for -बाणस्). Ñ1 V1 D1–5.9 T1.2 G2.3 M1.3 तमो विदार्या(D9 °हत्या)थ (Ñ1 damaged up to थ) रराज वीरः. —[d]) Ś V2 B2 D12 प्रमृद्येव; Ñ2 विदार्येव; B4 प्रपीड्येव; D8 समृद्धेव; M8 प्रणुद्येव; M10 निहत्येव (for प्रणुद्येव). Ñ1 V1 D1–5.9 T1.2 G2.3 M1.3 सूर्यो यथा चारु- (for तमः प्रणुद्येव). —After 38, Ś V3 D8.12 L (ed.) ins.:

1054* ततस्तु देवा ऋषयः सपन्नगाः
प्रनर्तयन्त्यप्सरसश्च सर्वाः ।
दिष्ट्या जयोऽनेन रणेऽपि प्राप्तो
दिष्ट्या लोकाः सर्व एव प्रशस्ताः ।

[(l. 2) V3 यक्षा पुनश्च; D8 प्रवर्तयंति (for प्रनर्तयन्ति). D12 (also as above) सर्वशः (for सर्वाः). —(l. 3) D12 च (for ऽपि). V3 महारथेन (for रणेऽपि प्राप्तो). —(l. 4) V3 हि लोकाः प्रसभं (for लोकाः सर्व एव). L (ed.) दिष्ट्या च लोकाः सकलाः प्रसन्नाः.]

—After 38, V2 B2 (l. 4 only) D6.7.10.11 T4 G1.2 M2.4–10 ins. 1053*; while D2 T3 G3 M1 ins. 1052*.

Colophon: —*Sarga name*: Ś Ñ V B D1–5.8.9.12 लवणवधः(Ś1 °मरणं). —*Sarga no.* (figures, words or both): Ś Ñ1 V2.3 D2.4.12 om.; Ñ2 T3 74; V1 53; B1 75; B2 59; B3 73; B4 76; D1 63; D3 M6 67; D5 64; D6.7.10.11 T1.2 G M1–5.7.9.10 69; D8 66; D9 71; T4 77; M8 68. —After colophon, T4 concludes with श्रीरामार्पणमस्तु। श्रीरामाय नमो नमः; G M1.2.5.8 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

62

Cv does not comment on Sarga 62.

1 [a]) Ñ1 om. तु (subm.). G2 तस्मिन् (for देवाः). —[b]) B4 सर्षि; M7 वह्नि- (for साग्नि-). M6.7 -पुरोधसः (for -पुरोगमाः). T2 G3 M1.5.9 सहेंद्राः सा(M5 समहेंद्रा)-प्सरोगणाः; M8 सहेंद्राप्सरसो गणाः. —[c]) Ś V3 B2 D8.12 ते; Ñ1 D1.3.4 T3 तं; D5 तां; T1.2 G2.3 M2.3.8.10 च (for सु-). M6.7 तमूचुर् (for ऊचुः सु-). M1 समुचितां (for सुमधुरां). V1 D2.9 T3 M6.7 -मधुरं वाक्यं; D1.3.4 °रां वाचं (for -मधुरां वाणीं). —[d]) Ñ1 V1 D1.2.4.5.9 T3 -सूदनं; G1 M6 -घातिनं (for -तापनम्).

2 [a]) Ś V3 D8.12 T1.2 G2.3 M3 त्वं विजयी; Ñ1 V1 D1–4.9 त्वं जीवितो; B1 [अ]सि विजयी; D5 त्वं जीवसे (for ते विजयो). Ñ2 B1.4 वीर; V2 marg. (for वत्स). —[b]) V2 reads from ल up to ष in [c] in marg. G (ed.) दिष्ट्या ते राक्षसो हतः. —Ñ1 damaged for [c]. —[c]) D11 reads from पुरुष up to [d] in marg. G (ed.) प्रीताः स्मो नरशार्दूल. —[d]) V3 D6.7.10.11 T4 G1 M7 सुव्रत (for राघव).

3 M1 om. 3–4. —[a]) Ñ V1 B1.3.4 D1–5.9 स्मो; V2 D6.7.10.11 T3.4 तु; B2 सु- (for स्म). M7 परमार्थं (for वरदाः स्म). —[b]) M7 [आ]गताः सह (for समागताः). —[c]) B1–3 D1.4 विजयाकांक्षिणे; D8 वराभिकांक्षिणस्; T1.2 G3 विजयः कांक्षितस्; G2 M7 विजयं कांक्षिणम्. ❀ Ck.t: तुभ्यं तव(Ck °वेति यावत्). ❀ —[d]) Ś Ñ V1.3 B D1–5.8.9.12 T2.4 G2.3 M3.8.9 च नः; V2 marg. (for हि नः).

4 M1 om. 4 (cf. v.l. 3). —[b]) Ñ2 B तदा; D1.3–5 देवान् (for शूरो). Ñ1 वरदानं तथात्मनः. —[c]) Ś V2.3 B D8.12 G1 M2.4–7.10 -तेजाः (for -बाहुः). —[d]) V2 marg.; B1.2.4 शत्रुतापनः; B3 स प्रतापवान् (for प्रयतात्मवान्).

5 [a]) M9 दिव्यां (for रम्यां). Ś Ñ (Ñ1 damaged except इयं) V B D1–5.7–12 M2.4.6.7 इयं मधुपुरी रम्या. —[b]) D6 मथुरां (for मधुरां). Ś Ñ2 V2.3 B D5.7.10–12 M2.4.6.7 मधु(D7 °थु)रा देव(V2 B2 °ना पूर्व)निर्मिता (D5 संमता); Ñ1 V1 सर्वदैवतसंमिता; D1–4.9 सर्वतो देवसंम(D2.9 °मि)ता; D8 पूर्वं मयविनिर्मिता. —[c]) Ś Ñ V B2.4 D1.3.4.7–12 T4 M2.4.6–8 प्राप्नुयाच् (for प्राप्नुयां). M8 नित्यम् (for शीघ्रम्). —[d]) D2.9 एवम्; D11 एष वो (for एष मे). Ñ2 V2 B2 परो (for वरो). Ś Ñ1 V1.3 D1.3–8.10–12 G1 M2.4–7.10 परः; Ñ2 V2 B वरः; D2.9 शुभः (for मतः). G (ed.) एष मे कांक्षितो वरः. ❀ Cm: इयमिति। इयं मधुरा। निवेशं सपौरजानपदमहाबलसेनानिर्दे(वे?)शभूतमहाराजधानीत्वं प्राप्नुयादित्यर्थः।; so also Cg.k.t. ❀

G. 7. 76. 6
B. 7. 70. 6
L. 7. 73. 6

तं देवाः प्रीतमनसो बाढमित्येव राघवम् ।
भविष्यति पुरी रम्या शूरसेना न संशयः ॥ ६
ते तथोक्त्वा महात्मानो दिवमारुरुहुस्तदा ।
शत्रुघ्नोऽपि महातेजास्तां सेनां समुपानयत् ॥ ७
सा सेना शीघ्रमागच्छच्छ्रुत्वा शत्रुघ्नशासनम् ।
निवेशनं च शत्रुघ्नः शासनेन समारभत् ॥ ८
सा पुरी दिव्यसंकाशा वर्षे द्वादशमे शुभा ।
निविष्टा शूरसेनानां विषयश्चाकुतोभयः ॥ ९
क्षेत्राणि सस्ययुक्तानि काले वर्षति वासवः ।
अरोगा वीरपुरुषा शत्रुघ्नभुजपालिता ॥ १०

—After 5, M6 ins. :

1055* परितोषश्च मे स्फीतो गुरुनन्दनतस्तथा ।
देवानां च प्रसादेन निहतो लवणो मया ।
ज्येष्ठस्य भूमिपालस्य राज्ञो राज्यगुणैषिणः ।
महत्या प्रभया शीघ्रं हतो मधुसुतो मया ।
इत्येवमुक्तास्ते देवाः शत्रुघ्नेन महात्मना । [5]
शत्रुघ्नं देवशत्रुघ्नं व्याहर्तुमुपचक्रमुः ।
एवमेव महाबाहो शत्रुघ्न रघुनन्दन ।
यत्त्वं मधुवने हंसि लवणं भूमिकम्पनम् ।

6 [a]) V1 ते देवाः; D2.9 देवास्ते (for तं देवाः). —V2 reads from प्रीत up to [b] in marg. B1.4 प्रीतिमनसो; G (ed.) बाढमित्येवं (for प्रीत°). —[b]) Ñ1 D1.3–5 चाब्रुवन् ; M4 सोदरं (for राघवम्). V1 बाढमेतमथाब्रुवन् ; D2.9 T3 बाढमित्यब्रुवन्स तं; G (ed.) प्रीताः शत्रुघ्नमब्रुवन् . —[c]) Ñ1 V1 D1.2.4.5.9 T3 [इ]यं नगरी; D3 [इ]यं नाम्ना तु (for पुरी रम्या). V2 (marg.) B आहुर्भविष्यति पुरी. —[d]) Ś1.2 Ñ1 B3 D1.3.4.8 मथुरेति; Ś3 Ñ2 V1 D2.5.9.12 T3 मथुरेति; V2 (marg.) रम्या सैषा; B1.4 वीरस्यैषा; B2 शूरस्यैषा; M10 शौरसेनी; Cm.g.k.t as in text (for शूरसेना). Ś Ñ V1 D1–5.8.9.12 T3 [प्र]व विश्रुता; G (ed.) [अ]भिशब्दिता (for न संशयः). —After 6, V2 G (ed.) ins. :

1056* पूजिता सर्वलोकस्य यथा देवपुरी दिवि ।
[G (ed.) लोक-॒ (for देव-).]

—Then V2 cont. l. 1–2 of 1057*.

7 [a]) Ś Ñ V1॒ D1–5.9.12 T3 एवम् ; V2 B1.2. तथा च; B3 तस्य च; M1 तं तथा (for ते तथा). Ñ2 D2.9 महात्मानं (for महात्मानो). D8 दत्त्वैव वरं महात्मानो (hypm.). —Ñ2 illeg. for [b]. —[b]) D3 दिवि (for दिवम्). Ś Ñ V2.3 B D1.3–5.8.12 खं(Ñ1 D1.3–5 सं; V2 B ते) विविशुस् ; G1 M2.4–7.10 संप्रय(M6 °प्रामु)युस् (for आरुरुहुस्). Ñ1 D1.3–5 ततः (for तदा). V1 D2.9 T3 देवलोकं ययुस्ततः. —V2 om. 7[c–d]. —[c]) B2 वै (for ऽपि). Ñ V1 D1–5.9 -बाहुस् (for -तेजास्). —[d]) D1.3–5 स्वां; Cm as in text (for तां). G2 om. सेनां. Ñ1 V1 D1–5 समुदा(D1.3.4 °पा)वहत् ; B1.2 °पाह्वयत् ; B3 सममार्दयत् ; B4 समुपाक्रमत् ; D7 °पाविशत् ; T3 °पाहरत् (for समुपानयत्). —For 7, G (ed.) subst.; while V2 cont. l. 1–2 after 1056* and ins. l. 3 after 7[a–b] :

1057* इत्युक्त्वा देवताः सर्वा विमानैः शतशो नभः ।
कृत्वा वितिमिरं सर्वं प्रतियाता यथागतम् ।
गतेषु देवसंघेषु शत्रुघ्नो रघुनन्दनः ।
तां सेनामानयामास यां हित्वा पूर्वमागतः ।

[(l. 1) V2 ताश्क्ता (illeg.) (for इत्युक्त्वा) and गताः (for नभः).]

8 [a]) D2 या (for सा). Ñ1 T1–3 G2.3 M3.5 8.9 आगम्य; D2.9 आगत्य (for आगच्छच्). —[b]) D8 कृत्वा (for श्रुत्वा). B4 शत्रुघ्नस्य च शासनं. —[c]) D5 निवेशं तं (for निवेशनं). —V2 reads from शत्रुघ्नः up to [d] in marg. Ś Ñ1 D9.12 T3 G2 च चक्रे स(G2 °क्रेसौ); V1 D5 ततश्चक्रे; V3 च प्रयतः; D1.3.4 T1.2 G3 M3 चं चक्रे सा(D3 °क्रेस्याः); M6 च सदनं; M8.9 चाव्यसनं (for च शत्रुघ्नः). —Ñ2 illeg. for [d]. —[d]) Ś Ñ1 V1.2 B D2.3.10–12 M1.6.8.9 Cm.g.k.t श्र(D10.11 M1 Cm.g.t श्रा)वणेन(M8 °णे सा); V3 D1.4.9 स (V3 D9 स्व)बलेन; D5 स बलस्य; T1–3 G2.3 M3 मथुरायां; G1 तत्र शीघ्रं (for शासनेन). Ś Ñ1 V1 D2.5.9.12 T3 G2 महाबलः; V2 B D2 तदाकरोत् ; V3 स चाभवत् ; D1.4 G3 M3 महाबलाः D6 समाविशत् ; D7.11 T4 G1 M2.4.5.10 समाचरत् ; Cm.g.k.t as in text (for समारभत्). —For 8°[d], D8 subst. :

1058* दुरीकृत्वा भयं घोरं लवणेन महाबल ।

9 [a]) V2 D10.11 Ck.t स पुरा; Cg.t*p* as in text (for सा पुरी). D1–5.9 देव- (for दिव्य-). Ś V3 D12 -संवासा; V2 D10.11 -संकाशो; D1–5.9 -संस्थाना (for -संकाशा). V1 सा पुरस्य च संस्थाना. —V2 reads 9[b] (except वर्षे) in marg. —[b]) Ñ1 V1 D1–5.9 [ऽ]भूद्वादशे; M6.7 G (ed.) तु(G [ed.] वै) द्वादशे; Cg.k.t as in text (for द्वादशमे). Ś V2.3 B2.3 D2.7–12 M1.6.7 शुभे; Ñ2 V2 B1.4 [ऽ]भवत् ; G (ed.) तदा (for शुभा). —[a]) Ñ2 V2.3 B3.4 D10.11 Ck.t निविष्टः; B2 निवेशः; Cg.t*p* as in text (for निविष्टा). V2 B4 शूरसेनायां(B4 °न्यः); T1.2 G2.3 M3.7 शूरसेना सा; G (ed.) विषयश्चास्याः (for शूरसेनानां). Ñ1 V1 D1–5.9 निविष्टो विषयश्चैव. —[d]) M6.7.9 [अ]कुतोभयं. Ś V3 D8.12 T3.4 M5 विषयाश्चाकुतोभयाः; Ñ1 V1 B4 D1–5.9 शूरसेनस्ततोभवत् ; Ñ2 विषयः स ततोभवत् .

10 D6 om. 10. —[a]) Ñ1 V1.2 D1–4 श(D1.4 सस्यः D3 रस)वंत्यस्यां(V2 *sup. lin.* also °त्यस्मिन्); Ñ2 B

अर्धचन्द्रप्रतीकाशा यमुनातीरशोभिता ।
शोभिता गृहमुख्यैश्च शोभिता चत्वरापणैः ॥ ११

यच्च तेन महच्छून्यं लवणेन कृतं पुरा ।
शोभयामास तद्वीरो नानापण्यसमृद्धिभिः ॥ १२

G. 7. 75. 13
B 7. 70. 12
L. 7. 73. 12

सस्यवंत्यासन् ; D5.9 सस्यवंति स्युः(D9 °तीति) (for सस्य-युक्तानि). M7 क्षोणी च सस्यसंयुक्ता. —^{b}) D5 तोयदः (for वासवः). Ś V3 D12 M6 काले देवो ववर्ष च; Ñ V2 B D1–4.9 काले देवश्च(Ñ2 V2 B °वः प्र) वर्षति; V1 M7 देवः काले च वर्षति; D8 पर्जन्यः कालवृद्धिकृत् . —^{c}) Ñ V B1.3.4 D1.4.5.7.10.11 G2 अरोगवीर-; D2.9 अप्रमत्ताश्च; D3 आरोग्य-वीर-; D5 अरोगवर्त (sic) (for अरोगा वीर-). V2 B1 -पुरुषा; D1–3.9.12 T4 G2 M5.8 -पुरुषाः (for -पुरुषा). —^{d}) Ś D8.12 शत्रुघ्नपरि-; B1 शत्रुघ्नेन तु (for शत्रुघ्नभुज-). V2 B1 -पालितां; D1–3.9.12 T4 G2 M5.8 -पालिताः (for -पालिता). —After 10, Ñ2 V2 B2 ins. l. 1 of 1059*.

11 ^{a}) V2 B2 -प्रतीकाशां; Cm.g.k.t cite as in text. —^{b}) Ñ2 V2 B2 T1 M3 -तीरमाश्रितां(Ñ2 T1 M3 °ता); D1.3–5 °संस्थिता (for -तीरशोभिता). —G (ed.) om. 11^{cd}. —^{c}) D5 हर्म्य- (for गृह-). —^{d}) M9 नदीभिश् (for शोभिता). V3 G1 M6.8.9 चांतरापणैः (for चत्व°). Ś Ñ1 V1 D1–4.8.9.12 चत्वरैरापणैस्तथा; D5–7.10.11 T3.4 M2.4.5.7.10 चत्वरापणवीथिकैः(D6.7 T3 °वीथिका; T4 °वीथिका:; M2.4.5.7.10 °शोभिता). ❀ Ct : वीथीकस्यास्त्रीत्वमार्षम् . ❀ —For 11, B1.3.4 subst.; Ñ2 V2 B2 ins. l. 1 after 10 and subst. l. 2–4 for 11^{cd}; Ś1 V3 D8.12 ins. l. 3–4 after 11^{ab}; D7.10.11 T G M1–5.6(l. 1–3).7–10 only l. 4 cont. after 1062* :

1059* वप्रप्राकारसम्पन्नां गोपुराट्टालसंवृताम् ।
शोभितां राजमार्गेण नानापण्यविभूषिताम् ।
उद्यानवेश्मसम्पन्नां समृद्धनरसंवृताम् ।
नानादेशागतैश्चापि वणिग्भिरुपशोभिताम् ।

[(l. 1) B3.4 -संपन्ना; M6 -विपुलां (for -सम्पन्नां). Ñ2 -तोरणां; B3.4 -संवृता (for -संवृताम्). M6 गोपुरागैलशोभितां (for the post. half). —(l. 2) B3.4 शोभिता. M6 -पण्योप- (for -पण्यवि-). B3.4 -भूषिता. —After l. 2, M6 ins. :

1059(A)* वर्णशालागृहैर्मुख्यैरजितैरजितान्तराम् ।

—(l. 3) Ś1 V3 D8.12 M6 -वनसंपन्ना(M6 °न्नां); B3.4 -वेश्मसंपन्ना. B3 -बल-; B4 -शर-; M6 -जन- (for -नर-). Ñ2 V2 B1 -सेवितां; B3.4 -संवृता (for -संवृताम्). Ś1 V3 D8.12 संवृद्ध (V3 °द्धा)तरुसंवृता (for the post. half). —(l. 4) Ñ2 V2 B1.3.4 D7.8.10.11 G2.3 M1.2.4.8.10 -देशगतैश् (for -देशा°). G1 M2.4.5.10 पुरुषैर् (for वणिग्भिर्). Ś1 V3 B3.4 D8.12 -शोभिता; M1.9 -सेवितां (for -शोभिताम्).]

—Thereafter, Ñ2 cont. l. 1–2 of 1062*; while B2 cont. :

1060* निवेशयामास तदा स्थानेन च विशेषतः ।

—Thereafter, B2 further cont. l. 1–2 of 1062*.

—After 11, D6.7.10.11 G1 M2.4.5.9.10 ins. :

1061* चातुर्वर्ण्यसमायुक्ता नानावणिजशोभिता ।

[M2.4.9.10 चातुर्वर्ण्यैः. D7.11 -वाणिज-; D10 -वाणिज्य- (for -वणिज-).]

12 Ñ2 B transp. 12 and 13 (Ñ2 illeg.). —^{ab}) Ś V3 D8.12 या च; V1 एवं; B1 पूर्वं; B4 यस्य (for यच्च). V3 B3 [अ]नेन (for तेन). Ś V3 D8.12 -शुभ्रा; Ñ1 D1.4.6.7.9–11 T4 G M2–8.10 Cg.k.t शुभ्रं; D3 गृहं; D5 T1–3 M1.9 श्वभ्रं (for शून्यं). V2 reads कृतं पुरा in marg. Ś V2 D8.12 कृता; M2.4 तदा; M5 गृहं; Cm as in text (for कृतं). Ś Ñ1 V2 D1.3–5.8.12 M1.8.9 तदा; D6.7 G1 M10 गृहं; M2.4.5 कृतं; M6 om.; Cg.k.t as in text (for पुरा). D10.11 transp. महच् and पुरा. —^{c}) T1.2 G2.3 M3 शत्रुघ्नो (for तद्वीरो). Ś V3 D8.12 व्यशोभयत शत्रुघ्नो; D6.7.10.11 T4 G1 M1.2.4–10 तच्छो(M7 स शो)भयति शत्रुघ्नो. —^{d}) V2 D2.9 -पुण्य-; B1 -पथ-; D1.4 -पुण्प- (for -पण्य-). Ñ V1.3 D6–8.12 T4 M5.8.9 -पण्योपशोभितं(Ñ V1.3 D8.12 °तां); D10.11 G1 Ct -वर्णोपशोभितं; T1.2 G2.3 M1.3 -वर्णेन तद्गृहं; M2.4.6.7.10 -पण्येन शोभितं. —After 12, Ñ1 V2 B4 (l. 1 only) D1–7.9–11 S ins.(Ñ1 D1–5.9 subst. l. 3 only for 13^{ab} ; while Ñ2 cont l. 1–2 after 1059*; B2 cont. l. 1–2 after 1060* :

1062* आरामैश्च विहारैश्च तटाकैश्च समन्ततः ।
शोभिता शोभनीयैश्च यैश्चान्यैर्दिव्यमानुषैः ।
तां पुरीं दिव्यसंकाशां नानापण्योपशोभिताम् ।

[(l. 1) V2 B2 आगारैश्; G1 आहारैश् (for आरामैश्). B2 महाहारैश् ; T4 विरामैश्च (for विहारैश्च). B4 नानावृक्षैश्च पुष्पैश्च (for the prior half). Ñ2 B2.4 तडागैश्च; V2 D6.7.10.11 T4 K (ed.) शोभमानं(T4 °नैस् ; K [ed.] °नां) (for तटाकैश्च). B4 सपंकजैः; T4 ततस्ततः (for समन्ततः). Ñ1 D1–4.9 T3 उद्यानैश्च पुरैश्चैव(T3 सरोभिश्च) तडागैश्चैव सर्वशः(Ñ1 D2.9 °तः); D5 पुरैश्चोपवनैश्चैव सर्वशः शोभनैर्वृतां. —(l. 2) Ñ V2 B2 D5.10.11 G3 M6.10 शोभितां (for शोभिता). Ñ V2 B2 D1–5.9 T3 शोभमानैश् (for शोभनीयैश्). Ñ V2 B2 D1–5.9–11 T3 तथान्यैर् ; D7 यत्रान्ये; M10 तैश्चान्यैर् (for यैश्चान्यैर्). Ñ2 V2 D7.10 दैव-; B2 (marg. also) D11 देव-; M7 दीप्त- (for दिव्य-). D7 -मानुषाः; G (ed.) -पूरुषैः (for -मानुषैः). D6 T1.2 G2.3 M1–3.8.9 ये चान्ये दिव्यमानुषाः (for the post. half). —(l. 3) Ñ1 देव- (for दिव्य-). G1 M2.4.5.10 सा पुरी दिव्य-संकाशा (for the prior half). G (ed.) -पुण्योप- (for -पण्योप-). G1 M2.4.6.7.10 यमुनातीरशोभिता(M6.7 °तां); M5 नानावर्णोपशोभिता (for the post. half).]

—Thereafter, D7.10.11 T G M1–5.6(l. 1–3).7–10 cont. l. 4 only of 1059*.

G. 7. 76. 15
B. 7. 70. 15
L. 7. 73. 13

तां समृद्धां समृद्धार्थः शत्रुघ्नो भरतानुजः ।
निरीक्ष्य परमप्रीतः परं हर्षमुपागमत् ॥ १३

तस्य बुद्धिः समुत्पन्ना निवेश्य मधुरां पुरीम् ।
रामपादौ निरीक्षेयं वर्षे द्वादशमे शुभे ॥ १४

इति श्रीरामायणे उत्तरकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

Arya Research Team

13 $\tilde{N}_2$ B transp. 12 and 13 ($\tilde{N}_2$ illeg.). D_8 om. $13\text{-}14^b$. V_1 om. 13^{ab}. For subst. in $\tilde{N}_1$ $D_{1\text{-}5.9}$ cf. v.l. 1062*. —^{a}) V_2 B_3 समृद्धां तां (by transp.); B_1 समृद्धार्थः; $B_{2.4}$ समृद्धां तु; M_9 स समृद्धां (for तां समृद्धां). Ś D_{12} च शत्रुघ्नो; V_3 B_1 D_6 T_2 समृद्धार्थां (for समृद्धार्थः). —^{b}) Ś D_{12} ददृशे (for शत्रुघ्नो). V_2 B लक्ष्मणानुजः. —^{cd}) D_7 G_1 परमः; M_1 तां पुरीं (for परम-). V_2 $B_{1\text{-}3}$ -स्फीतां; $T_{1\text{-}3}$ G_3 M_3 -प्रीत्या (for -प्रीतः). B_1 M_1 उपागतः (for उपागमत्). G (ed.) हर्षं शत्रुघ्न आविशत् (for ^{d}). $\tilde{N}_1$ V_1 $D_{1\text{-}5.9}$ निरीक्ष्य परया प्रीत्या शत्रुघ्नो हर्षमागमत् (D_5 °गतः).

14 D_8 om. 14^{ab} (cf. v.l. 13). —^{a}) $\tilde{N}$ V_1 B_2 $D_{1\text{-}5.9}$ T_3 चिंता (for बुद्धिः). —^{b}) Ś M_2 निरीक्ष्य; $\tilde{N}_1$ विवेश्य; M_7 प्रवेश्य; G (ed.) निविश्य (for निवेश्य). Ś $D_{1.3.5.7}$ मधुरां; M_{10} मधुरा-; Ck as in text (for मधुरां). —^{c}) Ś $\tilde{N}_2$ V B_2 $D_{6\text{-}8.10\text{-}12}$ $T_{3.4}$ $G_{1.2}$ $M_{1.2.4.10}$ निरीक्षे ($D_{6.7.10}$ T_4 G_2 $M_{4.10}$ °क्ष्ये)हं; $\tilde{N}_1$ $D_{1.3\text{-}5}$ प्रपश्येयं (for निरीक्षेयं). —^{d}) $\tilde{N}$ $V_{1.2}$ $D_{1\text{-}5.8\text{-}11}$ T_3 वर्षे द्वादश आगते; V_2 B_2 वर्षेस्मिन्द्वादशेचिरात् . —For 14, $B_{1.3.4}$ subst.; while $\tilde{N}_2$ V_2 B_2 $D_{7.10.11}$ ins. after 14 :

1063* ततः स ताममरपुरोपमां पुरीं
निवेश्य वै विविधजनाभिसंवृताम् ।
नराधिपो रघुपतिपाददर्शने
दधे मतिं रघुकुलवंशवर्धनः ।

[(l. 2) B_3 तां (for वै). —(l. 3) B_2 नरपति- (for रघु°). —(l. 4) $B_{2\text{-}4}$ दधौ; D_7 दध्रे (for दधे). V_2 मतिं दधौ (for दधे मतिं).];

while M_7 ins. :

1064* हत्वा मधोः पुत्रममन्दवीर्यः
स तान्सुरेशान्निशरसा प्रणम्य ।
कृत्वा निवासं भवने तदीये
द्रष्टुं स रामं प्रययौ महीशः ।

Colophon : V_1 om. —*Sarga name*: Ś $\tilde{N}_1$ V_3 $D_{1.3\text{-}5.8.12}$ मधु(D_4 °धु)रानिवेशः($Ś_1$ V_3 °शनं); $\tilde{N}_2$ V_2 $B_{1.3.4}$ मधुपुरनिवेशः(B_3 °शनं); B_2 मधुवनप्रवेशः; $D_{2.9}$ मधुपुर्यां शत्रुघ्ननिवासः; L (ed.) मधुरोपनिवेशः. —*Sarga no.* (figures, words or both): Ś $\tilde{N}_1$ $V_{2.3}$ $D_{2.12}$ om.; $\tilde{N}_2$ T_3 75; B_1 76; B_2 60; B_3 74; B_4 77; $D_{1.4}$ 64; D_3 T_4 78; D_5 66; $D_{6.7.10.11}$ $T_{1.2}$ G $M_{1\text{-}5.7\text{-}10}$ 70; D_8 67; D_9 72; M_6 68. —After colophon, T_4 concludes with श्रीरामार्पणमस्तु। श्रीरामाय नमो नमः; G $M_{1.2.5.8}$ with श्रीरामाय नमः; M_{10} with श्रीरामचन्द्राय नमः.

६३

ततो द्वादशमे वर्षे शत्रुघ्नो रामपालिताम् ।
अयोध्यां चकमे गन्तुमल्पभृत्यबलानुगः ॥ १
मन्त्रिणो बलमुख्यांश्च निवर्त्य च पुरोधसम् ।
जगाम रथमुख्येन हययुक्तेन भास्वता ॥ २
स गत्वा गणितान्वासान्सप्ताष्टौ रघुनन्दनः ।
अयोध्यामगमत्तूर्णं राघवोत्सुकदर्शनः ॥ ३
स प्रविश्य पुरीं रम्यां श्रीमानिक्ष्वाकुनन्दनः ।
प्रविवेश महाबाहुर्यत्र रामो महाद्युतिः ॥ ४

G. 7. 78. 7
B. 7. 72. 7
L. 7. 75. 8

63

D12 begins with ॐ.

1 [a]) B3 पूर्णे; M2 गते; Cm.g.k.t as in text (for ततो). Ś Ñ1 V1 B3 D1–5.8.9.12 T3 तु (B3 स) द्वादशे. —[b]) Ś Ñ1 V1 B2.3 D1–4.7–9.12 T3 शत्रुताप (B3 °पात)नः; Ñ2 D5 शत्रुसूदनः; V2 (before corr. as in Ś) B1.4 शत्रुकर्षणः (for रामपालिताम्). —[c–d]) V2 B ईहते; V3 प्रययौ; T2 चक्रमे; M7 प्राक्रमद् (for चकमे). V3 पूर्णां (for गन्तुम्). G (ed.) चक्रेयोध्यां मतिं गंतुम् (for °). T1.2 लब्धभृत्य-. G2 -पदानुगः; Ck.t as in text (for -बला°). V3 सामात्यः सपदानुगः (for [d]). D7 प्रययौ सेनया सार्धं रामसंदर्शनोत्सुकः. —For 1[c–d], Ś Ñ V1 D1–5.8.9.12 T3 subst.:

1065* अयोध्यागमने बुद्धिं चकारात्पपदानुगः ।

[Ñ2 illeg. for the prior half. Ñ2 T3 -बल- (for -पद-).]

2 [b]) B2–4 G1 निवृत्य; M4 निवार्य (for निवर्त्य). G1 M4.5 स (for च). V3 G1 M4.5 पुरोधसः. —For 2[a–b], Ś Ñ1 V1.2 D T G2.3 M1.3.8.9 G (ed.) subst.:

1066* ततो मन्त्रिप्रधानांश्च बलमुख्यान्निवर्त्य च ।

[Ś1.2 V1 पुर-; Ś3 D8.12 सुर-; D3 मंत्र-; G (ed.) बल- (for मन्त्रि-). D6.7.10.11 T1.4 M1.3.8.9 -पुरोगांश्; T2 G2.3 -पुरोधांश् (for -प्रधानांश्). Ś V1 D8.12 स (for च). T3 निवेश्य (for निवर्त्य). D2.9 T3 सः (for च).]

—Ñ1 damaged from मुख्येन in [c] up to श (see var.) in [d]. —[c]) D6.7.10.11 हयमुख्येन; K (ed.) हयमुख्यैश्च; (for रथ°). T3 अनुगानां सहस्रेण. —[d]) Ś D8.12 जय-; G1 वाजि- (for हय-). L (ed.) भासता (for भास्वता). Ñ V1.2 B (B2 m. also) D1–7.9–11 T G2.3 M1.3.8.9 हया (D6.7.10.11 रथा)नां च शतेन च (V2 B2.4 वै; D2 T4 ह; D3.5–7.10.11 T1.2 G3 M1.3 सः); B2 (orig.) हयानामयुतेन च.

5 ^{a}) M1 ततस्; M10 तीर्थे (for तस्मिंस्). B4 G3 सूर्य-. Ñ2 D6.7.10.11 T3.4 G1 M3.5 °शतैः कीर्णे; M4 °शताकीर्ण. —^{b}) B1.3.4 -[अ]प्सरसायुते; T1 G2.3 M4.8.9 -[अ]प्सरसां कुले. V2 वाक्यं चाप्सरसां शुचिः D6.7 T3.4 G1 M3.5 व्योघ्नि चाप्सरसां गणैः(M8 कुले). ❀ Cg.k.t: गन्धर्वाप्सरसंकुले गन्धर्वाप्सरःसंकुल इति यावत्. ❀ —For 5^{ab}, Ś V1.3 B2 D1-5.8.9.12 M6 subst.:

1491* गन्धर्वैरप्सरोभिश्च नृत्यद्भिश्च समंततः ।

[V1.3 तस्मिंस्तूर्ये उपस्थिते; D1-5.9 तस्मिन्सूर्ये (D5 °न्स्वर्गम्; D9 °न्स्वर्गे) उपस्थिते; B2 नृत्यत्तूर्यैश्च संकुलः; M6 तस्मिंस्तूर्ये विनादिते (for the post. half).]

—^{c}) Ñ2 B2-4 G2 M10 -सलिले; B1 -पुलिने (for -सलिलं). Ś D8.12 पुण्ये (for रामः). —^{d}) Ś D8.12 स पद्भ्याम्; B पद्भ्यामेव (for पद्भ्यां सम्-). T1 पद्भ्यामेव व्यगाहत. —After 5, M6 ins.:

1492* ततः स सरयूतोये मुहूर्तं ध्यानमास्थितः ।
रराज राजा विरजाः सहजेनोजसा वृतः ।

6 V3 om. 6. T3 damaged from ^{a} up to राम राम in 1494*. —^{a}) V2 B1.3.4 वाचम् (for वाणीम्). V1 D1-5.9 पितामहस्ततो(D2 °दाः D9 °था) वाक्यम्. —^{b}) Ś1.2 ह्यंतरिक्षे हि; Ś3 V2 B D8 ह्यंतरी(Ś3 D8 ह्यंतरि)क्षेभि-(B1 °धु); V1 °रीक्षाद्; D6.7 T4 G1 ह्यँ(D7 T4 त्वं)तरिक्षे तु; D10-12 त्वं(D12 ह्यं)तरिक्षाद्; M5 °क्षेनु-(for अन्तरिक्षाद्). B3 अभाषयत्. —After 6^{ab}, G2 M10 ins.:

1493* हर्षयन्वानरान्सर्वाञ्ज्ञातीनां चैव देवताम् ।

—^{d}) Ś Ñ2 V2 B D1.3.5-9.12 G1 M1.5.6.8.9 मानद्; D4 मानदः; Ck.t as in text (for राघव). —For 6^{cd}, T3.4 subst.:

1494* राम राम महाबाहो विष्णुस्त्वं हि सनातनः ।

[T3 damaged for राम राम.]

7 ^{a}) V3 पितृभिः, Ñ2 V1 D1-5.9 T3.4 देवेशः; V3 देवैश्च; M5 देवार्हैः; M7 देवाभः; M10 देवाग्रैः; Cm.k.t देवाभैः (as in text). Ś B2 D8.12 सहितः श्रीमान्; M6 सहितो देवैः (for सह देवाभैः). V2 भज प्रियां तनूं * *; B1 भजांघ्रिं पांशुलं वीरः; B3.4 प्रविश स्वां तनुं वीर. —^{b}) Ś D8.12 प्रविशाशु; Ñ2 V1 B2 D3.5.9 T3.4 प्रविश त्वं. D6 M6 Ct स्विकां तनुं; G (ed.) स्वकां तनूं; Cm.g स्वकां तनुं (as in text). V2 B1.3.4 भ्रातृभिः सहितस्त्रिभिः. —After 7^{ab}, Ñ2 V2 B1.3 D6.7.10.11 read 9^{cd} for the first time repeating it in its proper place. —B1-3 om. 7^{cd}. —^{c}) Ś1.2 D2.3.5.9.12 वैष्णवीं त्वं; Ś3 D1.4 °वं त्वं (D1.4 तं); V1 विष्णुत्वं वा; V2 B4 °वं हि; D7 M1 °वीं वा; D8 °वीं त्वां; M6 °वं वा; G (ed.) °वीं सु-(for वैष्णवीं तां). Ś D8.8.12 महाबाहोः; D2.5.6.9 T2.4 G1.2 M1.3.5 महातेजा(M5 °राज). —G3 M8 om. (hapl.) 7^{d}-9^{c}. —^{d}) Ś D8.12 व्रजाकाशं; V2 B4 तत्रा°; D6.7.10.11 M3.6 यद्वा°; T1 तत्त्वा°; T2 M1.7 तद्वा°; G2 स्वप्रकाशं; M10 तच्चा° (for तदाकाशं). Ñ2 V1.3 D1.3-5 यद्वान्यं(V3 सृज त्वं) मनसेप्सितं; D2 यद्वा गच्छ गुणान्वितं; D9 यद्वा स्वस्य गुणान्वितां; T3.4 G1 M5 यदा(T3 °था)कारां सनातनीं. ❀ Cv: वैष्णवीं स्वकारणभूतस्योपेन्द्रात्मकस्य विष्णोः स्थानम् ।; Cm: यद्वाकाशं सनातनमाकाशमेव प्रविश ।; Ck: वैष्णवीं तां महातेजस्तां तनुं प्रविश स्वयमिति पाङ्क्तः पाठः ।; Ct: हे महातेजः वैष्णवीमौपेन्द्रीं यतो वा मनुष्यदेहस्तां वा प्रविश । यद्वाकाशं सनातनं. ❀

8 G3 M8 om. 8 (cf. v.l. 7). —^{a}) Ś D8.12 लोक-गुरुः; Ñ2 V B1.4 D1-5.9 °पतिः; T3.4 °करो (for °गतिः). D9 प्राप्तः (for देव). M1 देवलोकगतं देव. —^{b}) B3 नो त्वां; G (ed.) न हि. T3-4 M1.4.6.7.9 कश्चित् (for केचित्). M1.6 प्रजानति. Ś Ñ2 V1.3 B2 D1.3-5.8.12 G2 M10 न त्वां जानाति (D8 त्वं जानासि) कश्चन; D2 त्वां जानाति न कश्चन; D9 समानदो भ्रातृभिः सह (hypm.). —T4 repeats 8^{cd} in marg. —^{c}) D1 कृते; D2 यत्ते; M10 सुंब (for ऋते). Ś Ñ2 V3 B2 D1-5.8.12 T3 (second time) मत्तो; V2 मां त्वां; V3 मां हि; M6 महद् (for मायां). B1 ज्ञानवंतो; B4 मामृते तु; D9 देवेश प्र-; T3 G1 मायां विना; T4 (first time) मया विना; M5 मायाविनो (for ऋते मायां). Ś D8.12 विशालाक्षः; D6.7.10.11 T4 (second time) M1-3 विशालाक्षीं. —^{d}) Ñ2 V3 D2-5.9 भूतपूर्व-; V1 सर्वभूत-; V2

G. 7. 115. 0
B. 7. 110. 11
L. 7. 112. 11

त्वमचिन्त्यं महद्भूतमक्षयं सर्वसंग्रहम् ।
यामिच्छसि महातेजस्तां तनुं प्रविश स्वयम् ॥ ९
पितामहवचः श्रुत्वा विनिश्चित्य महामतिः ।
विवेश वैष्णवं तेजः सशरीरः सहानुजः ॥ १०
ततो विष्णुगतं देवं पूजयन्ति स्म देवताः ।
साध्या मरुद्गणाश्चैव सेन्द्राः साग्निपुरोगमाः ॥ ११
ये च दिव्या ऋषिगणा गन्धर्वाप्सरसश्च याः ।
सुपर्णनागयक्षाश्च दैत्यदानवराक्षसाः ॥ १२
सर्वं हृष्टं प्रमुदितं सर्वं पूर्णमनोरथम् ।
साधु साध्विति तत्सर्वं त्रिदिवं गतकल्मषम् ॥ १३

यं ते पूर्वं; B1 (before corr., after m. as in B2) यस्ते हस्त-; B2-4 यस्ते(B4 °त्ते)पूर्व- (for तव पूर्व-). Ś Ñ2 V B3 D8.12 T1.2 G1 M5 -परिग्रहं; B2.3 D2.9 M1 °ग्रहः; D1.3-5 T3.4 (first time) M6 °ग्रहात् (for °ग्रहाम्). ❀ Cv: ऋते मायां मायामतिक्रम्य । मायया मोहिता न जानन्तीत्यर्थः ।; Cm: केचित्तपोबलादिभिः अतिशयितज्ञानसम्पन्ना अपि मायां ज्ञानशक्तिम् । ऋते विना । विशालाक्षीमित्यनेन तस्याः सर्वविषयता साक्षात्कारूपता चोच्यते । पूर्वपरिग्रहामित्यनेन सहजत्वमुच्यते ।; Ct: ऋते इति । मायां ज्ञानशक्तिरूपां विनान्ये न जानन्तीत्यर्थः । विशालाक्षीमित्यनेन तस्याः सर्वविषयता सूचिता । पूर्वपरिग्रहाम् । तेन सहजत्वं सूचितम् . ❀ —After 8, V1 ins.; while V2 ins. after 9^{ab}:

1495* पवित्रं परमं चैव शाश्वतं दिव्यमव्ययम् ।
योगिनस्त्वां विजानन्ति परं ब्रह्म सनातनम् ।

[(l. 1) V2 शरीरगमनं चैव (for the prior half). —(l. 2) V2 illeg. for the post. half.]

9 G2 Ms om. $9^{ab\alpha}$ (cf. v.l. 7). V1 om. (hapl.?) 9^{ab}. —^{ab}) Ś D8.12 M1 तम्; Ñ2 V2.3 B1.2.4 D6.7.10.11 G2 M3 Cm.g.t त्वाम् (for त्वम्). B2 त्वामचिंत्यं महाभूतम् (for ^{a}). T1 damaged from सं up to महा in ^{c}. Ś V3 D1-5.8.9.12 लोकसं(D1.3.4 °वि)ग्रहे(Ś2.3 V3 °हं); Ñ2 V2 B1-3 सर्ववि°; D6.7.10.11 चाजरं तथा (for सर्वसंग्रहम्). T3.4 त्वमाचिंत्यां महद्भूतामक्षय्यां चा(T4 °य्याम्)जरां तथा; M6 त्वमाचिंत्यो महाभूतो ह्यक्षयः सर्वसंग्रहः. —After 9^{ab}, V2 ins. 1495*. —Ñ2 V2 B1.3 D6.7.10.11 repeat 9^{cd} here (cf. v.l. 7). —^{c}) V2 (first time) यामिच्छेत. Ś Ñ2 V2 (Ñ2 V2 second time) B2 D1.2.4.5.8.9.12 T4 महावीर्यं (Ś Ñ2 °र्यस्; D5 °र्यं); Ñ2 V2 B1.3 D3.6.7.10.11 M6 (except D3 M6, all first time) °बाहो; V1 °वीरः V3 °प्राज्ञ; B1 (second time) तनूं वीरः B3.4 (second time) तनुं(B4 °नूं) देव; M1.5 °तेजास् (for महातेजस्). —^{d}) B3 (second time) तां नूनं; D8 सा तनुः; G (ed.) तां तनूं. Ñ2 V3 B1.3(all both times).4 D6.7.10.11 (except B4 all first time) स्वकां; B2 स्त्रिकां (for स्वयम्). Ś D8.12 प्रविवेश्यतां; D2.9 प्रविशस्व च. ❀ Cm: त्वामचिन्त्यमिति। अचिन्त्यं देशतः परिच्छेदशून्यम् । महद्भूतम् । भू प्राप्ताविति धातोरुत्पन्नेन भूतशब्देन सकलवस्तुप्राप्तत्वात्कथन(त्वकथनात्?) वस्तुपरिच्छेदशून्यतोच्यते । अक्षयं कालपरिच्छेदशून्यं अजरं विकारशून्यम् ।; Cg: त्वामिति । सर्वसंग्रहं सर्वानुग्राहकम् । अक्षयं चाजरं तथेति च पाठः ।; Ct as in Cm. ❀

10 ^{a}) Ś B2 D8 पितामहस्य तच्छ्रुत्वा. —^{b}) D3 विचिंत्य च. Ñ2 मतिं ततः (for महामतिः). V2 B1.3.4 M6 बुद्ध्या संचिंत्य राघवः. —For 10^{ab}, V3 D1.2.3.5.9 subst.:

1496* पितामहस्य वचनाद्दिवं संप्रविवेश ह ।

[D5 वाक्यात्तद् (for वचनाद्). D2.9 इति (for दिवं). V3 समाविशत्स्वयं.]

—^{c}) V3 D1.4.5 दिव्यं तद्; D2.9 तद्दिव्यं (for विवेश). G1 वैष्णवीं. B1 देहं (for तेजः). Ś B2 D3.8.12 वैष्णवं प्राविशत्तेजः. —D9 om. 10^{d}. —^{d}) M5 स्वशरीरं. D7 M6.9 सहानुगः; Cm as in text (for °नुजः). D3 सशरीरः स राघवः. —After 10, V1 ins.:

1497* गतः स परमं स्थानं यत्र तिष्ठन्ति * * * ।

11 ^{a}) V3 D1.2.4.5.9 M1.7 विष्णुतनुं(M7 °पदं); B3.4 M6 विष्णुं गतं; D6.7.10.11 T3.4 G1 M3.5 Cm.t विष्णुमयं; M8 विष्णुगते. Ś B2 D3.8.12 शर्म; Ñ2 V1.3 D1.2.4.5.9 देवाः; M2 तेजः (for देवं). V2 ततो विष्णुं महात्मानम्; B1 ततोपि विष्णुमात्मानम् . —^{b}) V3 D1.4 पूजयंतः. Ñ2 V1.3 D1.2.4.5.9 सुरोत्तमाः (Ñ2 D9 °मं); G (ed.) सुरेश्वरं (for स्म देवताः). Ś V2 B D3.8.12 पूजयां(V2 B1 उपासां)चक्रिरे सुराः. —^{c}) V2 B1.3.4 D3 सर्वे (for चैव). —B1 om. from 11^{d} up to the prior half of 1498*. —^{d}) Ś D3.8 सोम- (for साग्नि-). M6 -पुरोधसः.

12 B1 om. 12 (cf. v.l. 11). —^{a}) V3 ते (for ये). V2 B3 सिद्धा; V3 D2.9 [आ]दित्याः; M6 दिष्ट्या (for दिव्या). Ś V2 B2-4 D3.8.12 मुनि-; M7 सुर- (for ऋषि-). —^{b}) T1 damaged from या: up to तत्स in 13^{c}. Ñ2 V2.3 B2-4 D1-5.9 तथा; V1 [s]पि च; D7 T4 च ये (for च याः). Ś D3.12 नारदाद्या(Ś1 रुद्राश्चैव) महर्षयः. —^{cd}) M4 दैत्या. M5 -मानव- (for -दानव-). M6 दैत्यदैवतदानवाः (for ^{d}). V2 नागा यक्षाः सुपर्णाश्च देवदानवपन्नगाः.

13 T1 damaged up to तत्स in ^{c} (cf. v.l. 12). —^{a}) D10.11 G3 पुष्टं; G2 M7-9 हृष्ट- (for हृष्टं). T2 M3.10 transp. हृष्टं and प्रमुदितं. —^{b}) D10.11 G3 सुसंपूर्ण-; M1 संप्रपूर्ण-; Cm as in text (for सर्वं पूर्ण-). —For 13^{ab}, Ś Ñ2 V B D1-5.8.9.12 T3.4 M6 G (ed.) subst.:

1498* सर्वे प्रहृष्टमुदिताः सर्वे पूर्णमनोरथाः ।

[B1 om. up to the prior half (cf. v.l. 11). Ś D8.12 परं च; V2 T3.4 हृष्टाः प्र-; V3 B3.4 D3 प्रहृष्टा (for प्रहृष्ट-). V1 D2.9 -वदनाः. Ñ2 B2 सर्वे प्रमुदिता हृष्टाः(B2 भूताः); G (ed.)

अथ विष्णुर्महातेजाः पितामहमुवाच ह ।
एषां लोकाञ्जनौघानां दातुमर्हसि सुव्रत ॥ १४

इमे हि सर्वे स्नेहान्मामनुयाता मनस्विनः ।
भक्ता भाजयितव्याश्च त्यक्तात्मानश्च मत्कृते ॥ १५

तच्छ्रुत्वा विष्णुवचनं ब्रह्मा लोकगुरुः प्रभुः ।
लोकान्सान्तानिकान्नाम यास्यन्तीमे समागताः ॥ १६

यच्च तिर्यग्गतं किंचिद्रामभेवानुचिन्तयत् ।
प्राणांस्त्यक्ष्यति भक्त्या वै संताने तु निवत्स्यति ।
सर्वैरेव गुणैर्युक्ते ब्रह्मलोकादनन्तरे ॥ १७

G. 7. 115. 19
B. 7. 110. 20
L. 7. 112. 20

सर्वे प्रहृष्टास्त्वरिताः (for the prior half). Ñ2 V2 B4 सुसं-; B1 ते सं-; B3 हृष्टाः (for सर्वे). D6 पूर्णा.]

—Then Ś V2 D8.12 cont.; while D3 ins. after 13:

1499* पूजयांचक्रिरे तत्र देवदेवं जनार्दनम् ।
[D3 जयं वै चक्रिरे.]

—[c]) Ś D3 सर्वे ते; Ñ2 V3 B3 D1–5.9.12 T3.4 M6 ते सर्वे; V1 तं प्राहुस्; V2 B1.3.4 [अ]भाषत; D10.11 G3 तैर्देवैस् (for तत्सर्वं). —[d]) M5 -किल्बिषं (for -कल्म°). Ś Ñ2 V1.3 B2 D1–5.8.9.12 T3.4 त्रिदिवस्था बभाषिरे; V2 B4 त्रिदिवे गत-कल्मषाः; B1.3 त्रिदिवे विगतज्वराः (B3 °क्लमाः); M6 त्रिदिवं प्रशशंसिरे.

14 [a]) B1.3 तथा; D3 स तु (for अथ). —[b]) B1.3 अभाषत; D4.11 उवाच (subm.) (for °च ह). —[c]) Ś V B2.3 D2.3.5–12 T2 G2 M7.8 Ct ए(V2 ते; D6.9 ये)षां लोकं; Ñ2 B1 लोकानेषां (by transp.); B3 स्थानमेषां; M1 एषां त्वं तु; M9 एषां जले (sic) (for एषां लोकाञ्). G (ed.) एषां स्थानं तु लोकानां. —[d]) D1 सुव्रतः. D3.5 स्वर्गं दातुं त्व (D5 स्वं दातु)मर्हसि.

15 [a]) G (ed.) एते. Ś B2 D1.4.5.8 M1 तु (for हि). —G3 illeg. from सर्वे up to 16[a]. Ś मे स्नेहाद्; V1 B2 D1.2.4.5.9.12 मत्स्नेहाद्; V3 D3 मां स्नेहाद् (by transp.); M2 देहान्माम् (for स्नेहान्माम्). G2 M10 (both with hiatus) इमे सर्वे महात्मानः. —T1 damaged from [b] up to त्य in [d]. —[b]) Ñ2 V2 (before corr. as in B4, after corr. m.) B1.3 अनुगच्छन्; V1 B4 D9 T3.4 °यांति (for अनुयाता). Ś V1.3 B2 D1.2.4.5.8.9.12 T3.4 हि (Ś V1 D8.12 च) मानवाः; D3.6.7.10 G1 M1.5 यशस्विनः; D11 तप°; Ck as in text (for मनस्विनः). M6 अनुगच्छंति देहिनः. —[c]) G1 M3.5 भक्त्या. Ñ2 V1 B2.3 D1.2.4.9 च भजि(V1 B3 °क्ति)-तव्याश्; V3 M3 च (M3 हि) भजनीयाश्; B4 चैवानुरक्ताश्; D3.5–7.10.11 G2 M9 हि भ(G2 M9 भा)जि°; T2 हि भाषि°; T3.4 G1 M5.8 सभाजि°; M1 भोजयितारश्; M6 हि तव भक्ताश् (for भाजयितव्याश्). D3 वै (for च). Ś D8.12 रक्ताश्च भक्तिमंतश्च; V2 भक्ता ये च परा नित्यं; B1 भक्ताश्च रामने शक्ताः; Ctp भक्ता हि भाषितव्या मे. —[d]) B1 मुक्तात्मानश्; M1 त्यक्त-मानाश्. Ś B2 D1.4.5.8.12 [स]थ सर्वशः; Ñ2 [स]थ मत्कृते; V3 यशस्विनः; M8 न मत्कृते (for च मत्कृते). V2 त्यक्ता ** इति कृते; M6 ***** मत्कृते. ❀ Ct: भक्ता अत एव मे भजितव्या भजनीयाः. ❀

16 G3 illeg. for [a] (cf. v.l. 15). M4 om. 16[ab]. —[a]) M8 तत्कृत्वा. V1.3 D1.2.4.5.9 विष्णुगदितं; T1.2 G2 M2.3.7 वचनं तस्य; M10 भाषितं तस्य (for विष्णुवचनं). —[b]) D4 ब्रह्म-. Ś B2 D3.8.12 वचनमब्रवीत्; Ñ2 V2 B1.3.4 वाक्यमुवाच ह; V1 (m. also as in V3) लोकपितामहः; V3 D1.2.4.5.9 M6 लोकेश्वरो (M6 °ककृद्)ब्रवीत्; G (ed.) वाक्य-मथाब्रवीत् (for लोकगुरुः प्रभुः). —After 16[ab], V1 ins.:

1500* सर्वलोकमयो येषां त्वं नाथो हि हृदि स्थितः ।

—[c]) Ñ2 V2 B लोकं; V1 तस्मात् (for लोकान्). Ñ2 V1.2 B संतानकं; V3 D2.7.11 M1.7 Ct संतानकान्; D1.4 सना-तनान्; D9.10 T1.2 G M5.8.9 संतानिकान्; M6 संतापजान्; Ck सांतानिकान् (as in text). V2 B1 D2 राम (for नाम). D5 लोकाः संतानिकानां मे. —[d]) Ñ2 यास्यंत्येते; V1 °ति हि (unmetric); V2 सर्वमेते; V3 प्रास्यंतीमे; B1.3 प्रयांत्येते; B2 D5 °स्यंत्येते; D1.4 यांत्येते सु-; M6 वसंत्वत्र (for यास्य-न्तीमे). Ñ2 B1–3 सुदुर्जयं; V B4 D1.2.4.5.9 M6 समाहिताः (for °गताः). G (ed.) यास्यंति सुसमाहिताः. —For 16[cd], Ś D3.8.11 subst.; while Ñ2 B2.3 ins. after 16[ab]:

1501* एवमेतन्महाबाहो यथा वदसि सुव्रत ।

17 G3 illeg. for [ab]. —[a]) G1 तिर्यग्गतिः; M2 तिर्यग्भवं. M7 जंतू (for किंचिद्). Ś V1.3 B1–3 D1–5.8.12 T3.4 M6 यश्च तिर्यग्गतोप्य (B3 °तो ह्य)त्र; Ñ2 V2 B4 तिर्यग्योनिगतोप्यत्र; D2 यश्च प्राणिगतो यत्र; D9 ययुश्च प्राणिनोप्यत्र. —[b]) Ñ2 B1 रामं त्वाम्; M1 धर्मं° (for राममेव). Ś D8.12 [अ]नुज-ग्मिवान्; V1.3 B D1.3–5.9 T3.4 M6 [अ]नुचिंतयन्; V2 विचिंतयन्; D6 [अ]नुचिंतयेत् (for °यत्). D2 (with hiatus) नाम मे अनुचिंतयेत्; T3 राम रामेति चिंतयन्. —[c]) D1.4 T3 त्यजति; D6 त्यक्त्वाति-. V1 D2.9 T3.4 वै भक्त्या (by transp.); V2 B1.3 D6.7 भक्त्या च; B2 D5 T2 M5.8 भक्तो वै; D1.4 धर्मात्मा; D10.11 G3 M4.10 भक्त्या तत्; M1 भक्तं वै (for भक्त्या वै). —[d]) B1 स (for तु). Ñ2 V2 B3.4 M6 स संताने; D6 T1 G2 सांता (G2 °ते)नेषु; D7.10.11 T2 G3 M1.5.7 संतानेषु; G1 M3 तत्संताने (for संताने तु). Ś B2 D3.8.12 स संतानेषु वत्स्यति; V1 शाश्वतं क्षणमश्नुयात्; V3 D1.2.4.5.9 T3.4 स संतानफलं (V3 T3.4 °गतिं) लभेत्. ❀ Cv: सन्ताने तु निवत्स्यतीति पाठः. ❀ —After 17[cd], V1 ins.:

1502* तस्मिन्कुले तु पुरुषा वानरा राक्षसास्तथा ।

—M6 om.; G2 reads [ef] twice. —[e]) D10.11 सर्वैर्ब्रह्म-;

G. 7. 115. 20
B. 7. 110. 20
L. 7. 112. 21

वानराश्च स्वकां योनिमृक्षाश्चैव तथा ययुः ॥ १८
येभ्यो विनिःसृता ये ये सुरादिभ्यः सुसंभवाः ।
ऋषिभ्यो नागयक्षेभ्यस्तांस्तानेव प्रपेदिरे ॥ १९

तथोक्तवति देवेशे गोप्रतारमुपागताः ।
भेजिरे सरयूं सर्वे हर्षपूर्णाश्चविक्लवाः ॥ २०

M1 सर्वे एव. Ś D8.12 सर्वे संतानका नाम; Ñ2 * * * * न वा वासा (illeg.); V1.3 D2.3.9 T3.4 सर्वे संतान(D2 °नि)कं याता(V1 D3 नाम; T3.4 यांतु); V2 B एवं(B2 °ष) संतानके वासो(B3 राम; B4 वासं); D1.4.5 सर्वे सां(D5 सं) तानिकान्याता. —f) Ś V B1.2.4 D2.3.5.8.9.12 T3.4 अनंतरं; D1.4 °शात् (for अनन्तरे). M1 ब्रह्मलोके निरंतरे. —After 17ef, Ś B2 D2.8.12 ins. :

1503* निवत्स्यन्ति महात्मानो ये त्वां भक्ता जनार्दन ।
[B2 त्वद्- (for त्वां).]

—Then B2 cont.; while Ñ2 V2 B1.3.4 ins. after 17ef :

1504* कीर्तिर्यावच्च रामस्य तावदेषां भविष्यति ।
[B4 कथा (for कीर्तिर्). B3 तेषां (for एषां).]

18 M3 reads 18a–19 (including 1506*) after 23. —ab) Ś2.3 D8.12 स्वका येपि; B1 वियोनित्वम्; B2 [अ]पि स्वां योनिं; B3 [ए]व सुनयः; K (ed.) Ct स्विकां योनिम्; Cm as in text (for स्वकां योनिम्). Ś1 * * * श्च स्वकान्यांश्च (for a). V3 [ए]वाभिसं-; G1 M5 [ए]तत्त(M5 °द्य) था (for [ए]व तथा). Ś B2 D1–5.8.9.12 राक्षसाश्चापि संययुः (Ś D8.12 °युगे); Ñ2 B4 सहिता ऋक्षराक्षसैः; V2 B1.3 ऋक्षराक्षसजातयः; M6 ऋक्षराक्षांसि चाययुः (for b). V1 स्वां स्वां योनिं प्रवेक्ष्यंति राक्षसा वानरादयः. ❀ Cv : ययुः प्रतिपेदिर इति भविष्यति भूते निर्देशः; Cm.t : अत्र ययुः पतिपेदिर इति भूतनिर्देशस्तु(Ct : निर्देशः) भविष्यदर्थः; Ck missing. ❀ —After 18, Ñ2 V2 B1.3 ins. :

1505* तिर्यग्योनिं समुत्सृज्य यान्तु पूर्वां स्वकां तनूम् ।
[Ñ2 V2 यांति (for यान्तु). Ñ2 B3 तनुं.]

19 M3 reads 18–19 (including 1506*) after 23. V2 B1.3 transp. ab and cd. G3 M4 partly damaged for a. —a) D3.5 तेभ्यो. V2 विनिष्कृता; D2.9 T1–3 G2 M1 विनिसृताः. Ñ2 B4 D6.7.10.11 T G2 M3 सर्वे; V1.3 B2 D1.3–5 ये वै; V2 B1.3 ह्येते; D2.9 ते वै (for ये ये). Ś D8.12 येस्माद्वि(D12 यस्मिन्वि)निहतास्ते वै. —b) D6 स्वयंप्रभाः; D7 T3.4 M2.7 स्वसंभवाः; G1 सुसंभृताः; M4 स्वयंभुवा (sic); M5 ससंभ्रमाः (for सुसंभवाः). Ś1 Ñ2 V3 B3.4 D2.8.9.12 सुरासुर(D9 °* *)समुद्भवाः; Ś2.3 स्व स्व(Ś2 * *)योनिसमुद्भवाः; V1 B2 D1.3–5 M3 सुरा(V1 D1.4 °राः)सुरतनूद्भवाः; V2 B1 देवदानवविक्रमाः(B1 °क्रियाः); D10.11 Ck.t सुरेभ्यः सुरसंभवाः. —After 19ab, Ś V1.3 B2 D T3.4 ins.; while Ñ2 ins. after 23; G1 M3 ins. after 19:

1506* आदित्यतनयश्चैव सुग्रीवः सूर्यमण्डलम् ।
[D1.4 आदित्यमगमच्चैव; D6.7.10.11 T3.4 तेषु प्रविविशुश्चै(D10.11 °शे चै)व; G1 तेषु च प्रविशत्स्वेव; M3 विशत्सु तेषु वै स्वांशं (for the prior half). Ś2 * * मंडलं; M3 वानराधिपः (for सूर्यमण्डलम्).].

—After 19ab, Ñ2 ins. :

1507* ऋषि* * * * * * * * * प्रयान्तु वै ।

—After 19ab, V2 B1.3 G (ed.) ins. :

1508* ते श्रयिष्यन्ति तानेव देवसिद्धर्षिचारणान् ।
[V2 * * गच्छंति (for ते श्रयिष्यन्ति). V2 देवर्षिसिद्धचारणान्; G (ed.) स्वर्गे देवर्षिसेविते (for the post. half).]

—c) B1.3 सर्वेभ्यो (for ऋषिभ्यो). V3 ऋषयो नागयक्षांश्च. —d) V2 B4 स्थानं ते च; M1 तांस्तेनैव (for तांस्तानेव). B1 स्वस्थानं प्राप्नुवंतु च; B3 तामेव प्रामुवंति च; M6.7 तानेवप्रतिपेदिरे. —For 19cd, Ś V1 B2 D1–5.8.9.12 L (ed.) subst.; while Ñ2 subst. and reads (preceded by 1506*) after 23 :

1509* ऋषीन्नागांश्च यक्षांश्च तांस्तांस्ते प्रतिपेदिरे ।
[D1–5.9 च नाग- (for नागांश्च). V1 ऋषयश्च ऋषींश्चैव (for the prior half). V1 ते सर्वे; D1.4 तान्सर्वे; D2.9 तान्सर्वान् (for तांस्तांस्ते). L (ed.) प्रपेदिरे (subm.). B2 तां तां योनिं प्रपेदिरे; D3.5 तांस्तान्सर्वान्प्रपेदिरे (for the post. half).]
—For 19cd, D6.7.10.11 T3.4 subst.; while G1 M3 cont. after 1506* :

1510* पश्यतां सर्वदेवानां स्वान्पितॄन्प्रतिपेदिरे ।
[D6.7 T3.4 G1 स्वां मूर्तिं. G1 प्रत्युपेयिवान् (for प्रतिपेदिरे). M3 प्राप सूर्यं त्रयीतनुं (for the post. half).]

20 a) Ś2.3 राघवस्तत्र; V1.3 D6.7.10.11 G1 M4.5 तथा (V3 °तो) ब्रुवतिः B3 तच्चोक्त° (for तथोक्तवति). Ś3 D2.4 देवेश. —b) Ś3 सप्रतारम्; B1 गोप्रचा°; D1.4 नदीती°; T3 यो यो रामम्; T4 यो यां योनिम् (for गोप्रतारम्). Ś Ñ2 V3 B4 D2.8.9.12 T3.4 उपागमत्(Ś1 B4 D8.9 °न्); V1.2 B1.3 D1.4.5 उपागतः(V2 B1.3 °तं); B2 अवाचरन् (for °गताः). D3 तस्य ब्रह्मणः संनिधौ (unmetric); M5 गोप्रतारामुपागतां. —After 20ab, V2 ins. :

1511* तानेव देवसिद्धर्षिदेवगन्धर्वचारणान् ।
—Ñ2 illeg. for c. —c) M4 damaged for भेजिरे. —d) Ñ2 °र्णमनोरथाः; D7 °र्णास्त्वविक्लवाः; M5 °र्णा ह्यविक्लवाः. —For 20cd, Ś V B D1–5.8.9.12 T3.4 subst. :

1512* स सर्वैः सरयूं भेजे हर्षविस्फुरितेक्षणः ।
[V1.3 D1–5.9 T4 स जनः; V2 B2.3 ते सर्वे; B1.4 तत्सर्वं; T3

अवगाह्य जलं यो यः प्राणी ह्यासीत्प्रहृष्टवत् ।
मानुषं देहमुत्सृज्य विमानं सोऽध्यरोहत ॥ २१
तिर्यग्योनिगताश्चापि संप्राप्ताः सरयूजलम् ।
दिव्या दिव्येन वपुषा देवा दीप्ता इवाभवन् ॥ २२
गत्वा तु सरयूतोयं स्थावराणि चराणि च ।
प्राप्य तत्तोयविक्लेदं देवलोकमुपागमन् ॥ २३
देवानां यस्य या योनिर्वानरा ऋक्षराक्षसाः ।
तामेव विविशुः सर्वे देहान्निक्षिप्य चाम्भसि ॥ २४
तथा स्वर्गगतं सर्वं कृत्वा लोकगुरुर्दिवम् ।
जगाम त्रिदशैः सार्धं हृष्टैर्हृष्टो महामतिः ॥ २५

G. 7. 115. 28
B. 7. 110. 28
L. 7. 112. 28

समनः (for स सर्वः). V2 B2 मेजुर्; B3 (sic) D2 लेमे (for भेजे). D3 -विस्फारित-. B3 -[ई]क्षणाः. V1 D1.4.5.9 प(D5.9 वा)रिपूर्णमविक्लवः (V1 °वां); V2 हर्षप्राणा*न्तेजसा; V3 T3.4 °पूर्णस्त्व(V3 °र्णोत्थ)विक्लवः; B1 °पूर्णेन चेतसा; B3.4 °पूर्वमविक्लवं; D2 वारिपूर्णमिव प्लवः (for the post. half).]

21 Ñ2 reads 21^{ab} twice. —^{a}) D11 अथ गाह्य. Ś D8.12 ततः पूतः; Ñ2 (second time as in V2) B1 [अ]-भवत्पू(Ñ2 °त्प्री)तो; V1.3 B2 D2.3.5.9 T3.4 जलं(B2 ततः) सर्वे; V2 B3.4 ततो यो यो; D1.4 जनः सर्वः; D6.7 G1 M5 [आ]शु सर्वे वै; D10.11 [अ]प्सु यो यो वै; G2 M2 [आ]शु सरयूं (for जलं यो यः). —^{b}) M6 भवति (for ह्यासीत्प्र-). Ś V1.3 D T3.4 G1 M5.7 प्राणांस्त्यक्त्वा प्र(Ś D8.12 °क्त्वाति; V1 D1.3.4 °क्त्वा च; D2.9 °क्त्वाथ; M7 °जति)हृष्टवत्; Ñ2 (second time as in B4) हृष्टवत्सलिलं ततः; V2 B3.4 जले मज्ज(V2 तिष्ठ)ति हृष्टवत्; B1 G (ed.) यो यस्तत्सलिलं ततः (B1 °था); B2 विविशुर्जलमादरात्. —After 21^{ab}, V2 ins. :

1513* मानुषं देह* * * * * * *मनोहरैः ।

—Ñ2 illeg. for °^{d}. —^{c}) V1 स्वं स्वं देहं समुत्सृज्य; V2 देहमुत्सृज्य विमलं. —^{d}) Ś V2 B4 D8.12 अ(V2 सो)धिरोहति; V1 चाध्यरोहयत्; B1.3 चारुरोह सः (for सोऽध्यरोहत). V3 D1–7.9 T3.4 G1 M5 ते(V3 D6.7 T3 स्व)विमानान्यथा (V3 °न्युपा)रुहन्; B2 ते विमानान्यरोहयन्. ❀ Ct : अथ यो यः प्राणी तदा सरयूजलमवगाह्य हृष्टवद्धृष्ट आसीत्स मानुषं देहमुत्सृज्य विमानमध्यरोहत. ❀

22 ^{a}) V3 D1.4 -गति-; D2.9 -योनौ; D5.6 -योनिं. Ś V3 B1–3 D1.4.7.8.10–12 T3.4 -गतानां च; Ñ2 V2 B4 G2 M6.10 °श्चैव; V1 D2.3.5.9 °ता ये च(D2.9 वै) (for -गताश्चापि). —^{b}) Ś V3 B2 D8.12 सत्त्वानां; Ñ2 V2 B4 ये सत्त्वाः; V1 ये गताः; B1.3 सर्वेषां; D1.4.7.10.11 T3.4 Ct शतानि; D2.3.5 प्रविश्य; G1 M5 भूतानि (for संप्राप्ताः). Ñ2 V2 B M6 सरयूजले; V1 D6.7 T3 G1 M5 °यूं तदा; V3 D1–5.9 T4 °यूं तथा. —Ñ2 om. 22^{c}–23^{b}. —^{cd}) B2 D6 G2 M8.10 दिव्यं; T3 दिव्यां; M3 दीप्ता (for दिव्या). Ś D8.12 दिव्येन वपुषा तत्र (for ^{c}). D7 देवदीप्ता; M3 दिव्या देवा (for देवा दीप्ता). Ś B2 D8.12 भास्करस्योदयं प्रति; M6 दीप्तदेवसमाभवन् (for ^{d}). V2 B1.3.4 दिव्यं वपुः समभवद्भास्करस्येव संपदा. —For 22^{cd}, V1.3 D1–6.9 T3.4 G1 M5 subst.; while D7.10.11 Ct ins. after 22^{ab} :

1514* संप्रविश्य दिवं जग्मुः प्रभासुरवपूंषि च ।

[V1 ते प्रविश्य; D2.3.5.9 देहत्यागाद् (for संप्रविश्य). D10.11 संप्राप्य त्रिदिवं. V1 D4.10.11 तु; D6.7 ते (for च). V3 सुरतेजोविभूषिताः; D3.5 तदा रामप्रसादतः; D9 प्रभावंति वपूंषि च (for the post. half).]

23 Ñ2 om. 23^{ab} (cf. v.l. 22). —^{a}) D11 -तोये; M1–4.7.10 -तीरं; Ct as in text (for -तोयं). Ś V2 B D8.12 जंगमानि च(B3 सजंगमानि) सत्त्वानि(V2 before corr. °र्वाणि); V1.3 D1–5.9 T3.4 G1 M5 तथान्यानि च सत्त्वानि(T3 °र्वाणि); M6 अत्यद्भुतानि सर्वाणि. —^{b}) B1 तथैव; B2 च यानि (for चराणि). B3 तथैव स्थावराणि च. —V2 transp. 23^{cd} and 24^{ab}. —^{c}) B1 तं तोय-. Ś B2 D8.11 -विक्षेपं (for -विक्लेदं). V1 प्राप्य यत्रादनशनं; V3 D1–5.9 T2–4 G1 M5 प्राप्य तत्तोयममलं(T2 °क्लीबं; T3 °नघं); B3 तं तोयक्लेदिताः संतः; G2 त्यक्त्वा शरीरं पूर्वं तु; Ct as in text. —^{d}) V2 B1.3 स्वर्गलोकम्. T3.4 उपागताः; M6 अथागमन् (for उपागमन्). ❀ Cg : तत्तोयविक्लेदं तत्तोयसेचनम्. ❀ —After 23, Ñ2 reads. 1506* followed by 1509*; while M3 reads 18–19 (including 1506*).

24 V2 transp. 23^{cd} and 24^{ab}. —^{ab}) Ś B2 D8.12 सुराणां समयं कृत्वा; Ñ2 V2 B4 असुरा यातुधानाश्च; V3 D10.11 तस्मिन्येपि समाप(V3 °त्र समुत्प)न्नाः; B1 स्वैः स्वैश्चाभ्युत्थितैः सार्धं; B3 स्वैः स्वैरंगैः समायाता; D1–5.9 तस्मिंस्तत्र तु(D5 च) संनादे; D6.7 K (ed.) Ct तस्मिंस्ते (K [ed.] °स्मिन्न)पि समापन्नाः; T3.4 ये च तत्र समापन्नाः; G (ed.) नानामुखैः समायाता (for ^{a}). D1–3.5 M3 सर्क्ष-; D4 M1.6.7.10 सर्व-; D9 यक्ष-; M4 सह- (for ऋक्ष-). Ś V2.3 B1–3 D6–8.10–12 T3.4 G1 M5 ऋक्षवानरराक्षसाः (Ś D8.12 °रक्षसां); Ñ2 B4 वानरा राक्षसैः सह (for ^{b}). V1 ऋक्षाश्च वानराश्चैव राक्षसाश्च महाबलाः. —Ś1 om. 24^{c}–25. —^{c}) Ś2.3 V3 B2 D1–5.7–9.12 T3.4 तेपि प्र-; V1 दिवं प्र-; V2 स्वान्वै *; B1.3.4 स्वानेव; D6 स्वां योनिं (for तामेव). Ñ2 सह यानैश्च विविशुः सर्वे (hypm.); D10.11 तेपि स्वर्गं प्रविविशुः. —^{d}) G M1.5.10 देहं. B3 विक्षिप्य. V2 B1.3 तेंभसि; V3 तज्जले (for चाम्भसि). Ś2.3 B2 D8.12 भक्त्या रामस्य तज्जलं; V1 सार्धं रामस्य तत्त्वतः; D1–5.9 देहानाक्षिप्य(D9 °च्छिद्य) वै तदा(D6 तत्र वै).

25 Ś1 om. 25 (cf. v.l. 24). —^{ab}) M10 ततः (for तथा). B1 कृत्वा (for सर्वं). B4 दृष्ट्वा (for कृत्वा). B4 जनं; G2 M10 स्वयं; M3 स्वकं (for दिवम्). B1 रामं सर्वमनुत्तमं; B3 कृत्वा लोकगुरुं हरिं (for ^{b}). Ñ2 V2 G (ed.) तथा

स्वर्गगतिं कृत्वा रामः सर्वामनुत्तमां(G [ed.] °र्वसुरोत्तमः); V1.3 B2 D1–5.8.9.12 ततः(V1 °था) स्वर्गं(D2 समा)गताः सर्वे स्मृ(V1 न)त्वा लोकगुरुं वि(D2 प्र)भुं. —After 25^{ab}, V1.2 D2 ins. :

1515* एवं रामो महाभागो भ्रातृभ्यां सह राघवः ।

[V1 जगाम च (for एवं रामो). V1 महाबाहो and भ्रातृभिः.]; while D3.5 ins. after 25^{ab} :

1516* इदं हि वेदैः संमितं पवित्रमिदमुत्तमम् ।
श्रुत्वा रामायणं सर्वं सर्वपापैः प्रमुच्यते ।
वासोभिर्भूषणै रत्नैः श्रुत्वा यत्नेन पूजयेत् ।
न पूजयति यो मोहात्काव्यं निरवशेषतः ।
ब्रह्महेत्यभिधीयेत सतां मार्गाद्बहिष्कृतः । [5]

[(l. 3) D3 [अं]ते च (subm.) (for यत्नेन).]

—V1.3 D1.3–5.8.12 om. 25^{cd}. —^{cd}) B1 D2 M8 त्रिदिवैः. Ñ2 V2 B1–3 संप्रहृष्टो; D2.9 हृष्टपुष्टो; M10 हृष्टो हृष्टैर् (by transp.). Ñ2 V2 B4 महायशाः; M3 परं पदं; M10 महात्मभिः (for महामतिः). T1 हृष्टो* * * *मतिः(damaged); K(ed.) सदा हृष्टैर्दिवं महत् (for ^{d}). M6 ब्रह्मलोकं ययौ ब्रह्मा सार्धं त्रिदशपुंगवैः. —For 25, Ś2.3 subst. :

1517* तेषु स्वर्गं प्रविष्टेषु ब्रह्मलोकमगात्स्वकम् ।

[Ś3 ततः (for तेषु) and lacuna from प्र up to the post. half.];

while D6.7.10.11 T3.4 G1 M5 subst. for 25 :

1518* ततः समागतान्सर्वान्स्थाप्य लोकगुरुर्दिवि ।
हृष्टैः प्रमुदितैर्देवैर्जगाम त्रिदिवं महत् ।

[(l. 1) T3 प्राप्य (for स्थाप्य). T4 देव° (for लोक°). D6 दिवं. —(l. 2) T3 सर्वैर् (for देवैर्). T3.4 G1 M5 स्वपदं; Ct as above (for त्रिदिवं).]

—After 25, Ñ2 V2 B1–3 M10 ins.; D5 ins. after l. 3 of 1534*; D6.7.10.11 T1.2 G2.3 ins. after 26; G1 cont. l. 1 after 1518* and l. 3–4 after l. 8 of 1530*; M1.2 ins. l. 1 after 25 and l. 2–4 after 26; M3 ins. l. 1–2 after 25 and l. 3–4 after 26; M5 cont. after l. 8 of 1530* :

1519* ततः प्रतिष्ठितो विष्णुः स्वर्गलोके यथा पुरा ।
येन व्याप्तमिदं सर्वं त्रैलोक्यं सचराचरम् ।
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
नित्यं शृण्वन्ति संहृष्टाः काव्यं रामायणं दिवि ।

[M5 om. l. 1–2. D5 om. l. 1. —(l. 1) V2 एत* * * * (for ततः प्रतिष्ठितो). B1 T2 स्वर्गलोकं; G2 विष्णुलोके; M1 तस्य लोके. T2 G2.3 M1.10 पुरं (for पुरा). —(l. 2) D5 तेन लोकाश्च देवाश्च (for the prior half). M1 विष्णोश्चरितमद्भुतं (for the post. half). —After l. 2, D5 ins. :

1519(A)* पूजितं तेन येनेह श्रुतं रामायणं शुभम् ।

—M1 om. l. 3–4. —(l. 3) G1 M5 एतदेवाः; M3 सर्वे देवाः; G (ed.) ततो भूताः. D6 सत्- (for च). Ñ2 B3 ससिद्धाः सा (Ñ2 °द्धाश्चा)प्सरोगणाः; V2 B1.2 सिद्धाश्चाप्सरसां गणाः (for the post. half). —(l. 4) K (ed.) संतुष्टा. Ñ2 B1–3 नित्यशः श्रावयंतीदं(B2 °ह) (for the prior half). K (ed.) दिव्यं (for काव्यं). V2 नारायणं. Ñ2 V2 B1–3 शुभं; M5 परं (for दिवि).]

—Then B1–3 G (ed.) cont.; while V2 ins. l. 1–4 only after l. 5 of 1527* :

1520* स यत्र राघवस्तत्र देवा यक्षाः सवानराः ।
ऋषयश्च महाभागा अशृण्वन्वैष्णवं स्तवम् ।
विष्णोः प्रियमिदं नित्यं पुष्कराक्षस्य धीमतः ।
शृणुयात्पुण्यवान्मर्त्यः काव्यं वाल्मीकिना कृतम् ।
य इदं शृणुयान्नित्यं नाशयणपरायणः । [5]
विष्णुना सह नाके तु मोदते नात्र संशयः ।
य इदं सर्वदा सर्वं पुण्यं पुण्यं पठेन्नरः ।
स शुचिः स विशुद्धात्मा पुत्रवान्पशुमान्भवेत् ।

[(l. 1) B1 सपुत्रा राघवास्तत्र; B2 सपुत्रबांधवास्ते तु (for the prior half). B2 देव- (for देवा). G (ed.) सपरमर्षयः. V2 सपुत्रं राघवं ते च देवसिद्धाः सचारणाः. —(l. 2) G (ed.) यक्षाश्चैव (for ऋषयश्च). —(l. 3) V2 B2 विष्णु-. V2 दिव्यं (for नित्य). —(l. 4) V2 B1 श्राव्यंते(B1 शृण्वंति) नित्यमुष्मांते; B3 शृण्वंति नित्यं श्रुत्वा च (for the prior half). B1 वाल्मीकिभाषितं. —After l. 4, B2 ins. :

1520(A)* एतदाख्यानमव्यग्रः सभविष्योत्तरं द्विजः ।

—Thereafter, B2 cont. 1536* and then further cont. :

1520(B)* य इदं शृणुयान्नित्यं भक्त्या परमया युतः ।
अश्वमेधफलं प्राप्य विष्णुलोकमवाप्नुयात् ।
य इदं शृणुयान्नित्यं श्लोकार्धं श्लोकमेव वा
अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ।

—B3 ins. after l. 4 :

1520(C)* सायं प्रातस्तथा मर्त्यः शुचिर्भूत्वा समाहितः ।
शृणोति श्रद्धया यस्य तस्य विष्णुः प्रसीदति ।
हिरण्यं रजतं वस्त्रं कुप्यं च तुरगान्क्षितिम् ।
दद्यात्क्रमेण काण्डेषु सद्यः सुश्रद्धयान्वितः ।

—G (ed.) om. l. 5–8. —(l. 5) B1 श्रुत्वा तु चरितं विष्णोर् (for the prior half). —(l. 6) B1 सह लोके तु; B2 स सर्वं लोके. —(l. 7) B1 धन्यं; B2 धर्म्यं (for first पुण्यं). —(l. 8) B1 सर्वभूतेषु; B2 सर्वधर्मात्मा (for स विशुद्धात्मा). B2 अर्थवान् (for पशुमान्). B1 प्राप्नोति महतीं श्रियं (for the post. half).]

—After 1519*, M5 cont. :

1521* कृतं वाल्मीकिना पुण्यं कृतकृत्येन धीमता ।
श्रुत्वा रामायणं काव्यं किं किं न लभते नरः ।

—M5 further cont. l. 3–5 only, D5–7.10.11 T1.2 G1.3 M1–3 cont. after 1519*; V2 cont. only l. 5–6, 9–10

Arya Research Team

after 1524*; Ñ2 B4 cont. only l. 9–10 after 1527*; B1 cont. only l. 5–6 after 1529*; B3 ins. only l. 4–6 after 26^{ab} (first occurrence) and cont. l. 9–10 after 1527*; T4 cont. only l. 4–6 after 1530*; G2 cont. l. 1–3 after 1519* and ins. l. 4–6, 9–10 after 26 (second occurrence); M4.7.8 ins. only l. 4–5 after 26; M6 ins. only l. 4–6, 9–10 after 26^{ab}; M8 ins. only l. 4–5 after 26^{ab}; M10 cont. l. 1–3 after 1519* and ins. l. 4–10 (om. l. 7–8) after 26:

1522* इदमाख्यानमायुष्यं सौभाग्यं पापनाशनम्।
रामायणं वेदसमं श्राद्धेषु श्रावयेद्बुधः।
अपुत्रो लभते पुत्रमधनो लभते धनम्।
सर्वपापैः प्रमुच्येत पादमप्यस्य यः पठेत्।
पापान्यपि च यः कुर्याददन्यदिनि मानवः। [5]
पठत्येकमपि श्लोकं पापात्स परिमुच्यते।
वाचकाय च दातव्यं वस्त्रं धेनुर्हिरण्यकम्।
वाचके परितुष्टे तु तुष्टाः स्युः सर्वदेवताः।
एतदाख्यानमायुष्यं पठन्रामायणं नरः।
सपुत्रपौत्रो लोकेऽस्मिन्प्रेत्य चेह महीयते। [10]

[M1 om. l. 1.—(l. 2) D6.8 T1.2 G1 वेदसंज्ञं (T2 damaged from ज्ञं up to व in the post. half); D7 देवसंज्ञं; G2 वेदमिश्रं; G3 देव° (for वेदसमं). D10 (m.) शृणुयाच्; M1 बुधेषु (for श्राद्धेषु).—After l. 2, T1 M3 B (ed. within brackets) K (ed., within brackets and second time ins. after 1541*) ins.:

1522(A)* गायत्र्याश्च स्वरूपं तद्रामायणमनुत्तमम्।;

while G2 M10 ins. after l. 2:

1522(B)* सपुत्रपौत्रः पितृभिर्वैकुण्ठं सह गच्छति।

—D11 transp. l. 3 and l. 4.—B (ed.) K (ed.) repeats l. 3–4 (preceded by 1522(A)* and followed by l. 7–10 of 1530*) after 1541*.—After l. 3, G2 M10 ins.:

1522(C)* विद्यार्थी लभते विद्यां प्रजार्थी चाप्नुयात्प्रजाम्।

—(l. 4) T4 M6 पापात्स परि- (for सर्वपापैः प्र-).—D5 om. (hapl.?) from the post. half up to l. 6. T1 M3.9 पदम्. M1 अर्धस्य (for अप्यस्य).—T2 damaged from यः up to the prior half of l. 5. B3 न पादं प्रभवेत्तस्य योस्य पादमपि स्मरेत्.—M6 reads l. 5–6 after l. 10.—(l. 5) V2 B1 चैव (for [अ]पि च). B3 बहु; T4 सदा (for च यः). G2 M2.10 पापानां निचयं. T1 G1.2 M1–5.7–10 (except M6 all with hiatus) कृत्वा; T4 कुर्वन् (for कुर्याद्). G3 प्रणश्यंति. G3 कृतानि; M5 ह्य° (for first अहनि).—(l. 6) B3 M1 पठन्; G2 M10 पठेद् (for पठति). G1 M5 पठ्यते कमपि. M1 स पापात् (by transp.); M4 पापात्सं-. M3.10 सपदि; M7 सर्वात्प्र- (for स परि-). B3 T4 सोपि (B3 तस्मात्) पापात्प्रमुच्यते (for the post. half). B1 पठनादेव चैवास्य सर्वपापात्प्रमुच्यते.—After l. 6, V2 ins. l. 17–39 of 1527*; while B3 ins.:

1522(D)* पठन्रामायणं चाद्यं नरः स्वर्गतिमाप्नुयात्।

—After l. 6, D5 (after the prior half of l. 4 owing to om.).7 ins.:

1522(E)* रामायणे श्रुते पश्चाद्रथं हेममयं सुधीः।
चतुर्भिर्वाजिभिर्युक्तं तथा क्षौमपताकया।
रत्नैश्च विविधैर्युक्तं किङ्किणीनादनादितम्।
संपादिते रथे सम्यग्धेनुं दद्यात्पयस्विनीम्।
ब्राह्मणान्भोजयेत्पश्चाच्छतमष्टोत्तरं सुधीः।; [5]

while G1 M5 ins. l. 9–10 of 1530* (followed by l. 27–29, 33–36 [G1 l. 27–33]) of 1543*.—After l. 6, M1 ins.:

1522(F)* पुत्रकामो लभेत्पुत्रं धनकामो लभेद्धनम्।

—G1 om. l. 7–10. G3 M1–3 om. l. 7–8.—(l. 10) Ñ2 V2 B3.4 त्रिदिवे; M2 सुराः (for लोकेऽस्मिन्). T1.2 G2.3 M1.2.4.7–10 चापि; M3 स्वर्गे (for चेह). Ñ2 V2 B3.4 च मोदते (for महीयते).—For l. 7–10, M5 subst.:

1522(G)* वाचकस्यापि शक्त्या वै श्रद्धया वाससोयुगं वसु।
माणिक्यं कटकं वापि भूमिं धेनुं च यत्नतः।
तेन प्रीतो हरिर्विष्णुरात्मसायुज्यमानयेत्।
इदं पुण्यमिदं पुण्यमित्युक्त्वा च प्रजापतिः।
श्रावयेद्धारयेन्नित्यं यथाशक्ति नरः सदा। [5]
शृण्वन्रामायणं * * यः पादं पदमेव वा।
स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा।

—Then D10 further cont.; V2 B3.4 cont. after 1538*:

1523* रामायणं गोविसर्गे मध्याह्ने वा समाहितः।
सायाह्ने वापराह्णे च वाचयन्नावसीदति।
गवां शतं सकलकामदुघां च यो दद-
द्दिने दिने कांस्यसुदोहनानाम्।
तदाप्नुयाद्विगतभयो बहुश्रुतः [5]
प्रकीर्तयन्दशरथपुत्रसंभवम्।

[(l. 1) V2 च; B4 सु- (for वा).—(l. 2) V2 B4 संध्यायाम् (for सायाह्ने वा). B3 D10 वा (for च). V2 नावसीदति मानवः (for the post. half).—(l. 3) V2 B4 -ऋणिनां ददद्.—(l. 4) V2 B4 फलमिहकांस्यदोहिनां (V2 °सुदोहिनीनां).—(l. 6) V2 B4 पठेत्तु यो (for प्रकीर्तयन्). V2 -संस्तवं (for -संभवम्).—Then B4 ins. दशरथपुत्रसंभवमिति ॐ तत्सत्॥];—After 1522*, V2 cont. 1536*; while Ñ2 ins. an illeg. line; B1.4 D5 (first time also as in Ś).6.7.10.11 T1.2.4 G2.3 M1.2.3 (after l. 2 of 1519*).4–10 cont.; while Ś V1 B2.3 (reads twice) D1–4.8.9.12 cont. after 1525*; Ñ2 V2 ins. after l. 8 of 1527*:

G. 7. 115. 0
B. 7. 111. 1
L. 7. 112. 29

एतावदेव आख्यानं सोत्तरं ब्रह्मपूजितम् । | रामायणमिति ख्यातं मुख्यं वाल्मीकिना कृतम् ॥ २६

इति श्रीरामायणे उत्तरकाण्डे शततमः सर्गः ॥ १०० ॥

॥ समाप्तं उत्तरकाण्डम् ॥

1524* अयोध्यापि पुरी रम्या शून्या वर्षगणान्बहून् ।
ऋषभं प्राप्य राजानं निवासमुपयास्यति ।
एतदाख्यानमायुष्यं सभविष्यं सहोत्तरम् ।

[Ñ2 illeg. for the prior half. —(l. 1) B3(second time) अयोध्या च; G2 M अथायोध्या. Ś B2 D1–4.5(first time).6.8.9.12 T4 नगरी (for [अ]पि पुरी). V1 B3 शून्या; M5 पुण्या (for रम्या). Ś B2 D8.12 -गणानि च(B2 D12 तु); B1 -गणांस्तु या; D1.4 -शतानि तु; D2.9 -शतान्यपि; D3.5 (first time)-[अ]युतानि वै (for -गणान्बहून्). Ñ2 V2 सर्वशून्यामवत्तदा; V1 B3 बहून्वर्षगणांस्तदा (for the post. half). —B1 illeg. for l. 2. —(l. 2) Ś D1.3.4.5(first time).8.12 T4 भविता तु कुशे(D1.4 T4 ऋषभे; D3.5 वृषभे) प्राप्य (for the prior half). Ś V1 B2.4 D1.4.8.12 T4 निवेशम्; V2 B3(second time) आ(B3 प्र)वासम्; B3(first time)दिव्यं सम्-; D2 निदेशम्; D3.5 (first time) विशेषम्; D9 विवेशम् (for निवासम्). Ś1 D2.4.12 -लप्स्यते; Ś2.3 D8.9 -लभ्यते; D1.3.5 (first time)-लिप्यते; T4 -लक्ष्यते (for -यास्यति). M5 राजधानी भविष्यति (for the post. half). —After l. 2, M3 ins.:

1524(A)* एतद्रामायणं कृत्स्नं नादरं कुरुते नरः ।
स प्रेत्य रौरवे घोरे पच्यते नात्र संशयः ।
यं यं कामयते कामं शृण्वन्रामायणं नरः ।
तं तं नियतमाप्नोति राघवस्य प्रसादतः ।

—B3 ins. l. 3 only third time after l. 8 of 1527*; B4 repeats l. 3 only after 1525*. D2.9 repeat l. 3 after 1532*. —(l. 3) Ś D1.3.4.5(first time).8.12 M5 इदम् (for एतद्). Ñ2 V2 B3(second and third times).4 D2.9 (B4 D2.9 second time) T4 M1.3 अव्यग्रे(B3[first time] D9 M1 °ग्रः); B1 अमृतं (for आयुष्यं). D3.5 (first time) आख्यानमाधुर्यम्. —Ñ2 illeg. for the post. half. Ś D8.12 रामाख्यं सोत्तरं स्मृतं; V1 B2 शुभार्थं(B2 सौभाग्यं) सोत्तरं शुभं; V2 B3(all times).4 (both times) D2.9 (both second time) सभविष्योत्तरं द्विजः; B1 पावनं सोत्तरं द्विजः; D1.4 संभाष्यं चोत्तरं शुभं; D3.5 (first time) इदं चैवोत्तरं शुभं (for the post. half). D2.9 (both first time) इदमायुष्यमाख्यानं शुभाख्यं चोत्तरं शुभं.]

—Then D5–7.10.11 T1.2 G2.3 M1–4.7.9.10 B(ed.) K(ed.) cont. 1539*; while T4 cont. 1531*.

—After 1522*, M3 cont. l. 7–10 of 1530* (followed by l. 29–30, 39–40, 34–35, 41 of 1543*).

—After 25, D10.11 M5 ins. an addl. colophon; G2 ins. after l. 17 of 1540*:

[*Sarga no.* (figures, words or both): 110.]

—After colophon, G2 M5 conclude with श्रीरामाय नमः.

26 G(ed.) om. 26. B3 G2 read 26 twice. —[a]) Note hiatus between एतावदेव and आख्यानं. Ś V3 B2.3 (second time) D8.12 M2.4 एतदेव तद्; Ñ2 V2 B4 एतद्धि(V3 °द्वै) सर्वम्; V1 D1–7.9.11 T1–3 G M3.5–10 एतावदेतद्; B1 इदं पवित्रम्; M1 एतावदिदम्. Ñ2 V2 B4 M6 आख्यातं; T4 चाख्यानं (for आख्यानं). B3 (first time) रामायणमिदं काव्यं. —T2 om. 26[b–c]. —[b]) V1 देव-; B3 (first time) बहु- (for ब्रह्म-). B2.3 (second time) -भाषितं. M6 रामस्य चरितं महत्. —After 26[a–b], Ś B2.3 (after first occurrence) D1–3.8.9.12 ins.; V1 cont. after 1527*; V2 (after l. 6) B4 ins. after l. 8 of 1527 (B4 followed by only l. 3 second time of 1524*); T4 cont. after 1531*:

1525* रामायणं तथा श्लोकं पादं चार्धं च यः पठेत् ।
पापान्यपि सदा कुर्वन्न स पापेन लिप्यते ।

[Ś V1 transp. l. 1 and l. 2. —(l. 1) D3.4 रामायणात्. Ś3 पदं भागं; V1 पादं पदं; V2 D8.12 पदं पादं; B2–4 पादमर्धं; D2.3.9 अर्धपादं; D5 अर्धपाठं (for पादं चार्धं). B2.3 तु (for च). —(l. 2) After the prior half, V1 ins.:

1525(A)* अहन्यहनि मानवः ।
पठेदेवं पदं वापि.

V2 स पापैर्नैव लिप्यते; B2 D2.9 स पापेन न लिप्यते; B3 T4 सर्वपापैः प्रमुच्यते; B4 न हि पापैः स लिप्यते (for the post. half).]

—Then Ś V1 B2.3.4(only l. 3 for the first time repeating it in its proper place) D1–4.5(first time).8.9.12 cont. 1524*; while T4 further cont. after 1525*:

1526* आख्यानमेतत्पुण्यं हि पवित्रं पापनाशनम् ।

—After 26[a–b], Ñ2 B4 ins.; V2 ins. l. 1–8 after 26[a–b]; cont. l. 9–16 after 1535* and ins. l. 17–39 after l. 6 of 1522*; B3 ins. after colophon (cf. post. colophon line); D1.4 cont. after 1531*; M1 cont. only l. 36–37 after l. 10 of 1540*:

1527* यश्चैनं शृणुयान्नित्यं सर्वपापैः प्रमुच्यते ।
पठनेकमपि श्लोकं सर्वपापैः प्रमुच्यते ।
यश्चैनं शृणुयान्नित्यं शुचिर्धर्मसमाहितः ।
विष्णुनाचरितं लोके श्रुत्वा पापात्प्रमुच्यते ।
य इदं निखिलं पुण्यं धर्माख्यानं सदा मुदा । [5]

ब्रूयात्स तु विशुद्धात्मा पुत्रवान्पशुवान्भवेत्।
शृणुयादेकचित्तो वा नारायणपरायणः।
स हि रोगैर्महाघोरैर्विप्रमुच्येत दारुणैः।
रामायणोत्तरमिदं शृणुयाच्छ्रावयेत्तु यः।
तस्य तस्य मतिस्तेजो विस्तरं साधनं बलम्। [10]
सुखोत्पन्नानि वर्धन्ते पुण्यानि च सुखानि च।
सर्वार्थसम्पदः सिद्धिर्भवेत्तस्य न संशयः।
रामायणं वाचयित्वा यः क्रियासु प्रवर्तते।
न तस्य दुर्लभं किंचिदिह लोके परत्र वा।
लोकत्रयस्य कर्तारं रामं ये शरणं गताः। [15]
न ते पश्यन्ति निरयं जन्मना न दरिद्रताम्।
न तत्र दानवाः सन्ति न पिशाचा न राक्षसाः।
यत्र देवो गृहे विष्णुः कीर्त्यते हि सदा नरैः।
का शक्तिः सर्वलोकेषु सुचिरेणापि भाषितुम्।
रामलक्ष्मणसीतानां सर्वेषां यो गुणान्वदेत्। [20]
यस्य जिह्वासहस्रं च सहस्रवदनश्च यः।
सोऽपि वक्तुं न शक्नोति रामस्यामितविक्रमान्।
इदं रामायणं काव्यं संपठनाद्भावभाश्रयम्।
श्रुत्वैव सर्वपापानि प्रणश्यन्ति सदा नृणाम्।
अहन्यहनि यो विद्वान्पठेद्रामायणं नरः। [25]
न तस्यापद्भवेत्काचित्कीर्तिमांश्च भवेत्सदा।
विप्रो वेदान्तगश्च स्यात्क्षत्रियो विजयी भवेत्।
वैश्योऽपि धान्यधनवाञ्शूद्रः सुखमवाप्नुयात्।
शृण्वन्ति य इदं पुण्यमार्षं वाल्मीकिना कृतम्।
श्रद्दधाना जितक्रोधा दुर्गाण्यतितरन्ति ते। [30]
समागमं प्रवसिता लभन्ते चापि बान्धवैः।
सततं राजपुत्रेण गर्भिण्या च समाधिना।
श्रोतव्यं राज्यकामेन पुत्रार्थिन्या तथा स्त्रिया।
यश्चैकचित्तः शृणुयादिदं विष्णोः पुरातनम्।
सोऽश्वमेधफलं प्राप्य मोदते दिवि देववत्। [35]
रामायणमिदं पुण्यं शृण्वतः पठतस्तथा।
प्रीयते भगवान्रामः स च विष्णुः सनातनः।
देवाश्च सर्वे तुष्यन्ति कीर्तनाच्छ्रवणात्तथा।
रामायणं धारयतस्तुष्यन्ति पितरस्तथा।

[D1.4 om. l. 1–8. Ñ2 illeg. from l. 1 up to the prior half of l. 2. —(l. 1) B3 (m. also) यश्चेदं. —B4 om. (hapl.) from the post. half up to the prior half of l. 3. —(l. 2) V2 पठत्येकम्. —(l. 3) Ñ2 भूत्वा (for धर्म-). —(l. 4) V2 विष्णोर्वा. —Ñ2 illeg. for the post. half. —Ñ2 mostly illeg. for l. 5. —(l. 5) V2 B3 सर्व (for पुण्यं). —After l. 5, V2 ins. only l. 1–4 of 1520*. —(l. 6) Ñ2 illeg.; V2 ब्रूयात्सर्व-; B3 शृणुयात्सर्व- (hypm.) (for °त्स तु). Ñ2 धनवान् (for पशुवान्). —After l. 6, V2 ins. 1525*. —(l. 7) V2 एकचित्तेन. —Ñ2 illeg. from the post. half up to l. 9. —After l. 8, Ñ2 (illeg.) V2 (followed by l. 5–6, 9–10 of 1522*) ins. 1524*; while B3 ins. only l. 3 of 1524* and 1535*. —(l. 9) D1.4 रामायणमिदं श्रेयः (for the prior half). V2 श्रावयेत्सुनरो द्विजः; B3 D1 श्रावयेद्यो नरं द्विजं (D1 °रो द्विजान्); D4 यः पठिष्यति मानवः (for the post. half). —(l. 10) Ñ2 कीर्तिर्; D1.4 धर्मे (for second तस्य). —Ñ2 illeg. from तेजो up to l. 11. B3 तं ते (sic) (for तेजो). D1.4 साधनं (for स°). —(l. 11) D1.4 वर्ग्य- (for सुख-). B3 वर्तते (for वर्धन्ते). —(l. 12) V2 सर्वथा (for सर्वार्थ-). D1.4 -संपदां. —(l. 13) B3 महाकाव्यं (for वाचयित्वा). —Ñ2 illeg. from यः up to l. 15. —(l. 14) V2 D1.4 च (for वा). —(l. 15) B3 श्रवणं (for शरणं). —(l. 16) Ñ2 निलयं; D1.4 दुःखानि (for निरयं). D1.4 न जन्मनि. B3 [अ]युतैरपि (for दरिद्रताम्). Ñ2 यांति विष्णोः परं पदं (for the post. half). —After l. 16, V2 ins.:

1527(A)* न पापं प्रभवेत्तस्य योऽन्नाश्ना* ****।

—Ñ2 illeg. for l. 17–18. —(l. 17) V2 पिशाचा न च (for न पिशाचा न). —(l. 18) D1.4 देववरो (for देवो गृहे). V2 कीर्णाति. V2 B3 हि (B3 ह) सदा हृदा (for हि सदा नरैः). D1.4 कर्ता चेह सदा सदा (for the post. half). —After l. 18, D1.4 ins.:

1527(B)* रामस्य चरितं चेदं सर्वमक्लिष्टकर्मणः।

—V2 om. l. 19. D1.4 read l. 19–26 after 1527(E)*. —(l. 19) D1.4 को नरः (for का शक्तिः). B3 [अ]भि- (for [अ]पि). —(l. 20) D1.4 सह रामेण सीतायाः (for the prior half). —Ñ2 lacuna for the post. half. —(l. 21) B3 तस्य. D1.4 हि (for च). D1.4 हि (for second च). B3 लभते नात्र संशयः (for the post. half). —(l. 22) Ñ2 V2 प्राहुः (Ñ2 °हः) सर्षिगणानां च स तु तेषां गुणान्वदेत्; B3 प्राज्ञः ऋषिगणानां च संततिस्तस्य वर्धते; D1.4 कृत्स्नान्नारायणगुणान्स तु वक्ष्यति वा न वा. —(l. 23) D1.4 आर्ष- (for इदं). D1.4 वाक्यं. —Ñ2 illeg. from the post. half up to l. 24. Post. half hypm. V2 B3 D1.4 पठतो राघवोत्तरं (V2 °मं) (for the post. half). —(l. 24) D1.4 श्रुत्वा च सकलान्कामान्प्रयच्छति सदा नृणां. —(l. 25) Ñ2 पुण्यकालेषु (for अहन्यहनि). —(l. 26) D1.4 [आ]पत्तस्य (by transp.). B3 तस्य नापद्भवेत्किंचित् (for the prior half). Ñ2 सर्वपूज्यो **स* (for the post. half). —After l. 26, D1.4 ins.:

1527(C)* एवमेतद्यथातत्त्वमनुतिष्ठन्समाहितः।
ख्यातिं कामांश्च मोक्षं च धर्मार्थौ च समश्नुते।
रामायणं विसर्गे च मध्याह्ने चापि भारतम्।
पुराणमपराह्णे च वाचयन्नावसेदति।
वाचकं पूजयेद्यस्तु कार्पटैर्भूषणैरपि। [5]
विष्णुः संपूजितस्तेन कौशल्यानन्दवर्धनः।
पुस्तकं दापयेद्यस्तु सर्वालंकारभूषितम्।
श्लोके श्लोकेऽश्वमेधेन इष्टो देवो जनार्दनः।
सुवर्णं रजतं गाश्च वासांसि विविधानि च।
मणिना पूजयेद्यस्तु सदा रामस्य तुष्टये। [10]

[Note hiatus between the two halves in l. 8.]

—D1.4 om. l. 27–28. Ñ2 illeg. from l. 27 up to वैश्योऽपि in l. 28. —(l. 27) V2 वेदांतगो ब्राह्मणः स्यात्; B3 विप्रो वेदस्यांतगः स्यात् (for the prior half). —(l. 28) V2 धनधान्यश्च (for धान्यधनवान्). —(l. 29) Ñ2 illeg. for शृण्वन्ति य. D1.4 लोके ये चेदम् (for य इदं पुण्यम्). —Ñ2 illeg. mostly for l. 30. —(l. 30) D1.4 [अ]पि (for [अ]ति-). V2 कुर्वान्यभिभवंति ते (for the post. half). —(l. 31) Ñ2 प्रवसनैर्; V2 प्रवासात्तु; B3 बांधवैश्च; D1.4 प्रवसितैर्. Ñ2 चापि बांधवाः; B3 ते प्रवासिताः (for चापि बान्धवैः). —After l. 31, D1.4 ins.:

1527(D)* ईप्सितान्हि वरान्सर्वान्प्राप्नुवन्तीह मानवाः।
श्रवणेन सुराः सर्वे प्रीयन्तीदं प्रयुज्यते।
विनायकाश्च शाम्यन्ति गृहे तिष्ठन्ति तस्य वै।
श्रुत्वा रामायणं पुण्यं पूजयेद्यस्तु वाचकम्।
तेन ब्रह्मा च रुद्रश्च विश्वे च वसवस्तथा। [5]
तोषिता ऋषयः सर्वे पितरश्च स्वधाशिनः।
तेन लोकाश्च वेदाश्च वसुधा च ससागराः।
नद्यः सरांसि सर्वाणि पुण्यान्यायतनानि च।
पूजिताः पूजिते व्यासे सर्वे च धरणीधराः।

—D1.4 om. l. 32–35. Ñ2 mostly illeg. for l. 32–33. —(l. 32) V2 वा (for च). V2 B3 मुनेर्वचः (for समाधिना). —(l. 33) V2 पुत्र- (for राज्य-). —Ñ2 om. l. 34–35. —(l. 36) Ñ2 transp. रामायणम् and इदं. D1.4 काव्यं; M1 सर्वं (for पुण्यं). D1.4 शृणुयात्पुरुषस्. Ñ2 V2 M1 सदा (for तथा). —Ñ2 mostly illeg. for l. 37. —(l. 37) B4 प्रीयेत. M1 सततं (for भगवान्). D1.4 M1 हि (for च). B3 पुरातनः. —After l. 37, D1.4 ins.:

1527(E)* आदिदेवो महाविष्णुर्हरिर्नारायणः प्रभुः।
स कर्ता जगतां स्वामी तेन सर्वमिदं ततम्।

—D1.4 om. l. 38–39. —(l. 38) Ñ2 illeg. except देवाश्च for l. 38–39. B3 स्मरणात् (for श्रवणात्). —(l. 39) V2 B3 श्रावयतस् (for धारयतस्).]

—Then Ñ2 B3.4 cont. l. 9–10 of 1522*. —After 26^{ab}, V1 ins.:

1528* सर्वपापैः प्रमुच्येत शृणुयाद्यो हि नित्यशः॥

While B1 ins.:

1529* पठन्नायुष्य * * * लभते विपुलं यशः।

—Then cont. l. 5–6 of 1522*.

—Whereas B3 ins. l. 4–6 of 1522* after 26^{ab} (first occurrence).

After 26^{ab}, T3.4 ins.; G1 M5 ins. l. 1–8 after 26 and l. 9–10 after l. 6 of 1522*; M3 cont. only l. 7–10 after 1522*; B (ed.) K (ed.) ins. only l. 7–10 after l. 4 (second occurrence) of 1522*:

1530* हरिः सनातनो विष्णुः प्राप्तो देवैर्यथा दिवम्।
पूजितं राघवं दिव्यं प्रापुर्भागं महात्मनः।
यो नरः शृणुयाद्भक्त्या सदा पर्वसु पर्वसु।
परान्विजयते राजा यथा विष्णुर्महायशाः।
यशश्च महदाप्नोति प्रेत्य चानन्तमश्नुते। [5]
श्रेयो भवति भूतानां सर्वेषां नात्र संशयः।
यः पठेच्छृणुयान्नित्यं चरितं राघवस्य च।
भक्त्या निष्कल्मषो भूत्वा दीर्घमायुरवाप्नुयात्।
चिन्तयेद्राघवं नित्यं श्रेयः प्राप्तुं य इच्छति।
श्रावयेदिदमाख्यानं ब्राह्मणेभ्यो दिने दिने। [10]

[(l. 1) G1 M5 हरिं सर्वेश्वरं विष्णुं प्राप्तं देवैर्यथा दिवं. —(l. 2) T3 G1 M5 प्रादुर्भावं (for प्रापुर्भागं). —(l. 3) G1 M5 तत्परः (for second पर्वसु). —(l. 5) G1 M5 चानंदम्. —(l. 6) G1 M5 प्रियो (for श्रेयो). —(l. 7) G1 M5 हि; M3 ह (for च). —(l. 8) M5 नियमतो (for निष्कल्मषो). —After l. 8, G1 (l. 3–4) M5 cont. 1519*. —(l. 9) T3 यदा (for य). —(l. 10) T3 एवम् (for इदम्).]

—Then T3 cont. l. 27–41 of 1543*; T4 cont. l. 4–6 of 1522*.

—After 26^{ab}, M6 ins. l. 4–6 and l. 9–10 of 1522*; While M8 ins. l. 4–5 of 1522*.

—T3 om. 26^{cd}. —^{c}) G2 (first time) प्रख्यं (for ख्यातं). V3 आदिकाव्यमिदं सर्वं; T4 रामायणमिदं काव्यं. —^{d}) V3 T4 G2 (both times) पुरा; G3 पुण्यं (for मुख्यं). —For 26^{cd}, Ś Ñ2 (illeg.) V1 B2 D1–5.8.9 (D2.9 read twice).12 M6 subst.; T4 cont. after 1524*:

1531* कृतवान्भार्गवो धीमान्ब्रह्म चैवाभ्यपद्यत।

[D2.9 (both second time) स्वर्गतो (for भार्गवो). Ś2 (after corr. m. as above) आदितो ब्रह्मणो. M6 श्रीमान् (for धीमान्). T4 प्रचेतःपुत्रश्च (hypm.) V1 [अ]भ्यमन्यत; D1.2.4.9 (D2.9 [both second time]) [अ]न्वपद्यत. B2 ब्रह्मा चैवानुमन्यते; D2.9 (both first time) ब्रह्मा तच्चान्व (D2 °मर्थ)-मन्यत; D3.5 ब्रह्मैवं समपद्यत; T4 M6 ब्रह्मा तदनुमन्यत (T4 °ते) (for the post. half).]

—Then D2.9 (both after first occurrence) cont.:

1532* पठेदेकं तु यः श्लोकं स वै पापात्प्रमुच्यते।
सर्वदा पठते यस्तु ब्रह्मलोकं स गच्छति।

[(l. 1) D9 च श्लोकं च सर्व- (for तु यः श्लोकं स वै).]

—Thereafter D2.9 repeat only l. 3 of 1524*.

—After 1531*, D1.4 cont. 1527*; while D2 (after second occurrence) cont.:

1533* इदं यः शृणुयान्नित्यं धर्मज्ञो धर्मवाक्यरः।
धर्मार्जितं धर्मधर्मे नियोज्य त्रिदिवं व्रजेत्।
आनृशंस्यं प्रियं शौर्यमृजुतामार्जवं गतिम्।
प्राप्नोति हि नरः सम्यग्रामस्य चरिते कृते।

Arya Research Team

—Whereas $D_{3.5}$ (only l. 1–3) cont.:

1534* श्रुत्वा रामायणं पुण्यं पूजयेद्यस्तु भक्तितः।
हरिर्ब्रह्मा च रुद्रश्च विश्वे च वसवस्तथा।
पूजिता ऋषयः सर्वे पितरश्च सहाग्निभिः।
तेन लोकाश्च देवाश्च त्रैलोक्यं सचराचरम्।
पूजितं तेन येनेह श्रुतं रामायणं शुभम्। [5]
इति श्रीरामचरितं श्रुतं सर्वार्थसिद्धिदम्।
शृणुयाच्छ्रृणुयान्मर्त्यः स कृतार्थो न संशयः।
रामायणं महापुण्यं यः शृणोति नरः सदा।
आयुरारोग्यमैश्वर्यं तस्यौ तत्त्रितयं स्थिरम्।

[After l. 3, D_5 ins. 1519*. D_3 reads l. 8–9 in marg.]

—For 26^{cd}, V_2 M_5 subst.; B_3 cont. after 1524* (repeated consecutively); B_4 cont. after l. 3 (first occurrence) of 1524*:

1535* वाल्मीकिः कृतवान्सर्वं ब्रह्मणोऽनुमते प्रभुः।

[M_5 श्रीमांस् (for सर्वं) and तद्ब्रह्माप्यनुमन्यत (for the post. half).]

—Then V_2 cont. l. 9–16 of 1527*; while M_5 cont. only l. 41 (followed by 1544*) of 1543*.

—For 26^{cd}, $B_{1.3}$ (both times).4 subst.; V_1 cont. after 1531*; V_2 cont. after 1522*; B_2 cont. after 1520(A)* (first occurrence):

1536* चक्रे प्रचेतसः पुत्रो वाल्मीकिर्मुनिपुंगवः।

[V_2 कृतवान् (hypm.); B_3 (first time) वाक्यं (for चक्रे). $B_{1.3}$ (first time) भगवान्हरिः; B_2 भगवानृषिः; B_3 (second time, *sup. lin.* also as above) मुनिसत्तमः. V_1 भगवान्वाल्मीकिरृषिः (for the post. half).]

—Thereafter, V_1 further cont.:

1537* यस्येदं लिखितं गेहे सदा तिष्ठति पूजितम्।
तस्य नारायणो देवः सुखं तिष्ठति नित्यदा।
यश्चैत*** भक्त्या नैरन्तर्येण मानवः।
तेन वेदाः पुराणानि सर्वे शास्त्रार्थसंग्रहाः।
प्राप्ताः स्युः पुष्करे तीर्थे प्रयागाः सिन्धुसागरे। [5]
देवागारे कुरुक्षेत्रे रावणस्य(?) विशेषतः।
विप्रो वै ग्रहणे चैव यत्फलं जपतो भवेत्।
तत्फलं द्विगुणं तस्य संयतात्मा शृणोति यः।
श्रुत्वा तु पूजयेद्देवं यथाध्यानं यथाविधिः।
चतु*नं परं ब्रह्म रामचन्द्राभिधं मुदा। [10]
भ्रातृभिर्भरताद्यैश्च प्रकृत्या सीतया युतम्।
संपूज्य विधिवद्भक्त्या नानाविभवमङ्गलैः।
गोभूहिरण्यवासोभिर्नानालंकारमण्डनैः।
वाल्मीकिं काव्यकर्तारं संपूज्य श्रद्धयान्वितम्।
सद्विद्यं सत्कुलं शान्तं पुराणज्ञं द्विजोत्तमम्। [15]
गोभूहिरण्यवस्त्रैश्च यथालाभेन ***।
एवं कृते तु यत्पुण्यं तच्छक्यं न मयेरितुम्।
अपि वर्षसहस्राणि *गमत तु रोदितम्।
इहैव तु सुखी भूत्वा निरातङ्को गतज्वरः।
ततोऽवसाने धर्मा* प्राप्नुयाद्वै परं पदम्। [20]
एतन्न *र्षमध्ये तु पठेदपि कदाचन।
न पठेत्तु * मध्ये तु देवदेवेषु नो पठेत्।
ये च धर्मध्वजा राजन्देवद्विजपरायणाः।
तेषां सिध्यै अहरहः पठनीयो द्विजातिना।
वाल्मीकेर्व(द)नारविन्दगलितं हृद्यं परं पावनं। [25]
पथ्यं वागमृतं परं प्रतिदिनं ये श्रोत्रपात्रे नरः।
**सच्चरितं चराचरगुरो रामायणं सर्वदा
तस्य श्रीर्भवने भवत्यविचला नश्यन्ति चारातयः।
वाल्मीकिवक्त्राब्जविनिर्गतं ये
शृण्वन्ति रामायणमेव नित्यम्। [30]
ते विष्णुलोके सततं वसन्ति
भुक्त्वा तु भोगानखिलानवद्यान्।

—After 1536*, V_2 B_3(after second occurrence).4 cont.:

1538* एवमेतद्यथावृत्तमनुतिष्ठन्समाहितः।
कीर्तिं ख्यातिं च सौख्यं च धर्मार्थौ स समश्नुते।

[(l. 1) B_3 यथार्थं त्वम् (for °वृत्तम्). —(l. 2) V_2 ख्यातिं कीर्तिं (by transp.). V_2 B_3 च (for स).]

—Thereafter V_2 $B_{3.4}$ cont. 1523*. —For 26^{cd}, M_8 subst.; while $D_{5-7.10.11}$ $T_{1.2}$ $G_{2.3}$ $M_{1-4.7.9.10}$ B (ed.) K (ed.) cont. after 1524*:

1539* व्यधात्प्रचेतसः पुत्रस्तद्ब्रह्माप्यन्वमन्यत।

[V_2 $B_{3.4}$ $D_{5-7.10.11}$ $T_{1.2}$ G_2 $M_{2.4.7-10}$ कृतवान् (hypm.); $M_{1.3}$ कृत्वा (for व्यधात्). M_7 प्राचेतसः. M_8 ह्यन्वपद्यत; M_8 [अ]प्यनुमन्यत.]

—Then G_2 M_1 (only l. 1–10 [om. l. 3 and 6]) further cont.:

1540* आदिकाव्यमिदं श्राव्यं व्यक्तं वाल्मीकिना कृतम्।
यः शृणोति पठेद्वा स पापात्सपदि मुच्यते।
मुक्तिकामो लभेन्मुक्तिं धनकामो धनं लभेत्।
लभते पतिकामा च पतिं कन्या मनोहरम्।
प्रवासिनोऽपि च तथा लभन्ते ज्ञातिबान्धवान्। [5]
यं यं कामयते मर्त्यस्तं तं काममवाप्नुयात्।
कुटुम्बवृद्धिं धनधान्यवृद्धिं
यशश्च मुख्यं सुखवृद्धिकामैः।
श्रुत्वा वरं काव्यमिदं महार्थं
प्राप्नोति विष्णोः पदमव्ययं तत्। [10]
आयुष्यमारोग्यकरं यशस्यं
सौभ्रातृदं बुद्धिकरं शिवं च।
श्रोतव्यमेतद्विधिवेन सद्भि-
राख्यानमुख्यं सुखवृद्धिकामैः।
देवाश्च सर्वे तुष्यन्ति ग्रहणाच्छ्रवणात्तथा। [15]
भक्त्या रामस्य ये चेमां संहितामृषिणा कृताम्।

Arya Research Team

लेखयन्ति नरास्तेषां ये च वासस्त्रिविष्टपे ।
एवमेतत्पुराबृत्तमाख्यानं भद्रमस्तु वः ।
प्रब्याहरत विश्रब्धं बलं विष्णोः प्रवर्धताम् ।
शृण्वन्नामायणं पुण्यं पाठकं यस्तु पूजयेत् । [20]
ग्रामैर्वस्त्रैस्तथा यानैर्भूषणैः स्त्रग्भिरेव च ।
स याति परमं स्थानं यत्रासौ तिष्ठते हरिः ।
तं तु पूज्यमवज्ञाय वाचकं यस्तु दुर्मतिः ।
मूको भवति जन्मानि सप्त सप्त च सप्त च ।
पुत्रकामश्च पुत्रान्वै धनकामो धनं लभेत् । [25]
भक्त्या रामायणं श्रुत्वा अक्षयं सुखमश्नुते ।
ये चेह विपुलां कीर्तिं प्रार्थयन्ति मनीषिणः ।
राममेव च वक्तारं जानीयुर्मत्सरं विना ।
त्यक्त्वासूयां तु ये शश्वत्तद्रामायणमुत्तमम् ।
मनोरथाः फलन्त्येव तेषामिव यथा तथा । [30]

[(l. 1) M1 काव्यं पुरा (for श्राव्यं व्यक्तं).—(l. 2) M1 [अ]पि (for स). M1 स पापात्परि-.—(l. 4) M1 पतिकामा पतिं कन्या लभते तं मनोरमं (cf. l. 8 of 1542*).—(l. 5) M1 चापि (for ज्ञाति-).—(l. 7) M1 -संचयं (for second -वृद्धिं).—(l. 8) M1 वयश्च. M1 सुखमुत्तमं च (for °वृद्धिकामैः).—(l. 9) M1 महत्- (for वरं).—(l. 10) M1 प्राप्नोति सर्वामपि चार्थसिद्धिं.—After l. 17, G2 reads col. Note hiatus between the two halves in l. 26.]

—After 1539*, B (ed., within brackets) K (ed.) further cont.:

1541* अश्वमेधसहस्रस्य वाजपेयायुतस्य च ।
लभते श्रवणादेव सर्गस्यैकस्य मानवः ।
अथ गत्वा तृतीयं तु वायोः पन्थानमुत्तमम् ।
नित्यं यत्र स्थिताः सिद्धाश्चारणाश्च मनस्विनः ।
दशैव तु सहस्राणि योजनानां तथैव च । [255]
चतुर्थं वायुमार्गं तु शीघ्रं गत्वा परंतप ।
वसन्ति यत्र नित्यस्था भूताश्च सविनायकाः ।
अथ गत्वा तु वै शीघ्रं पञ्चमं वायुगोचरम् ।
दशैव तु सहस्राणि योजनानां तथैव च ।
गङ्गा यत्र सरिच्छ्रेष्ठा नागा वै कुमुदादयः । [260]
कुञ्जरास्तत्र तिष्ठन्ति ये च मुञ्चन्ति शीकरम् ।
गङ्गातोयेषु क्रीडन्ति पुण्यं वर्षन्ति सर्वशः ।
ततः करिकराङ्गुष्टं वायुनाथ लवीकृतम् ।
जलं पुण्येषु पतति हिमवर्षं तु राघव ।

ततो जगाम षष्ठं स वायुमार्गं महाद्युते । [265]
योजनानां सहस्राणि दशैव तु स राक्षसः ।
यत्रास्ते गरुडो नित्यं ज्ञातिबान्धवसत्कृतः ।
दशैव तु सहस्राणि योजनानां तथोपरि ।
सप्तमं वायुमार्गं तु यत्रैते ऋषयः स्थिताः ।
अत ऊर्ध्वं तु गत्वा वै सहस्राणि दशैव तु । [270]
अष्टमं वायुमार्गं तु यत्र गङ्गा प्रतिष्ठिता ।
आकाशगङ्गा विख्याता आदित्यपथसंस्थिता ।
वायुना धार्यमाणा सा महावेगा महास्वना ।
अत ऊर्ध्वं प्रवक्ष्यामि चन्द्रमा यत्र तिष्ठति ।
अशीतिं तु सहस्राणि योजनानां प्रमाणतः । [275]
चन्द्रमास्तिष्ठते यत्र ग्रहनक्षत्रसंयुतः ।

नाम; D1.3.4 पुष्करावर्ता (for पक्षिणो ब्राह्मास्). Ñ1 आग्नेयदक्षिणा-प्राच्यास् (for the prior half). D6 तस्य; M3 इति (for तत्र). Ñ1 संस्थिताः; M3 संस्मृताः (for ते स्थिताः). Ś D2.8.9.12 ब्रह्माद्या-स्त्रिविधाः स्मृताः; D1.3.4 ब्राह्मा(D1 °ह्या)श्च त्रिविधाः स्मृताः (for the post. half). —(l. 253) D1 वायु- (for वायोः). —(l. 254) D2 (double saṃdhi) [अ]त्र (for च). V3 (with hiatus) अतंद्रिताः (for मनस्विनः). —(l. 255) Ñ1 V1 D1.4 दशैवं तु; V3 स दशैव; B4 दश वै तु (for दशैव तु). —D11 reads the post. half in marg. V3 दशैव (for तथैव). Ś1.2 V1.3 D1–4.8.9 हि (for च). —Ś3 D12 om. (hapl.) l. 256–259. —(l. 256) B2.4 च (for तु). Ñ1 गत्वा शीघ्रं (by transp.) (for शीघ्रं गत्वा). B परंतपः; G (ed.) ततः परं (for परंतप). Ś1.2 V1.3 D1–4.8.9 गत्वाश्व(V3 °नु; D1.4 °स्य)पद (Ś2 °थ)रोमशं(Ś1 °शः; Ś2 D8 °शां); T3.4 M3 गतवान्नावणस्तथा(T3.4 °स्त्वरन्) (for the post. half). —(l. 257) D3 वसंते (for वसन्ति). Ñ1 V3 B1–3 D1.3.4.8.9 तत्र (for यत्र). Ś1.2 V3 D8 सत्त्वस्था; M3 नित्यं वै (for नित्यस्था). Ñ1 V1 B1.2.4 तु; V3 ते (for च). B3 हरयः (for भूताश्च). —(l. 258) V1 तत्र (for अथ). Ñ2 B D6.7.10.11 स (for तु). Ś D2.8.12 शीघ्रं वै (by transp.) (for वै शीघ्रं). Ś2 D8 चतुर्थं (for पञ्चमं). —V3 om. l. 259-260. —(l. 259) B2 D6.7.10.11 च (for तु). V1 D8 हि; B3 ह; D1.3.4.9 तत् (for च). —(l. 260) B4 यत्र गंगा (by transp.) (for गङ्गा यत्र). Ś V3 D8.12 ये; T3 M3 च (for वै). Ś D8 कुमुदालयाः. —(l. 261) D1.4 M3 यत्र (for तत्र). D11 ति** (for तिष्ठन्ति). Ñ V1 B1–3 D6.7.10.11 ये तु; V3 D1.4 यत्र; D2 येषु (for ये च). D3 om. ये च मुञ्चन्ति. D10.11 सीकरं; T3.4 M3 शीकरान् (for शीकरम्). —(l. 262) V1 -तोयेन (for -तोयेषु). Ś Ñ1 V1 D1.3.4.8.9.12 क्रीडंतः; V3 **ति; D2 क्रीडते; T3 तिष्ठंति; T4 M3 तिष्ठंतः (for क्रीडन्ति). Ñ1 पुष्पं; V3 पुण्यैर्; B1.2 पुत्रं (for पुण्यं). B1–3 वर्धति; D9 वर्धत; M3 कुर्वंति (for वर्षन्ति). D6 पुण्यवर्षं च (for पुण्यं वर्षन्ति). V3 T4 M3 सर्वतः (for सर्वशः). —(l. 263) Ñ2 B D6.7.10.11 रविकर-; V3 करात्परि-; T4 करिकर- (for करिकराद्). V1 करिकरं दृष्टं. Ñ V1 B4 D2.9 पेलवीकृतं; V3 विरलीकृतं; B1.2 जाड़(B2 [m. also] फेन)बीजलं; B3 प्रबलीकृतं; D1.4 फेनवी°; D3.6.7.10.11 पेशली°; T3.4 M3 लोलितं भृशं (for [अ]थ लवीकृतम्). —(l. 264) Ś1 Ñ1 V1.3 पुष्पेषु; D3 पुंड्रेषु; T3 M3 कुंजेषु; T4 कुंडेषु (for पुण्येषु). M3 पतितं (for पतति). Ñ2 D6 7.10.11 पुण्यं प्रपतति; B1 G (ed.) पुण्ये(G [ed.] °ण्यं) निपतति (for पुण्येषु पतति). V3 जलेषु पतति नैव (for the prior half). V3 संवारयति; B1.2 D7.10.11 T3 हिमं वर्षति; T4 हिमवंतं तु; M3 हिमं भवति (for हिमवर्षं तु). D1.4 राजते (for राघव). —(l. 265) Ñ1 B4 T4 तु; B2 वै (for स). V3 D6 षष्ठांशं(D6 °शः); D9 षष्ठः स (for षष्ठं स). Ñ1 B2.3 D1.4.6.9 महाद्युतिः; V3 °मते (for महाद्युते). —B1 om. l. 266. —(l. 266) V1 T3 M3 तथैव; T4 तदैव (for दशैव). Ñ1 स तु (by transp.); T3 च तु; T4 च स (for तु स). Ñ1 राघव (for राक्षसः). Ś D1–4.8.9.12 तावत्येव स(D2 च) राघव(Ś D8 °वणः) (for the post. half). —(l. 267) Ñ1 V1.3 D1–4 -संवृतः (for -सत्कृतः). Ś D8.9.12 ज्योतिषा(Ś3 °षां) चैव संवृतः; T4 ज्ञाति ****** (damaged) (for the post. half). —Ś1 om. l. 268. —(l. 268) M3 तथैव (for दशैव). Ś2.3 D8.12 च (for तु). T4 (double saṃdhi) ततोपरि. —(l. 269) Ñ1 V3 D1.3.4 च (for तु). Ñ2 B1.3.4 D6 7.10.11 सप्तमे वायुमार्गे च(D6 °चक्ष्व) (for the prior half). Ñ2 B4 D6 T4 ते; D9 [ए]व; M3 वै (for [ए]ते). V1 सप्तर्षयः (for [ए]ते ऋषयः). Ñ2 D6.7.10.11 स्मृताः (for स्थिताः). —(l. 270) Ś D1.2.4.8.9.12 तत (for अत). B1 तु (for वै). M3 (with hiatus) अथ ऊर्ध्वं स गत्वाथ (for the prior half). T4 च (for तु). —(l. 271) Ñ1 V3 B D1.3.4 च (for तु). Ś B4 D1–4.8.9.12 गंगा यत्र (by transp.) (for यत्र गङ्गा). —(l. 272) Note hiatus between the two halves. D12 आकाशमार्गमाख्याता (for the prior half). Ś D8 आकाश-; V1 ह्याकाश-; T3.4 M3 ह्यादित्य- (for आदित्य-). Ś D2.8.9 -पथि; B1 -प*- (for -पथ-). B2 M3 -पथमास्थिता. —(l. 273) Ñ1 V3 वार्यमाणा; D1.3.4 प्रेर्यमाणा (for धार्यमाणा). Ś2.3 D8 महा-मेघा; B2 °भागा (for °वेगा). V3 B4 महात्मना (for महास्वना). —(l. 274) B1 यत्र तिष्ठति चंद्रमाः (for the post. half). —(l. 275) Ś Ñ1 V1 B4 D2.6.8 M3 अशीतिस् (for अशीतिं). V3 B1.2 च (for तु). D6 सहस्रस्य (for सहस्राणि). Ś D8 तथा दश; V3 D1–4.12 T3 M3 तथोपरि (for प्रमाणतः). —(l. 276) D1 तिष्ठति; D4 ति ** (for तिष्ठते). Ñ1 चंद्रमा यत्र तिष्ठति (sic)

Anvi Research Team

शतं शतसहस्राणां रश्मयश्चन्द्रमण्डलम् ।
प्रकाशयन्ति लोकांस्तु सर्वसत्त्वसुखावहम् ।
ततो दृष्ट्वा दशग्रीवं चन्द्रमा निर्दहन्निव ।
स तु शीताग्निना शीघ्रं प्रादहद्रावणं तदा । [280]
नासहंस्तस्य सचिवाः शीताग्निभयपीडिताः ।
रावणं जयशब्देन प्रहस्तो वाक्यमब्रवीत् ।
राजञ्शीतेन वध्यामो निवर्तामः इतो वयम् ।
चन्द्ररश्मिप्रतापेन रक्षसां भयमाविशत् ।
स्वभावेनैष राजेन्द्र शीतांशुर्दहनात्मकः । [285]
एतच्छ्रुत्वा प्रहस्तस्य रावणः क्रोधमूर्छितः ।
विस्फार्य धनुरुद्यम्य नाराचैस्तमपीडयत् ।
अथ ब्रह्मा समागच्छत्सोमलोकं त्वरान्वितः ।

दशग्रीव महाबाहो साक्षाद्विश्रवसः सुत ।
गच्छ शीघ्रमितः सौम्य मा चन्द्रं पीडयस्व वै । [290]
लोकस्य हितकामोऽयं द्विजराजो महाद्युतिः ।
मन्त्रं च ते प्रदास्यामि प्राणात्ययगतिर्यदि ।
यस्त्विमं संस्मरेन्मन्त्रं नासौ मृत्युमवाप्नुयात् ।
एवमुक्तो दशग्रीवः प्राञ्जलिर्वाक्यमब्रवीत् ।
यदि तुष्टोऽसि मे देव लोकनाथ महाद्युते । [295]
यदि मन्त्रश्च मे देयो दीयतां मम धार्मिक ।
यं जप्त्वाहं महाभाग सर्वदेवेषु निर्भयः ।
असुरेषु च सर्वेषु दानवेषु पतत्रिषु ।
त्वत्प्रसादात्तु देवेश अजेयः स्यां न संशयः ।
एवमुक्तो दशग्रीवं ब्रह्मा वचनमब्रवीत् । [300]

(for the prior half). —(l. 277) S D8.12 तथा (for शतं). Ñ2 B D6.7.9–11 M3 -सहस्राणि (for -सहस्राणां). D7.10.11 T3 M3 -मंडलात् (for -मण्डलम्). —(l. 278) Ś3 Ñ1 V1.3 B D1–4.8.9.12 प्रकाशयति. D3 लोकांश्च; D9 लोकं स; D12 लोकान्वै; L (ed.) लोकानि (for लोकांस्तु). Ś Ñ1 V3 D2.8 -सुखावहः; V1 -भयावहः; D7.10.11 T3.4 M3 °वहाः (for -सुखावहम्). —(l. 279) D9 गत्वा (for दृष्ट्वा). B1.3 D12 दशग्रीवश् (for दशग्रीवं). —Ñ2 om. from the post. half up to prior half of l. 280. Ś D1–4.8.12 निर्दहाह तं (for निर्दहन्निव). —(l. 280) D12 हतः (for स तु). V3 शीतां * ना (for शीताग्निना). —D3 reads from शीघ्रं up to शी in l. 283 in marg. B1 तप्तं; D2 तीव्रं (for शीघ्रं). Ś V1 D8.12 T3.4 M3 प्रा(Ś V1 D8 प्र)पतद्; Ñ2 प्रदहद्; V3 D1.3.4 प्रावेपद्; D2 आपतद्; D9 प्रा***; D11 प्राहरद् (for प्रादहद्). Ś V1.3 B3 D1–4.8.12 रावणस् (for रावणं). B2 तथा (for तदा). Ñ1 व्यदहन्निव रावणः; B1.4 रावणं प्रा(B4 प्र)दहत्तदा(B1 °था) (for the post. half). —(l. 281) V3 D1.3.4 प्रावेपंस् (for नासहंस). Ś D2.8.12 शीतांशु-; M3 शीताग्नि (for शीताग्नि-). —(l. 282) D1.4 उग्र- (for जय-). Ñ V1 B D10.11 [s]थेनम्; D6.7 [s]ध्यैनम् (for वाक्यम्). D1.3.4 प्रहस्तोथाब्रवीदिदं (for the post. half). —(l. 283) Ś D8 वध्याम; Ñ1 V1 वाध्योमि (sic); V3 वध्या*; B1–3 दह्यामो; D2.12 वध्यामि; D3 T3.4 M3 वाध्यामो (for वध्यामो). D9 राक्षसांस्तेन वध्येम (for the prior half). Ś D2.8.12 निवृत्ताः (D2 °वर्ताः)स्म; V3 **र्तामः; B1 विवर्तामि (for निवर्तामः). V3 B3 हतो (for इतो). —(l. 284) B4 चेड- (for चन्द्र-). B3 -प्रभावेण (for -प्रतापेन). Ñ1 V1 राक्षसा; T3.4 राक्षसान् (for रक्षसां). Ñ1 V1 आविशन्. —(l. 285) Ñ V1.3 D1–4.9–11 T3.4 स्वभाव एष; B1–3 D6.7 स्वभाव एव; M3 K (ed.) स्वभासा (K [ed.]°षा) ह्येष (for स्वभावेनैष). D12 transp. राजेन्द्र and शीतांशुर्. D3 दहनात्मजः. —(l. 287) D9 विस्तार्य (for विस्फार्य). T3 आयम्य (for उद्यम्य). V1 B1.3 M3 प्र(M3 ह्य)पीडयत् (for अपीडयत्). Ś D2.8.12 शरैश्चंद्रमसा(D2 °पी)डयत् (for the post. half). —(l. 288) Ñ2 B D6.7.9–11 तदागच्छत्; M3 स ***; K (ed.) समागम्य (for समागच्छत्). D1.3.4 अथागम्या(D3 °त्या)ह तं ब्रह्मा (for the prior half). B3 सौम्यं लोकं; M3 चंद्रलोकं (for सोम°). —(l. 289) D4 दशधा च (for दशग्रीव). —(l. 290) Ś3 इति (unmetric); Ñ2 B4 अतः (for इतः). Ñ1 गच्छ सौम्य इतः शीघ्रं; V3 गच्छ **** सौम्य(lacuna) (for the prior half). D4 om. मा (subm.). Ñ2 B4 च (for वै). T4 पीडये: शु*; M3 पीडयाशुगैः (for पीडयस्व वै). —(l. 291) Ñ2 B D7.9–11 वै (for स्यं). V3 -कामेश (for -कामोऽयं). D6 स्वलोकस्य हि कामो वै (for the prior half). —(l. 292) B3 चंद्रं (for मन्त्रं). D9 वः (for च). Ñ2 B3.4 D6.7.10.11 संप्रदास्यामि; B1.2 D9 संप्रवक्ष्यामि (for ते प्रदास्यामि). Ñ V1 B4 D6.7.10.11 यदा; B1–3 D9 यथा; D4 युधि (for यदि). D1 -गतिं युधि; T3 M3 -भयेभयं (for -गतिर्यदि). T4 ***संप्रदास्यामि प्राणस्य ***** (damaged). —(l. 293) Ñ2 D6.7.10.11 यस्त्वेतं; D1.4 T4 य इमं; D2 M3 यस्त्विदं; D3 य इदं (for यस्त्विमं). V1 स्मरते मंत्रं; B4 तु स्मरेन्मंत्रं; D4 संस्मरन्मंत्रं; D9 स्मरते नित्यं (for संस्मरेन्मन्त्रं). M3 न स (for नासौ). —D2 om. (hapl.) l. 294–299. —(l. 294) B1.2 उक्त्वा (for उक्तो). Ñ V1.3 D1.3.4.6.7.9–11 T4 देवम् (for वाक्यम्). —D4 om. (hapl.) l. 295–300. Ñ1 reads l. 295 in marg. —(l. 295) T3 सौम्य; T4 नाथ (for देव). Ñ2 B D6.7.9–11 महाव्रत; V1.3 °प्रभो (for महाद्युते). T3.4 M3 (all with hiatus) अनुग्राह्यो यदि ह्यहं(T3 °यं) (for the post. half). —(l. 296) Ñ1 मंत्रस्तु मे; M3 मंत्रेश्वरो (for मन्त्रश्च मे). Ñ2 B4 देयो मे (by transp.); B2 देयो हि (for मे देयो). —(l. 297) Ś Ñ1 D2.4.8 जप्याहं; Ñ2 B4 जप्त्वा हि; V3 हि जप्य; D9 जप्त्वा च (for जप्त्वाहं). —(l. 298) M3 अमरेषु (for असुरेषु). B2 स (for च). —(l. 299) Note hiatus between the two halves. L (ed.) यत्- (for त्वत्-). Ś D3.9.12 च (for तु). V1 देवदेव; B2 च देवेषु (for तु देवेश). Ñ2 B1 D6.7.10.11 त्र्यामजेयो (by transp.); B3 तोषयामि; B4 D9 यतो यामि (for अजेयः स्यां). V3 D1.3 अहं प्र(D3 वि)मो (for न संशयः). B2 विजयी नात्र संशयः; M3 न भयं विद्यते मम (for the post. half). —(l. 300) Ñ2 उक्त्वा (for उक्तो). Ś D2.3.8 दशग्रीवो; Ñ1 दशास्येन (for दशग्रीवं). B4 रावणम् (for वचनम्). —After l. 300, Ś2 erroneously repeats l. 295–296. —(l. 301) Ñ B D6.7.9–11 जप्तव्यो (for ते दद्मि). D12 M3 प्राणात्यये जपेदं तन्(M3 तु वै दद्मि); T4

Aryan Research Institute

प्राणात्ययेषु ते दृष्टि न नित्यं राक्षसाधिप ।
अक्षसूत्रं गृहीत्वा तु जप मन्त्रमिमं सदा ।
जप्त्वा च राक्षसपते त्वमजेयो भविष्यसि ।
अजप्त्वा राक्षसश्रेष्ठ न ते सिद्धिर्भविष्यति ।
शृणु मन्त्रं प्रवक्ष्यामि येन राक्षसपुंगव । [305]
मन्त्रस्य कीर्तनादेव प्राप्स्यसे समरे जयम् ।
नमस्ते देवदेवेश सुरासुरनमस्कृत ।
भूतभव्य महादेव हरिपिङ्गललोचन ।
बालस्त्वं वृद्धरूपी च वैयाघ्रवसनच्छद ।
अर्चनीयोऽसि देव त्वं त्रैलोक्यप्रभुरीश्वरः । [310]
हरो हरितनेमी च युगान्तदहनोऽनलः ।

गणेशो लोकशम्भुश्च लोकपालो महाभुजः ।
महाभागो महाशूली महादंष्ट्रो महेश्वरः ।
कालश्च कालरूपी च नीलग्रीवो महोदरः ।
देवान्तकस्तपोऽन्तश्च पशूनां पतिरव्ययः । [315]
शूलपाणिर्बृहत्केतुर्नेता गोप्ता हरो हरिः ।
जटी मुण्डी शिखण्डी च लगुडी च महायशाः ।
भूतेश्वरो गणाध्यक्षः सर्वात्मा सर्वभावनः ।
सर्वगः सर्वहारी च स्रष्टा च गुरुरव्ययः ।
कमण्डलुधरो देवः पिनाकी झर्झरी तथा । [320]
माननीयोऽर्चनीयश्च ओंकारो ज्येष्ठसामगः ।
मृत्युश्च मृत्युदूतश्च पारिजातश्च सुव्रतः ।

प्राणात्यये * * * * (damaged) (for the prior half). D12 राक्षसेश्वर. —(l. 302) V1 अथ सूत्रं; D8 अक्षसूत्रं (for अक्षसूत्रं). Ś Ñ1 D2.8.12 च (for तु). Ñ2 B2.3 D6.12 जपन्; V1.3 D7.9–11 T3.4 M3 जपेन् (for जप). Ñ2 शुभं; V1 B D9 प्रभो; D1.4.6.7.10.11 T2.4 M3 शुभं; D3 सुत (for सदा). Ñ1 जपेन्मंत्रं सदा व्रती (for the post. half). —M3 om. l. 303. —(l. 303) Ñ V1 B1.3.4 D1.3.4.6.7.10.11 T3.4 तु; B2 वै (for च). D12 राक्षस तेन (unmetric) (for राक्षसपते). B3 त्वयाजेयो भविष्यति (for the post. half). —D9 om.; Ñ1 reads in marg. l. 304. —(l. 304) Ñ2 D6.7.10.11 राक्षसपते (for °श्रेष्ठ). D6 om. ते (subm.). —(l. 305) T4 प्रदास्यामि (for प्रवक्ष्यामि). V3 तव (for येन). —(l. 306) D1.4 मंत्रसं- (for मन्त्रस्य). Ś D2.8.12 परमं जयं; D1.3.4 जयमुत्तमं (for समरे जयम्). —Before l. 307, D4 ins. श्री; T4 ins. ॐ. —(l. 307) D3 om. देव-. B3 सर्वलोक- (for सुरासुर-). Ñ2 V1 B3.4 D3.4 -नमस्कृतः. —B3 om. l. 308. B4 transp. l. 308 and 309. —(l. 308) B4 -भवन्नाथ (for महादेव). D10.11 T3 M3 हर- (for हरि-). Ñ2 D4 -लोचनः. —(l. 309) B3 बुद्धिरूपी (for वृद्ध°). V3 om. च (subm.). Ś D2.8.12 -परिवारणः (D2 °ण); Ñ1 V1.3 D1.3.4.9 -वसनच्छदः (for -वसनच्छद). —(l. 310) Ś Ñ1 D2.8.12 अर्हणीयोसि; V1 D1.3.4 T3 M3 आर्(M3 °रु ,णे(T3 °णी)योसि (for अर्चनीयोऽसि). Ś D2.8.12 देवस्त्वं; Ñ1 देवेश (for देव त्वं). B2.4 T3 -प्रभुरव्ययः. —D8 om. (hapl.) l. 310–313. Ś2 reads l. 311–314 in marg. —(l. 311) Ś Ñ1 V3 D12 हरितरोमा; V1 °नेमा; D1.3.4 °केशी; D2 °रोमी; T2.4 M3 °नेमिस् (for हरितनेमी). T2.4 M3 त्वं (for च). V1 (with hiatus) आगंतुर्; B3 युगांतः (for युगान्त-). Ś D2.8.12 -करलोचन; V1 गहनोनलः; V3 D3 -कमलो(D3 °ला)नलः; B1 -करणोनलः; B2 (m. also -करण-लोचनः [hypm.]) -करणोनिलः; B3 कमललोचनः (hypm.); B4 -कमनोनिलः; D1.4 -समयोनलः (for -दहनोऽनलः). Ñ1 युगांताक्षीणीलोनिलः (corrupt) (for the post. half). —(l. 312) D1.4 गंगेशो (for गणेशो). Ś1 -शंभुषु; Ś2.3 D12 -शुश्रूषुर्; D9 -विस्रब्धः (for -शम्भुश्च). B2 लोकनाथो; B3 °साक्षी (for लोकपालो). Ñ1 महाजनः; T4 G (ed.) °बलः (for °भुजः). —(l. 313) Ñ2 B4 D11 महाभोगो; V3 °हामो; B3 °भीमो; D2 °योगी; T3 M3 °देवो (for महाभागो). D1.4 महामूलो; T3 °शूरो (for °शूली). Ś D12 महाशूली महायोगी (for the prior half). Ś1 महादंडो; Ñ2 D3.6.7.10.11 °दंष्ट्री; B1.2 महान्द्रष्टा; B3 महादंतो; B4 D1.4 °दंडी (for महादंष्ट्रो). Ś2.3 महोरगः; M3 महाभुजः (for महेश्वरः). —V3 om. l. 314–315. —(l. 314) B1.2 कालस्य (for कालश्च). D10.11 बलरूपी (for काल°). D9 लोकश्चाकालरूपी च (for the prior half). D1.4 महेश्वरः (for महोदरः). —After l. 314, Ś2.3 ins.:

22* स देवो वा तथा * * * * * * * * * * । (lacuna)

—V1 om. l. 315. —(l. 315) Ñ1 देवांतश्च; D1.4 T3.4 वेदांतगस्; D2.9–11 देवांतगस्; D6 वेदांतकस् (for देवान्तकस्). Ñ2 तपांतश्च; B1.2 तपोनंतः; B3 सुखानंतः (for तपोऽन्तश्च). Ś1 D12 सु(D12 स)देवो वातकेतुश्च; Ś2.3 D8 * * वातग(D8 °रा)योंतश्च; M3 वेदांतगो वेदमयः (for the prior half). D9 ईश्वरः (for अव्ययः). —(l. 316) D3 शूलपाश- (for शूलपाणिर्). Ñ1 V1.3 वृषत्केतुर्; Ñ2 B D9–11 वृष(D9.11 °षः)केतुर्; D1.3.4 वृषांकश्च; D6.7 वृषाकेतुर् (for बृहत्केतुर्). T3 M3 शूलभृ(M3 °धृ)च्छूलकेतुश्च; T4 वृषकेतुः शूलपाणिः (for the prior half). D1.4 देव-; D3 वेद- (for नेता). Ś1 हरिर्हरी; Ś2.3 D8.12 हरिर्हरः (by transp.); V3 हरोहरः; M3 हरिः शिवः (for हरो हरिः). —(l. 317) Ñ1 V1 B1–3 मौंजी; V3 मौली; B4 मौंडी (for मुण्डी). Ñ V1.3 B D9 T4 मुकुटी; D6.7.10.11 लकुटी (for लगुडी). M3 लगुचंडी (for लगुडी च). —(l. 318) Ś D2.8.12 प्रेतेश्वरो; Ñ1 शूलचरो; B1 वृषेश्वरो; D1.3.4 सर्वेश्वरो (for भूतेश्वरो). —D11 reads from the post. half up to l. 319 in marg. Ś B1.2 D8 भूतभावनः; Ñ2 B4 सर्वसंभवः; T3 सप्रभावनः (for सर्वभावनः). —(l. 319) M3 सर्वदः. V3 सर्वहा स्रष्टा; B D9 सर्वकारी(B3.4 °मी) च; T3 सर्वहारी च (for सर्वहारी च). V3 पुरुरक्षपरोव्ययः (for the post. half). —(l. 320) B4 वीरः (for देवः). Ś1 Ñ2 V1 B त्रिशरी; Ś2.3 जर्जरी; Ñ1 V3 च शरी; D2 कर्करी; D6 त्रिशुली; D7.10.11 T3.4 M3 धूर्जटिस्(D7 °टी); D9 ऋषभी; D12 जर्फरी (for झर्झरी). —(l. 321) Note hiatus between the two halves. Ñ2 B D6.7.9–12 (all with hiatus) च ओंकारो; T3.4 M3 [ऽ]र्हणीयश्च (for र्चनीयश्च). Ñ2 B D6.7.9–11 वरि(B4 °शि)ष्ठो; T3 ज्याकारो (for ओंकारो). Ś D12 [ऽ]ष्यथ (for ज्येष्ठ-). D9 -सागरः (for -सामगः). Ś2.3 D8 ओंकारोथ समागमः; M3 ओंकारः

Anjaneya Research Team

ब्रह्मचारी गुहावासी वीणापणवतूणवान् ।
अमरो दर्शनीयश्च बालसूर्यनिभस्तथा ।
श्मशानचारी भगवानुमापतिररिंदमः । [325]
भगस्याक्षिनिपाती च पूष्णो दशननाशनः ।
ज्वरकर्ता पाशहस्तः प्रलयः काल एव च ।
उल्कामुखोऽग्निकेतुश्च मुनिर्दीप्तो विशांपतिः ।
उन्मादो विमदाकारश्चतुर्थो लोकसत्तमः ।
वामनो वामदेवश्च प्रादक्षिण्यश्च वामनः । [330]
भिक्षुश्च भिक्षुरूपी च त्रिजटी जटिलः स्वयम् ।
शक्रहस्तप्रतिष्टम्भी वसूनां स्तम्भनस्तथा ।

ऋतुर्ऋतुकरः कालो मधुर्मधुकलोचनः ।
वानस्पत्यो वाजसनो नित्यमाश्रमपूजितः ।
जगद्धाता च कर्ता च पुरुषः शाश्वतो ध्रुवः । [335]
धर्माध्यक्षो विरूपाक्षस्त्रिवर्त्मा भूतभावनः ।
त्रिनेत्रो बहुरूपश्च सूर्यायुतसमप्रभः ।
देवदेवोऽतिदेवश्च चन्द्राङ्कितजटस्तथा ।
नर्तको लासकश्चैव पूर्णेन्दुसदृशाननः ।
ब्रह्मण्यश्च शरण्यश्च सर्वबीजमयस्तथा । [340]
सर्वतूर्यनिनादी च सर्वबन्धविमोचकः ।
मोहनो बन्धनश्चैव सर्वधारी नरोत्तमः ।

सामवेदगः (for the post. half). —(l. 322) Ñ V1.3 B3.4 D3.6.9–11 T4 मृत्युभूतश्; D1 °हंता (for °दूतश्). Ñ V1 B पारियात्रश्; D1.3.4.6.7.9–11 T3.4 M3 पारियात्रश् (for °जातश्). Ś2.3 D8 सुव्रतः; D9 (with hiatus) च अव्ययः (for च सुव्रतः). —(l. 323) T4 गृहे वासी; M3 गृही योगी (for गुहावासी). Ś Ñ1 V1.3 D2.8 वाणी-; B3 वेणी- (for वीणा-). Ś2.3 D8.12 -पाणव-; D9 -पल्लव- (for -पणव-). Ś1 V1 D12 -वेणुवान्; Ś2 Ñ1 V3 -तूर्णवान्; Ñ2 B4 D3 -तूर्यवान् (for -तूणवान्). —(l. 324) D7 अपरो (for अमरो). B3 M3 तदा (for तथा). D12 बालसूर्यो नभस्तथा (for the post. half). —(l. 325) Ñ2 V1 D6.7.10.11 श्मशानवासी (for °चारी). Ñ2 B1–3 D1.3.4.6.7.9–11 अनिंदितः (for अरिंदमः). —(l. 326) D12 मृत्योर् (for पूष्णो). Ñ1 V3 D1.3.4 दशनपातनः; B3 D9 °नाशकः; T3 दंतनिपातनः (for दशननाशनः). V1 विपूर्णो दशनपातनः (hypm.) (for the post. half). M3 भगनेत्रप्रहर्ता च पूषदंतनिपातनः. —(l. 327) Ñ B3 D6.7.10.11 M3 ज्वरहर्ता; D3 क्षरकर्ता; D9 ज्वरहस्तः (for ज्वरकर्ता). B1 पाशहंतः (for °हस्तः). —(l. 328) B1.2 (m. also as above) मुनिकृष्णो; B3 मुनिपृष्ठे; D1 मुनिक्षिप्ते; G (ed.) मुनिसिद्धो (for मुनिर्दीप्तो). D1.4 दिशां पतिः; D8 द्विषां पतिः (for विशांपतिः). —(l. 329) D6 उन्नादो; D12 उन्मादी (for उन्मादो). Ñ V3 B1.2.4 D1.3.4.6.7.10.11 T3.4 वेष(Ñ1 °ख; B4 T3 °द; D6 °म) नकरश्; V1 वैकालकरश्; B3 D9 वेषनः(D9 °ना) पाणिश्; D2 विमनाकारश् (for विमदाकारश्). B1 च गणो (for चतुर्थो). V1 लोकशंकरः; T3 (metricausa) लोकउत्तमः (for लोकसत्तमः). M3 उन्मादमोहनकरः समर्थस्त्रिदशोत्तमः. —(l. 330) Ñ1 V1 B3 D3 प्राग्दक्षिणश्च (unmetric); Ñ2 V3 D6.7.10.11 प्राग्प्रदक्षिण-; B1.2 व्यक्षो दक्षिण-; B4 प्राहुदक्षिण-; D1.4 T3.4 M3 प्राग्दक्षिण्यश्च; D9 प्रागदक्षिण-; D12 प्रदक्षिणश्च (unmetric); G (ed.) प्राच्यदक्षिण- (for प्रादक्षिण्यश्च). T3.4 M3 नामतः (for वामनः). —(l. 331) B1.2 T3.4 त्रिदंडी (for त्रिजटी). B1–3 जटिनः; D6.7.10 कुटिलः; D11 **लः; T3 च जटी (for जटिलः). —(l. 332) Ñ1 B2 T3.4 M3 चक्रहस्तः(Ñ1 °स्त-); Ñ2 V1 B4 शत्रुहस्त-; V3 B3 शस्त्रहस्तः; D1.3.4 शक्तिहस्तः; L (ed.) शस्त्र° (for शक्रहस्त-). Ñ1 V1 D1–4 प्रविष्टंभी; B1–3 परिष्टंभी; T3 -प्रतिष्ठांगो; L (ed.) -प्रवष्टंभी (for -प्रतिष्टम्भी). Ñ1 V1 D1.3.4 M3 चमूनां (for वसूनां). B4 संभवस् (for स्तम्भनस्). Ś D2.8.12 चमू(D8 वसू)स्तंभन एव च; V3 चमूवान्शुभदस्तथा (for the post. half). —(l. 333) Ś D2.8.12 ऋतानृतकरः; Ñ1 मत्तो ऋतुः; V3 B1 D9 मंत्रो ऋतुः; B3 महाऋतुः; B4 मंत्रो धातुः; D6 ऋतऋतुः (for ऋतुर्ऋतुकरः). T3.4 M4 मधुर- (for मधुक-). B1.4 मधुर्मधुकरो वरः; B2 मधुशर्करो वरः (subm.) (for the post. half). —(l. 334) Ś2 वनस्पत्यो. Ś1 Ñ V1.3 B4 D3.4 वाजिसनो; Ś2.3 D8.12 वाजिसना; B3 वाजिमेधी; T3 वाजिकरोः; T4 G(ed.) वाजिसेनो; M3 श्रीकरश्च; K (ed.) शीकरश्च; L (ed.) वाजसनिर् (for वाजसनो). —(l. 335) B1.2 जगद्धर्ता; B3 जगन्नाथश्. V3 च कवची (for च कर्ता च). T3 जनः; T4 [ऽ]जिनः; M3 ह्यजः (for ध्रुवः). —(l. 336) Ñ1 कर्माध्यक्षो. V1 D6.7.9–11 त्रिधर्मा; B3 त्रिरला; D1.4 सुधर्मा; T4 damaged; G (ed.) त्रिधर्मो (for त्रिवर्त्मा). B3 भूतजीविनः (for °भावनः). —B3 om. l. 337. —(l. 337) T3 द्विनेत्रो. Ñ1 V1.3 D1.3.4 T3 M3 बहुनेत्रश्; B1.2 D9 T4 वह्निरूपश्; B4 वस्तिरूपश् (for बहुरूपश्). —V3 om. from the post. half up to prior half of l. 342. D9 सूर्यातप- (for °युत-). —(l. 338) M3 [ऽ]धि-; K (ed.) [ऽ]भि- (for ऽति-). Ñ1 देवो देवाधिदेवश्च; D3 देवोतिदेवश्चेंद्रश्च (for the prior half). Ñ2 B4 D9 चंद्रार्पित- (for चन्द्राङ्कित-). D12 -रजस् (for -जटस्). B3 चंद्रान्वितजटाधरः; D6 मृगांकिमुकुटस्तथा (for the post. half). —(l. 339) Ś1.2 D2.8.12 नृत्तको(D2 °की) (for नर्तको). B4 नायकश्; D3 लोहकश् (for लासकश्). D6 नर्तस्सोल्लासकश्चैव (for the prior half). Ś D8 -छविः; D12 -प्रभः (for -[आ]ननः). D1.4 पूज्यश्चैव महोत्कटः (for the post. half). —Ś B1 D8.12 om. l. 340. B2 reads l. 340 after l. 344. —(l. 340) M3 सुब्रह्मण्यः (for ब्रह्मण्यश्च). G (ed.) वरेण्यश् (for शरण्यश्). Ñ1 V1 D1.3.4 T3.4 M3 -देवमयस्; Ñ2 D7.10.11 -जीवमयस्; D6 -जीवसमस् (for -बीजमयस्). —After l. 340, D3 ins.:

23* अभिवाद्यो महाकर्मा तपस्वी भूतभावनः ।

—B3 om. l. 341–343. —(l. 341) Ś1 Ñ2 B1.4 D9 T3.4 M3 सर्वभूत-; Ś2.3 D8 सर्वरूपी (for सर्वतूर्य-). B1.4 -विनोदी; D9 T3.4 M3 -निवासी(M3 °सश्) (for -निनादी). Ś2.3 D8 सर्वगंध-; D12 °बंधु-; T4 G (ed.) °भूत- (for सर्वबन्ध-). Ñ1 B1.2.4 -विमोक्षणः; Ñ2 D6.7.11 -विमोक्षकः; V1 D1.3.4 -विमोचनः (for -विमोचकः). —(l. 342) T3 M3 वंचन(M3 °*)श्; K (ed.) वंचकश् (for बन्धनश्). V3 सर्वदामी; D8.12 सर्वभारी; T3 सर्पधारी (for सर्वधारी). Ñ1 V1 D1.3.4 धरोत्तमः; V3 T3 M3 वरोत्तमः

Arya Research Team

पुष्पदन्तो विभागश्च मुख्यः सर्वहरस्तथा ।
हरिश्मश्रुर्धनुर्धारी भीमो भीमपराक्रमः ।
मया प्रोक्तमिदं पुण्यं नामाष्टशतमुत्तमम् । [345]
जप्यमेतद्दशग्रीव कुर्याच्छत्रुविनाशनम् ।

Colophon

दत्त्वा तु रावणस्येदं वरं स कमलोद्भवः ।
पुनरेवागमत्क्षिप्रं ब्रह्मलोकं सनातनः ।

2

Ñ2 B D6.7.10.11 cont. after App. I, No. 1; Ś Ñ1 V1.3 D1–5.8.9.12 T4 M3 ins. after Sarga 30 :

केनचित्त्वथ कालेन रावणः प्रययौ गृहात् ।
पश्चिमार्णवमागच्छत्सचिवैः सह राक्षसः ।
द्वीपस्थो दृश्यते तत्र पुरुषः पावकप्रभः ।
महाजाम्बूनदप्रख्य एक एव व्यवस्थितः ।
दृश्यते भीषणाकारो युगान्तानल उत्थितः । [5]
देवानामिव देवेशो ग्रहाणामिव भास्करः ।
शरभाणां यथा सिंहो हस्तिष्वैरावणो यथा ।
पर्वतानां यथा मेरुः पारिजातश्च शाखिनाम् ।
तथा तं पुरुषं दृष्ट्वा स्थितं मध्येऽनलं यथा ।
अब्रवीत्तं दशग्रीवो युद्धं मे दीयतामिति । [10]
अभवत्तस्य सा दृष्टिर्ग्रहमाला इवाकुला ।

(for नरोत्तमः). Ñ2 D6.7.9–11 सर्वदो(D6.10.11 °दा) निधनोत्तमः; B1.2.4 सर्वदो निधनो(B2 धनदो)व्ययः; T4 सर्वथा खेचरोत्तमः (for the post. half).—(l. 343) D9 पुष्पदंत-. Ś D8.12 विश्रवाश्; Ñ1 V3 विभानुश्; D2 T3 विभावश्; L(ed.) विश्वपाश् (for विभागश्). V1 मुखी (for मुख्यः). Ś1 स्मर-; Ś2.3 सह- (for सर्व-).—(l. 344) D12 हरिश्रेष्ठो (for °श्मश्रुर्). T3.4 M3 धराधारी (for धनुर्धारी). V1 हरिः शत्रुवरधारी (for the prior half).—After l. 344, M3 ins. :

24* भक्ताभीष्टप्रदः स्थाणुः परमात्मा सनातनः ।

—(l. 345) Ś V1 D1–4.8.12 ब्रह्मप्रोक्तम्; T3 ब्रह्मणोक्तम्; T4 ब्रह्मन्मंत्रम् (for मया प्रोक्तम्). K(ed.) नाम्नामष्टोत्तरं शतं (for the post. half).—After l. 345, Ñ2 D6.7.9–11 ins. :

25* सर्वपापहरं दिव्यं शरण्यं शरणार्थिनाम् ।
[Ñ2 om.; D10.11 पुण्यं (for दिव्यं).]

—(l. 346) Ñ2 D1.3.4.6.10.11 जप्तम्; D7 सत्यम्; D9 जाप्यम्; D12 ज*म् (for जप्यम्). M3 एव (for एतद्). D12 भय- (for शत्रु-). B2 -विमर्दनं (for -विनाशनम्).

Colophon. M3 om. B2 reads colophon after 26*. —*Sarga name*: Ś D8 ब्रह्मप्रोक्तो महादेवनामाष्टशत(D8 °शतस्तवः); Ñ1 V3 रुद्रनामाष्टशतं(Ñ1 °तं ब्रह्मप्रोक्तं); Ñ2 B1.3 D7 ब्रह्मप्रोक्तो (B1 D7 °क्त)महास्तवः; V1 रुद्रस्याष्टशतं; B2 ब्रह्मोक्तस्तवराजः; B4 ब्रह्मोक्तमहापुरुषस्तवः; D1–4 ब्रह्मप्रोक्तस्तवः; D6 नामाधिकः; D9 ब्रह्मप्रोक्तो महापुरुषस्तवः; D12 महेश्वरस्तवः; L(ed.) ब्रह्मप्रोक्तो महादेवाष्टशतस्तवः.—*Sarga no.* (figures, words or both): Ś Ñ1 V3 B1–3 D2.7.12 om.; Ñ2 27; V1 24; B4 D1.4 30; D3.9 T4 29; D6 additional Sarga 3; D8 T3 28; D10.11 additional Sarga 4.—After colophon, T4 concludes with श्रीरामार्पणमस्तु.

—B1 D9 om. l. 347–348. Before l. 347, Ś2 ins. ॐ. —(l. 347) Ś B1 D8.9 च; V1 D12 [अ]थ (for तु). Ñ V1.3 D1.3.4.6.7.10.11 T4 [ए]वं; B4 [ए]नं; D6 [ए]व (for [इ]दं). Ñ1 V3 मंत्रं (for वरं). T4 कमलसंभवः (for स कमलोद्भवः).—(l. 348) M3 जगामाशु (for [आ]गमत्क्षिप्रं). Ñ2 D6.7.11 पितामहः; V1 B2–4 D1.3.4.12 T3.4 M3 सनातनं (for सनातनः). D10 ब्रह्मा लोकपितामहः (for the post. half). —After l. 348, Ñ2 B2–4 D6.7.10.11 T4 ins. :

26* रावणोऽपि वरं लब्ध्वा पुनरेवागमत्तथा ।

[Cf. 461*. T4 तु (for ऽपि). Ñ2 B3.4 तदा (for तथा).]

2

D12 begins with ॐ.—(l. 1) T4 कस्यचित् (for केनचित्). B3 सुकालेन (for [अ]थ कालेन). Ñ2 B D6.7.10.11 लोकरावणः; D1.3.4 नारदाज्ञया (for प्रययौ गृहात्).—(l. 2) Ñ1 राक्षसैः सह; B2 M3 सह राक्षसैः; D5 सह रावणः (for सह राक्षसः).—(l. 3) B2 D1.3.4 M3 ददृशे तेन(B2 तत्र) (for दृश्यते तत्र). D3 पावकर्षभः. Ś Ñ1 D2.5.8.9.12 द्वीपस्थं पश्यते त(Ñ1 दृष्टवान्)त्र पुरुषं पावकप्रभं.—(l. 4) D1.4 शुद्ध- (for महा-). Ñ1 -प्रख्यं; D3 -प्लक्ष (for -प्रख्य). Ñ1 एकमेव व्यवस्थितं (for the post. half).—For l. 4, Ś D2.5.8.9.12 subst.; while Ñ1 ins. after l. 3 :

1* महान्तं कनकाकारमेकमेव व्यवस्थितम् ।

[D2.9 हाटकाकारम्; D5 हाटकप्रभम् (for कनकाकारम्). Ñ1 एकांते पर्यवस्थितं (for the post. half).]

—(l. 5) D1.3.4 भयदो घोरो (for भीषणाकारो). Ś Ñ1 V1.3 D2.5.8.9.12 T4 M3 यदा(Ñ1 V3 D5.9 T4 यथा; V1 अथा; D8 तदा; M3 *था) दृश्ये(T4 °श्य)त भयदो (for the prior half). D8 -[अ]ग्नि* (for -[अ]नल). Ñ2 B D6.7.10.11 -[अ]न (B4 नि)लसंनिभः; D2.5.9 -[अ]नलवत्स्थितः (for -[अ]नल उत्थितः).—(l. 6) Ś V1 एव; Ñ1 D6 अपि (for इव). Ñ1 अपि (for second इव).—(l. 7) Ś D8.12 वारणानां; V1 मृगाणां च; V3 श्वापदानां; B2 M3 मृगाणां तु; D1.3.4 चतुष्पदां; D9 ऋषभाणां (for शरभाणां). D5 चतुष्पदानां सिंहो वै (for the prior half). —D4 om. from हस्तिषु up to समाश्रित्य in l. 40. D2 हस्तिश्च (for हस्तिषु). Ñ2 B1.3.4 D6.7.10.11 M3 [ऐ]रावतो (for [ऐ]रावणो). B3 हस्तिनां रावणो.—(l. 8) V1 परिपत्रश् (for पारिजातश्). —(l. 9) D9 यथा (for तथा). M3 कुंडमध्ये. Ñ2 B2–4 D6.7.10.11 महाबलं(B2 °लः); B1 महाणवे (for ऽनलं यथा). D1.3 स्थितं दीप्तानलप्रभं (for the post. half).—M3 reads l. 10 and l. 13 after l. 23.—(l. 10) Ñ2 B1–3 D6.7.10.11 च; B4 स (for तं).—M3 reads l. 11–12 after l. 30.—(l. 11) V3 अवर्तत् (for अभवत्). Ś V1

दन्तानां दशतः शब्दो यत्रास्येवाभिमिद्यतः।
जगर्ज चोच्चैर्बलवान्सहामात्यैर्दशाननः।
स गर्जन्निविधैर्नादैर्लम्बहस्तं भयानकम्।
दंष्ट्रालं विकटं चैव कम्बुग्रीवं महोरसम्। [15]
मण्डूककुक्षिं सिंहास्यं कैलासशिखरोपमम्।
पद्मपादतलं भीमं रक्ततालुकराम्बुजम्।
महानादं महाकायं मनोऽनिलसमं जवे।
भीममाबद्धतूणीरं सघण्टाबद्धचामरम्।
ज्वालामालापरिक्षिप्तं किङ्किणीकृतनिःस्वनम्। [20]
मालया स्वर्णपद्मानां कटिदेशावलम्बया।

ऋग्वेदमिव शोभन्तं पद्ममालाविभूषितम्।
सोऽञ्जनाचलसंकाशः काञ्चनाचलसंनिभम्।
प्राहरद्राक्षसपतिः शूलशक्त्यृष्टिपट्टिशैः।
स द्वीपिना सिंह इव शरभेणेव कुञ्जरः। [25]
सुमेरुरिव नागेन नदीवेगैरिवार्णवः।
अकम्पमानः पुरुषो राक्षसं वाक्यमब्रवीत्।
युद्धश्रद्धां हि ते रक्षो नाशयिष्यामि दुर्मते।
रावणस्य च यो वेगः सर्वलोकभयंकरः।
तथा वेगसहस्राणि संश्रितानि तमेव हि। [30]
धर्मस्तस्य तपश्चैव जगतः सिद्धिहेतुकौ।

D8.12 ग्रहमाना (for ग्रहमाला). Ś D8.12 [आ]स्थिता; Ñ1 [उ]द्भुता; V3 D2.5.9 [अ]द्भुता (D2 °तं); B द्रुतं; L(ed.) स्थिता (for [आ]कुला). D1.3 ग्रहमालेव विद्रुता; T4 M3 बला (M3 ग्रह)मालेव चाद्भुता (for the post. half). —(l. 12) B1-3 D6.7.10.11 दंतान्सं- (for दन्तानां). V3 D1.2.5 दशनः (for दशतः). D2 दशनशब्दो (unmetric). Ś D8.12 प्रपीडितः; Ñ1 D1-3.5 T4 [अ]तिवाह्य (Ñ1 °द्य)तः (D2 तं); V1.3 B2.3 [अ]भिवाद्यतः; M3 [अ]तिभीकरः (for [अ]भिभिद्यतः). B1 पर्वतस्येव भिद्यतः; D9 मंत्रस्येवेति बाह्यतः (for the post. half). —(l. 13) Ñ2 जगर्जतः स; B1.2 D6.7.10.11 जगर्जोच्चैः स (B1.2 om. स [subm.]); B3.4 जगर्जतोच्चैर्; D3 जगर्ज वाचैर् (for जगर्ज चोच्चैर्). Ñ2 V3 B1.2.4 D6.7.10.11 M3 सहामात्यो; B3 स्वस्वामात्यैर् (for सहामात्यैर्). D2 सहामात्यं दशाननं (for the post. half). —(l. 14) V1.3 D5 जगर्ज; T4 ससर्ज; M3 गर्जंतं (for स गर्जन्). D9 अविधैर् (for विविधैर्). Ś B2.3 D8.12 लघु-; V1 शूल- (for लम्ब-). —B3 om. l. 15. —(l. 15) D1.3.5 विकचं (for विकटं). Ś1 V1 D8.12 [ए]कं (for [ए]व). Ś2.3 दंष्ट्राकरालं विकटं (for the prior half). Ś Ñ1 V1.3 D8.12 सरो (Ñ1 V1 °लो)मशं; Ñ2 B4 महोरगं; B1.2 (also as above) महोदरं; D9 मनोरमं; M3 महौजसं (for महोरसम्). D1-3.5 T4 कंबुग्रीवमरोमशं (T4 °नौपमं) (for the post. half). —(l. 16) Ś2.3 D8 मांडूक-. Ś Ñ1 D1-3.5.8.9.12 M3 पिंगाक्षं; Ñ2 B4 T4 सिंहाक्षं (for सिंहास्यं). V1 मंदकुक्षिं पिशंगाक्षं; V3 निमग्न कुक्षिपिंगाक्षं; B1 D6 मंडूककुक्षिसिंहास्यं (for the prior half). —D5 om. l. 17-19. —(l. 17) Ś V1 D2 -ताल-; Ñ1 -तालुं; N2 B4 -पद्म-; B1 -ताम्र- (for -तालु-). Ś V1 D2.8.9 -वरां (D2.9 -तलां)बुजं; Ñ1 तलांबुजं; T4 -मुखांबुजं (for -कराम्बुजम्). V3 रक्तं तालुं तलाद्भुतं; M3 रक्तांबुजनिभाननं (for the post. half). —(l. 18) B2 महाकायं (for महाकायं). B1 महाकायं महानादं (for the prior half). Ś Ñ1 V1.3 D2.8.9.12 T4 M3 transp. महानादं and महाकायं. Ñ1 जवं (for जवे). —(l. 19) D2 अवाप्य (for आबद्ध-). Ś3 -कुलिशं (for -तूणीरं). Ś D8.12 सशरं बद्ध-; V1 सघंटारव-; D3 घंटाभाबद्ध- (for सघण्टाबद्ध-). V3 -रावणं (for -चामरम्). —(l. 20) D1 तारा- (for ज्वाला-). D2.3.9 -मालां. D1.5 -परिक्षिप्ता (for °प्तं). D1 किंकणी-. Ñ B3 D6.7.10.11 -जाल (Ñ1 °र)निस्वनं; V1.3 B4 D1.3.12 T4 M3 -कृत (V1 -भूत) निस्वनं (for -कृतनिःस्वनम्). —(l. 21) Ś स्वर्णपर्णानां; B1 स्वर्णपद्माभं; B4 पद्मसंघानां (for स्वर्णपद्मानां). Ñ1 B1-3 कक्षो- (Ñ1 °क्षौ); V1 B4 D1.2.5.9 T4 M3 वक्षो- (for कटि-). B1.2 D1.3 कक्षोद्देश- (for कटिदेश-). Ñ2 D6.7.10.11 कंठदेशेवलंबया (for the post. half). —(l. 22) V3 नरेंद्रम् (for ऋग्वेदम्). Ś D8.12 सामासं (for शोभन्तं). D8 -माली (for -माला-). B3 -विभूषणं (for -विभूषितम्). —(l. 23) D3 सांजनाचल-. Ñ B4 D10.11 T4 -संकाशं (for -संकाशः). Ś D2.8.9 अंज(D2.9 कांच)नाचलसंकाशं; D5 दिव्यगंधानुलिप्तांगम्; D12 सांजनाजलसंकाशं (for the prior half). Ś D8.12 कनकाचल-; D5 आंजनाचल- (for काञ्चनाचल-). B2 -संनिभः (for -संनिभम्). —(l. 24) Ñ1 प्रहरद्; D2 प्रहाराद्; M3 धृत्वा स (for प्राहरद्). D12 राक्षसपतिं. B2 D12 -शक्तृष्टि-; D5 -शक्त्यष्टिं; D6.11 M3 -शक्त्युष्टि-; D9 -शक्त्याष्टि- (for -शक्त्यृष्टि-). Ś D8.12 T4 -तोमरैः; M3 -पट्टसान् (for -पट्टिशैः). —(l. 25) Ñ2 D1.6.7.10.11 द्वीपिना स (by transp.); B3 द्वीपिना च (for स द्वीपिना). B1 द्वीपिना सिंह इव स (for the prior half). Ñ1 V1 B2 (m. also as above) D3.9 करभेन; Ñ2 D6.7.10.11 ऋषभेण; V3 D5 करभेण; T4 कलभेन; M3 शलभेन (for शरभेण). B1.3 D2.5.6 [ए]व (for [इ]व). —(l. 26) Ś1.2 Ñ1 सुमेरुम्; V1 सुपर्ण (for सुमेरुर्). Ñ2 B D6.7.10.11 नागेंद्रैर्; M3 भागेन (for नागेन). V3 -वेगम् (for -वेगैर्). D1 [अ]र्णवाः. —(l. 27) Ś Ñ1 V1 D2.3.5.8.12 T4 M3 अकंप्यमानः; Ñ2 B3.4 सो (B3 सं)कंपमानः (for अकम्पमानः). D2 पुरुषं (for पुरुषो). B2 M3 रावणं; D2.12 राक्षसो (for राक्षसं). —(l. 28) D12 युद्धे (for युद्ध-). D6 -श्रद्धा. D1 [अ]हं (for ते). Ñ1 वीर (for रक्षो). —(l. 29) B1 [अ]पि (for च). Ś Ñ1 V1.3 D1-3.5.8.9.12 T4 M3 -भयावहः (Ñ1 D1-3 °नकः) (for -भयंकरः). —(l. 30) V3 रथ-; D5 तस्माद् (for तथा). D1 संस्कृतानि; D3 संसृतानि; D9 संस्थितानि (for संश्रितानि). T4 तथा (for तम्). —(l. 31) Ñ2 B4 धर्मं (for धर्मस्). T4 चैव (for तस्य). V3 जपश् (for तपश्). Ñ1 धर्मस्य तपसश्चैव (for the prior half). Ś1.2 V1 D12 तपस; Ś3 D8 तमसः; D5 गर्जतः (for जगतः). V3 तस्य (for सिद्धि-). Ś V1.3 D1.3.8.12 M3 -हेतुके; Ñ1 -हेतुकं (for -हेतुकौ). —After l. 31, Ñ1 ins.:

2* तस्मिन्नेवाश्रयं मूले तस्य * * स्वदर्शिनः।

Apni Research Team

ऊरू ह्याश्रित्य तस्थाते मन्मथः शिश्नमाश्रितः ।
विश्वेदेवाः कटीभागे मरुतो वस्तिशीर्षयोः ।
मध्येऽष्टौ वसवस्तस्य समुद्राः कुक्षिसंस्थिताः ।
पार्श्वादिषु दिशः सर्वाः सर्वसंधिषु मारुतः । [35]
पितरश्चाश्रिताः पृष्ठं हृदयं च पितामहः ।
गोदानानि पवित्राणि भूमिदानानि यानि च ।
सुवर्णस्य च दानानि कक्षलोमानुगानि वै ।
हिमवान्हेमकूटश्च मन्दरो मेरुरेव च ।
नरं तु तं समाश्रित्य अस्थिभूता व्यवस्थिताः । [40]
मणिर्वज्रोऽभवत्तस्य शरीरे द्यौरवस्थिता ।
कुकाटिकायां संध्या च जलवाहाश्च मेहने ।
बाहू धाता विधाता च भगः पूषा च तौ करौ ।
शेषश्च वासुकिश्चैव विशालाक्ष इरावतः ।
कम्बलाश्वतरौ चोभौ कर्कोटकधनञ्जयौ । [45]
स च घोरविषो नागस्तक्षकः सोपतक्षकः ।
करजानाश्रितास्तस्य विषवीर्यं मुमुक्षवः ।
अग्निरास्यमभूत्तस्य स्कन्धौ रुद्रैरधिष्ठितौ ।
पक्षमासतैवश्चैव दंष्ट्रयोरुभयोः स्थिताः ।

—(l. 32) V1 B1.2 D2.5.12 T4 M3 संश्रित्य; D1 संसृत्य (for ह्याश्रित्य). Ś ऊरु संश्रित्य तस्थुस्ते; Ñ1 B4 ऊरुमाश्रित्य तिष्ठाते (Ñ1 रुद्रास्ते); V3 ऊरु संसृत्य ते तस्य; D3 ऊरु संवृत्य तु स्थाने; D8 वस्तू संश्रित्य तस्थुस्ते; D9 ऊर्ध्वं संश्रित्य * स्थाने (for the prior half). Ñ1 शिश्नमेव च; V3 हंतुमुद्यतः (corrupt); B4 D7.10.11 शिश्नमाश्रितः (for शिश्नमाश्रितः). —(l. 33) B2.3 कटि-; D5 गुह्य- (for कटी-). B2 -स्थाने; B4 -देशे (for -भागे). Ś Ñ2 B2 D2.6.7 मारुतो (for मरुतो). Ñ2 D6.7.10.11 वस्तिपार्श्वयोः; B3 वह्निशीर्षयोः; D1 वस्ति°; M3 यस्य शीर्षगाः (for वस्तिशीर्षयोः). —(l. 34) D2 तत्र; D5 सप्त (for तस्य). Ñ1 D2.5.9 T4 कुक्षिमाश्रि(D9 °स्थि)ताः; Ñ2 D6.7.10.11 कुक्षितः स्थिताः. —(l. 35) Ñ1 V3 D1–3.9 पार्श्वास्थिषु; B2 D5 M3 पार्श्वयो(M3 °स्था)श्च; B3 पार्श्वादिष्ट-; T4 पार्श्वदेशे (for पार्श्वादिषु). D2.5.9 सर्वे; G (ed.) पर्व- (for सर्व-). Ñ1 B D1–3.5.9 T4 M3 मारुताः; V1 देवताः (for मारुतः). —After l. 35, Ñ2 D6.7.10.11 ins.:

3* पृष्ठं च भगवान्रुद्रो हृदयं च पितामहः ।

—(l. 36) Ś Ñ1 D8.12 चास्थिताः; B4 संश्रिताः; D1 त्वाश्रिताः; D3 त्वासृताः; D5 च श्रिताः (for चाश्रिताः). Ś D8.12 पृष्ठे (for पृष्ठं). Ś D8.12 हृदये (for हृदयं). D5.10.11 पितामहाः. —(l. 37) D2 T4 विचित्राणि (for पवित्राणि). —Ś D2.8.12 om. (hapl.) l. 38–39. —(l. 38) Ñ2 B3.4 D6.7.10.11 G (ed.) सुवर्णवर (Ñ2 °कर; G [ed.] °धन)दानानि; B1.2 सुवर्णदानानि सदा (for the prior half). Ñ1 V1 B1 सकृल्लोक-(V1 °म-; B1 °तोम-); Ñ2 *कलोम-; B2–4 सु(B4 यद्)ह्लोम-; D1 तस्य लोम-; D7 कक्षो लोम- (for कक्षलोम-). D7.10 च (for वै). V3 सकृल्लोकानि यानि च; D2 यत्क्रियाकाश्च वै तथा; D3.5 L (ed.) यत्र(D5 °त्तद्) रोमानि (L [ed.] °णि) यानि वै(D5 च); D9 कर्माणि यानि वै सदा; D11 कक्षलोमानि यानि च; T4 M3 शिश्नलोमाश्रितानि वै; G (ed.)ह्लोमान्यनुगानि वै (for the post. half). —After l. 38, Ñ1 ins.:

4* तमेव संश्रितान्याहुर्विद्वांसो वेदपारगाः ।

—(l. 39) B3 D5 हिमकूटश् (for हेम°). —(l. 40) Note hiatus between the two halves. Ñ2 न वर्णं; D1.3 पुरुषं (for नरं तु). Ñ1 V1 B4 D2.9 transp. तु and तं. D2.5.9 समासाद्य; D3 समासृत्य (for समाश्रित्य). Ś D8.12 तानि सर्वाणि पाण्योश्च (for the prior half). Ś D8.12 सर्वभूता; Ñ1 V1 D2.5.9 T4 M3 ह्य(D9 स्व)स्थिभूता; B चास्थि° (for अस्थि°). D6.7.10.11 न्यवस्थिताः (for व्यव°). V3 ह्यस्थिभूताश्च संस्थिताः (for the post. half). —V1 om. (hapl.?) l. 41. —(l. 41) Ś D1.4.5.8.12 मणिवज्रो; Ñ2 B4 D6.7.10.11 पाणिर्वज्रो; V3 मणिमुक्तो; B1.2 मणिर्बंधे; B3 पाणिर्भुजो; D9 मेरुर्ध्वजो; T4 M3 महीं (T4 °णिर्)वक्षो (for मणिर्वज्रो). Ś Ñ1 D1.4.8.12 भवेत् (for ऽभवत्). D9 शरीरं. Ś Ñ1 V3 B1.2 D3.4.12 द्यौरि(Ñ1 D3.4 °र)व(V3 D12 °वा)स्थिता; D8 मेरिव स्थिता (corrupt); D9 द्यौरिव स्थितं (for द्यौरवस्थिता). D2 शरीरोद्यानतः स्थितः (for the post. half). —(l. 42) B1 कुकोटिकायां; D1.4.8.9 कुकी(D9 °का)ट(D4.8 टि)कायां (for कुकाटिकायां). B3 D1 संध्ये; D11 संध्यां (for संध्या). D3.4 [इ]व (for च). T4 M3 उमे (T4 *प)संधये कायसंधौ (for the prior half). Ś D8 जलवाहश्च; D6 जलवीराश्च; D9 जलदाश्चैव (for जलवाहाश्च). Ñ2 B D3.5–7.10.11 ये (D3.6 मे) घनाः (for मेहने). —(l. 43) Ñ2 V1 D4.8.10.11 बाहु-; B1.4 बाहौ (for बाहू). D8 पीना (for धाता). Ñ1 transp. धाता and विधाता. D1 om. च (subm.). D5 बलौ; T4 M3 (both with hiatus) उभौ (for च तौ). Ñ2 B1.3.4 D6.7.10.11 तथा विद्याधरादयः; B2 पूषा चंद्रश्च वैश्रवैः (for the post. half). —(l. 44) D9 om. from the post. half up to the prior half of l. 45. Ñ2 B1.2.4 इवावृतः (B1.2 °वहः) (for इरावतः) D5 विशालाक्षस्तथापरः (for the post. half). M3 ऐरावतो विशालाक्षः शेषो वासुकिरेव च. —(l. 45) D1.3–5 कंबला(D5 °रा)श्चतुरौ (for कम्बलाश्वतरौ). V1.3 M3 नागौ (for चोभौ). T4 कंबलाश्वतरा नागा (for the prior half). Ś कार्कोटक-; D6 ककेटिक- (for कर्कोटक-). —(l. 46) Ś V3 D8.12 सर्वे; B2 स तु (for स च). V3 चोरु- (for घोर-). Ś V3 D8.12 -विषा नागास्; D1.4 -विषो नाम; D5 -विधो नागस् (for -विषो नागस्). Ś D8 तक्षकाश्च; Ñ1 B1–3 D12 M3 तक्षकश्च (for °कः स). Ś3 D8 [उ]पतक्षकाः; V1 [उ]पलक्षकः. D3.5 नाम नामतः; D6 सोमयक्षकः (for सोपतक्षकः). V3 D2 रक्षकः(V3 तक्षकाः) सोपितक्षकः (for the post. half). —(l. 47) Ś D3.12 T4 करजानाश्रितस्; V3 करजाताः स्थितास्; B1–3 करजालाश्रि(B3 °शि)तास्; D2.5.9 °जाताश्रितास् (D9 °तस्); D6.7 °जानास्थितास् (for करजानाश्रितास्). Ñ2 B D6.7.10.11 चैव; D5 चास्य (for तस्य). Ñ2 B1.4 D6–7.10.11 विषवीर्य- (for विषवीर्यं). D3.11 मुमुक्षकः(D11 °तः) (for मुमुक्षवः). —D9 om. l. 48–49. —(l. 48) V3 समाश्रित्य (for अभूत्तस्य). D6 अग्निरास्ये त्वभूत्तस्य (for the prior half). V3 रुद्राव्. D5 स्कंधो रुद्रैरधिष्ठितः (for the post. half). —(l. 49) Ś D12 अब्दा; B1.3 D1.2.4.5 दंता; D3

Anya Research Team

नासा कुहूरमावास्या तच्छिद्रेषु च वायवः। [50]
ग्रीवा तस्याभवद्देवी वाणी चापि सरस्वती।
नासत्यौ श्रवणौ चोभौ नेत्रे च शशिभास्करौ।
वेदाङ्गानि च यज्ञाश्च तारारूपाणि यानि च।
सुवृत्तानि च वाक्यानि तेजांसि च तपांसि च।
एतानि नररूपस्य तस्य देहाश्रितानि वै। [55]
तेन वज्रप्रहारेण लब्धमात्रेण लीलया।
पाणिना पीडितं रक्षो निपपात महीतले।
पतितं राक्षसं ज्ञात्वा विद्राव्य स निशाचरान्।
ऋग्वेदप्रतिमः सोऽथ पद्ममालाविभूषितः।
प्रविवेश च पातालं नृत्यन्पर्वतसंनिभः। [60]

उत्थाय च दशग्रीव आहूय सचिवान्त्वयम्।
क्व गतः सहसा ब्रूत प्रहस्तशुकसारणाः।
एवमुक्ता रावणेन राक्षसास्तमथाब्रुवन्।
प्रविष्टः स नरोऽत्रैव देवदानवदर्पहा।
अथार्सिं गृह्य वेगेन गरुत्मानिव पन्नगम्। [65]
स तु शीघ्रं बिलद्वारं प्रविवेश च दुर्मतिः।
संप्रविश्य च तद्द्वारं रावणो वरनिर्भयः।
अपश्यत्स नरांस्तत्र नीलाञ्जनचयोपमान्।
केयूरधारिणः शूरान्रक्तमाल्यानुलेपनान्।
अङ्गुलीयकवज्राद्यैर्विविधैश्च विभूषितान्। [70]
दृश्यन्ते तत्र नृत्यन्त्यस्त्रियः कोट्यो महात्मनाम्।

अर्ध-; D_8 अक्ष- (for पक्ष-). V_3 -[अ]र्णवश् (for -[ऋ]तवश्). $\tilde{N}_1$ दंता मासतैवस्तस्य; V_1 दंता मासस्तु ऋतवो (for the prior half). $V_{1.3}$ दंतयोर् (for दंष्ट्रयोर्). M_3 (with hiatus) दंतान्मासा दंष्ट्रयोश्च उभयोः ऋतवः स्थिताः. —(l. 50) Ś $\tilde{N}_1$ $D_{8.12}$ नास्या; $\tilde{N}_2$ $D_{1.6.7.10.11}$ नासे (for नासा). $B_{1.4}$ नासाग्रे चाप्यमावास्या (for the prior half). D_6 om. च (subm.). B_{1-3} राघवः (for वायवः). $D_{10.11}$ छिद्रेषु वायवः स्थिताः (for the post. half). —(l. 51) Ś D_8 आस्ये; B_4 जिह्वा; D_{12} आदौ (for ग्रीवा). $\tilde{N}_2$ V_3 B_4 D_1 भवेद् (for [अ]भवद्). $\tilde{N}_1$ V_1 $D_{2.3.9}$ वेदी; B_1 देव (for देवी). D_8 वाण्यां; $D_{10.11}$ वीणा (for वाणी). V_1 देवी; B_2 (m. also as above) चैव (for चापि). —(l. 52) B_1 चरणौ; B_2 $D_{6.7.9-11}$ श्रवणे (for श्रवणौ). D_5 श्रोत्रे (for नेत्रे). —(l. 53) V_1 शेषांगानि (for वेदाङ्गानि). V_1 *om.* च (subm.). $\tilde{N}_1$ च यज्ञश्च; $D_{2.9}$ च सर्वाणि; D_8 च यज्ञानां; D_5 सुवश्चास्य (for च यज्ञाश्च). V_1 जाता; V_3 D_7 T_4 M_3 नाना- (for तारा-). D_5 -रोमाणि (for -रूपाणि). —D_9 om. l. 54. —(l. 54) Ś D_8 संवृतानि च; D_2 गायत्र्यादीनि; D_3 सुवर्तनी च (for सुवृत्तानि च). V_1 विवृतानि च यज्ञाश्च (for the prior half). D_4 om. (hapl.) च तपांसि. $\tilde{N}_1$ V_1 T_4 M_3 तेजः-सिद्धि-; V_3 ऋद्धिसिद्धि- (for तेजांसि च). $\tilde{N}_2$ $B_{2.4}$ वयांसि (for तपांसि). —(l. 55) V_3 नरदेवस्य (for नररूपस्य). B_3 नररूपस्य देहस्य (for the prior half). Ś $D_{8.12}$ देवस्य (Ś$_3$ °वश्रि; $D_{8.12}$ °वाश्रि)तानि; $\tilde{N}_1$ V_1 देहास्थितानि; $D_{2.9}$ M_3 देहं श्रितानि (for देहाश्रितानि). D_5 देहाश्रितानि वैति च (for the post. half). —(l. 56) $\tilde{N}_1$ $V_{1.3}$ $D_{2.9}$ T_4 M_3 मुष्टि- (for वज्र-). Ś B_{1-3} $D_{1.3.4.8.12}$ -प्रभावेण; D_7 -प्रकारेण (for -प्रहारेण). Ś $\tilde{N}_2$ B_4 $D_{3.8}$ नर-; $\tilde{N}_1$ V_1 D_{12} नल्व-; V_3 लघु-; $D_{1.4}$ नख-; $D_{2.9}$ तनु-; T_4 त्वल्प-; M_3 स्वल्प-; L (ed.) तल- (for लब्ध-). D_5 न खल्वत्रेण; G (ed.) लंबमानेन (for लब्धमात्रेण). —(l. 57) $\tilde{N}_1$ पीडयामास; B_4 $D_{5.9}$ T_4 पीडितो रक्षो; $D_{1.4}$ M_3 ताडितं रक्षो (for पीडितं रक्षो). —(l. 58) B_4 पीडितं (for पतितं). $\tilde{N}_1$ मत्वा; $B_{1.2.4}$ $D_{2.8.9}$ T_4 दृष्ट्वा (for ज्ञात्वा). Ś $\tilde{N}_1$ $V_{1.3}$ $D_{2.3.5.8.9.12}$ T_4 M_3 च (for स). D_3 निशाचरं (for निशाचरान्). D_1 विद्रवंत निशाचराः; D_4 विद्रावंत निशाचरं (for the post. half). —(l. 59) D_7 ऋग्वेदः. $\tilde{N}_1$ V_1 -संदृशः; $D_{6.7}$ -प्रथमः (for -प्रतिमः). D_7 (m. also) [ऽ]ति- (for ऽथ). V_3 प्रतिपत्स्याथ (for -प्रतिमः सोऽथ). —(l. 60) V_3 स (for च). Ś $\tilde{N}_1$ $D_{8.12}$ पाताले (for पातालं). $\tilde{N}_1$ $B_{1.3.4}$ नित्यं; $\tilde{N}_2$ $D_{6.7.10.11}$ निजं; B_2 नृत्येन (hypm.); M_3 गच्छन् (for नृत्यन्). B_3 -संनिभं (for -संनिभः). Ś $D_{8.12}$ गृहं पातालसंनिभं; V_1 वृतं पर्वतसंनिभं (for the post. half). —After l. 60, B_2 ins.:

5* महाबाणो महावीर्यः सर्वेषां भयकारकः।

—(l. 61) $\tilde{N}_1$ ह (for च). —Ś D_8 om. l. 62–63. —(l. 62) $D_{1.4}$ स हि तद् (for सहसा). $\tilde{N}_1$ V_1 ब्रूते; D_2 M_3 भूतः (for ब्रूत). V_3 B_1 -सारणान् (for -सारणाः). —(l. 63) B_4 D_6 उक्त्वा (for उक्ता). B_3 तथा; $D_{6.7.10.11}$ ते तदा (for तमथ). —(l. 64) D_6 ततो (for नरो). B_3 देव; $D_{1.5}$ चैव (for ऽत्रैव). —(l. 65) $\tilde{N}$ $B_{1.3.4}$ $D_{2.5-7.10.11}$ T_4 संगृह्य; B_2 (m. also as in B_1) संसृज्य; D_5 [अ]मुं गृह्य (for [अ]र्सिं गृह्य). B_3 पन्नगान् (for °गम्). —(l. 66) D_5 च (for तु). Ś D_8 शीघ्रं स च; $\tilde{N}_1$ V_1 D_{12} T_4 M_3 शीघ्रं स तु (by transp.); V_3 शीघ्रं तु स (by transp.); B_4 स शीघ्रं तद्; $D_{1.3.4}$ अनुपृष्ठं (for स तु शीघ्रं). D_5 बिलद्वारि; D_9 बलिद्वारं (for बिलद्वारं). $\tilde{N}_2$ $B_{1.4}$ $D_{6.7.10.11}$ संप्रविश्य; B_3 प्रविश्य स (for प्रविवेश). Ś$_{1.2}$ $\tilde{N}_1$ $V_{1.3}$ $D_{5.9}$ स; Ś$_3$ B $D_{1-4.8}$ T_4 सु- (for च). —B_2 om. from l. 67 up to 7.39. 22^{ab} (for sequence and om. cf. Sargas 31, 24 and 35). —(l. 67) Ś $\tilde{N}_1$ $V_{1.3}$ $D_{8.12}$ स (for सं-). $\tilde{N}_2$ $B_{1.3.4}$ $D_{6.7.10.11}$ प्रविवेश च; M_3 प्रविश्य च स (for संप्रविश्य च). V_3 तदा (for च तद्). B_3 चत्वारं (for तद्वारं). $D_{1.3.4}$ ततः प्रविश्य द्वारेण; T_4 प्रविश्य च तदा द्वारं (for the prior half). $\tilde{N}_2$ $B_{1.4}$ $D_{6.7.10.11}$ निर्भयस्तं(D_6 °यं त)दा; V_1 बलनिर्भय; V_3 लोकरावणः; B_3 निर्भयस्ततः (for वरनिर्भयः). —(l. 68) V_1 $D_{2.5.9}$ M_3 च (for स). $D_{1.3.4}$ तत्र पुरुषान् (for स नरांस्तत्र). $\tilde{N}$ $B_{1.3.4}$ D_6 सं(Ñ$_1$ स) प्रविश्य त्वपश्यद्वै; $D_{7.10.11}$ स प्रविश्य च पश्यद्वै (for the prior half). —(l. 69) D_5 कांश्चिद् (for शूरान्). —(l. 70) M_3 -हारावैर् (for -वज्रावैर्). $\tilde{N}_2$ $B_{1.3.4}$ $D_{6.7.10.11}$ वरहाट(B_1 अद्वितीय)करलावैर् ($\tilde{N}_2$ $B_{1.4}$ °लौवैर्; B_2 °ल्लाहैर्) (for the prior half). B_3 विवरैश्; M_3 भूषणैश् (for विविधैश्). Ś $D_{8.12}$ अपि (for च वि-). —(l. 71) Ś $D_{1-3.8.9.12}$ T_4 M_3 नृत्यंतस्; D_6

Aryan Research Institute

नित्योत्सवा वीतभया विमलाः पावकप्रभाः।
नृत्यन्त्यः पश्यते तत्र राक्षसो भीमविक्रमः।
द्वारस्थो रावणस्तेषां तिस्रः कोट्यस्तु निर्भयाः।
यथा दृष्टः स तु नरस्तुल्यास्ते तस्य सर्वशः। [75]
एकवर्णानेकबलानेकरूपान्महौजसः।
चतुर्भुजान्महोत्साहांस्तत्रापश्यत्स राक्षसः।
तांस्तु दृष्ट्वा दशग्रीव ऊर्ध्वरोमा बभूव ह।
स्वयंभुवा दत्तवरस्ततः शीघ्रं विनिर्ययौ।
अथापश्यत्परं तत्र पुरुषं शयने स्थितम्। [80]
पाण्डुरेण महार्हेण शयनासनवेश्मना।
शेते स पुरुषस्तत्र पावकेनावगुण्ठितः।

दिव्यस्रगनुलेपा च दिव्याभरणभूषिता।
दिव्याम्बरधरा साध्वी त्रैलोक्यस्यैव भूषणम्।
वालव्यजनहस्ता च देवी तत्र व्यवस्थिता। [85]
लक्ष्मीर्देवी सपद्मा वै भ्राजन्ती लोकसुन्दरी।
प्रविष्टः स तु रक्षेन्द्रो दृष्ट्वा तां चारुहासिनीम्।
जिघृक्षुः सहसा साध्वीं सिंहासनमुपस्थिताम्।
विना तु सचिवैस्तत्र रावणो दुर्मतिस्तदा।
हस्ते ग्रहीतुं तामैच्छन्मन्मथेन वशीकृतः। [90]
सुप्तमाशीविषं यद्वद्रावणः कालनोदितः।
अथ सुप्तो महाबाहुः पावकेनावगुण्ठितः।
ग्रहीतुकामं तं ज्ञात्वा व्यपविद्धपटं तदा।

नृत्यं च (for नृत्यन्त्यस्). B1 नृत्यतस्तत्र शूराणां (for the prior half). B1 कोटीर् (for कोट्यो). B1 D5.6 M3 महात्मनः (for महात्मनाम्). —(l. 72) Ś D8.12 नित्योज्ज्वलाः; D10.11 नृत्योत्सवा (for नित्योत्सवा). Ś V1 D2.5 8.9.12 M2 शांतभया; Ñ1 शांतमना; V3 शांतिं° (for वीतभया). Ñ1 निर्मलाः; B4 विमनाः (for विमलाः). V3 स्वधिक- (for पावक-). D1.3.4 नित्योत्सवान्शांतभयान्विमलान्पावकप्रभान्. —(l. 73) Ś D5.12 क्रीडंतीः; Ñ1 V1 B1.3.4 D8.9 क्रीडंतः(B4 °त्यः); Ñ2 V3 क्रीडंति; D2 क्रीडंतं; D3 क्रीडितैः; D11 नृत्यंतः; G (ed.) क्रीडतः (for नृत्यन्त्यः). V3 पश्यतस्; D3 रावणस्; D5 प्रेक्षते; D8 पश्यतां (for पश्यते). Ñ2 D6.7.10.11 तास्तु; B1 तांस्तु (for तत्र). D1.4 क्रीडतः पश्य तत्रस्ते(D4 °स्तां); M3 क्रीडतः प्रेक्षते तान्वै (for the prior half). Ñ2 B1.3.4 D6.7.10.11 रावणो; D3 प्रेक्ष्यते (for राक्षसो). B4 लोकरावणः (for भीमविक्रमः). V3 राक्षसा भीमविक्रमाः (for the post. half). —(l. 74) Ñ2 B D1.3.4.6.7.10.11 तत्र (for तेषां). Ñ2 D6.7.10.11 तासु; B4 त्रिषु (for तिस्रः). Ñ1 V1 स; D1.3.4 सु- (for तु). Ñ2 B1.3 D5–7.10.11 कोटि(B1 °टी)षु(D5 °टिः सु-); V3 कोट्यः सु-; B4 लोकेषु (for कोट्यस्तु). Ñ2 B1.4 D5–7.10.11 निर्भयः (for °याः). G (ed.) तिस्रः कोटिर्विनिर्भयः (for the post. half). —(l. 75) V3 अथ दृष्टः; D5.8 यथा दृष्टः (for यथा दृष्टः). B4 transp. स and तु. D1.3.4 पुरुषस् (for तु नरस्). B3.4 [s]पि च (for तस्य). Ñ2 D7.10.11 तुल्यांस्तानपि; V1.3 तुल्यास्तस्य च; B1 तुल्यास्ते तेन; D1.3.4 तत्तु(D3 स तु)ल्या युधि(D3.4 °ध-); D6 तुल्यस्तानपि (for तुल्यास्ते तस्य). T4 वर्चे* (for सर्वशः). —(l. 76) Ñ1 V1 त्वेकगुणान्; V3 D2 त्वेकनरान्; D6 एकप्रभान्; D7.10.11 एकवेषान् (for एकबलान्). B1 एकवर्णा एकवेषा; B3 D2.5.9 M3 एकवर्णास्त्वेकव(B3 °क)लान् (for the prior half). B1 एकरूपा (for °रूपान्). —(l. 77) D3 om. स (subm.). Ñ1 ततोपश्यत; V1 D3 तत्र पश्यत; B3 तत्र पश्यति; B4 D5.6.9 T4 तत्रापश्यत (for तत्रापश्यत्स). V1.3 B1 T4 M3 रावणः (for राक्षसः). —(l. 78) D4 om. तु (subm.). Ñ1 V1 B3.4 M3 दृष्ट्वाथ; B1 D2.3.5.9 दृष्ट्वा स (for तु दृष्ट्वा). V3 तूर्ध्वरोमा. —(l. 79) D1.3.4 तत्र (for ततः). —(l. 80) D1 यथापश्यत्. M3 भुजंग- (for पुरुषं). D5 पावकप्रभं; T4 शयनस्थितं (for शयने स्थितम्). —After l. 80, D5 ins.:

6* महानुरूपं श्रीमन्तं दिव्यं च शयने स्थितम्।

—(l. 81) Ñ1 दीप्तशयन- (for शयनासन-). Ś D8.12 शयनी (Ś3 D3 °ने)येन संवृतं; D5 पवनाशनशालिना; M3 कौस्तुभेन विराजितं (for the post. half). —(l. 82) B3 च (for स). Ś1.3 D8 [इ]व; Ś2 [ए]व (for [अ]व-). B3 T4 M3 -कुंठितः (for -गुण्ठितः). —T4 om. (hapl.). l. 83. —(l. 83) Ś D8.12 -अनुलेपादि(Ś1 °पा हि); V3 M3 °लेपी च; B1.3 °लोमा च; D1.3.4 -गंधलेपा च; D2.5.9 -अनुलिप्तां(D2 °प्ता) च(D9 °प्तांगो) (for अनुलेपा च). V3 D5.9.12 M3 -भूषितः(D5 °तां) (for -भूषिता). —(l. 84) Ñ1 दिव्यांबरा धरा साध्वी; V3 °धरः स्रग्वी; D5 दिव्यांबरधरां साध्वीं; D9 दिव्यांब * * रा साध्वी (for the prior half). —D5 om. (hapl.) from त्रैलोक्यस्य up to साध्वीं in l. 88. Ñ1 शरीरस्य (for त्रैलोक्यस्य). Ś Ñ2 V1.3 B4 D3.4.8.12 [इ]व; D7.10.11 [ए]क- (for [ए]व). V3 सुंदरः; D9 भूषणे (for भूषणम्). M3 विभूषणं. —(l. 85) B1.3.4 D2.9 M3 बालव्यजन-. —(l. 86) Ś3 Ñ2 D2.6–8.10–12 लक्ष्मीदेवी; V1.3 B1.3.4 D1.3.4 M3 लक्ष्मीरिव(D1.3.4 °रेव; M3 °व हि) (for लक्ष्मीर्देवी). Ñ2 B1.3.4 D6.7.10.11 भ्राजते (for भ्राजन्ती). —Ñ2 illeg. for l. 87. —(l. 87) Ś1 Ñ V1.3 D2.8.9.12 T4 M3 प्रहृष्टः (for प्रविष्टः). Ñ1 D1.3.4 पौलस्त्यो; Ñ2 B4 T4 M3 लंकेशो; V3 दैत्येंद्रो (for रक्षेन्द्रो). Ñ2 illeg. for तां चारुहासिनीम्. B4 वै (for तां). Ñ1 transp. दृष्ट्वा and तां. D6 चारुभाषिणीं. —(l. 88) V1.3 T4 M3 स तदा (for सहसा). Ñ1 V3 D1.4.12 M3 उपाश्रितां (for उपस्थिताम्). Ñ2 B1.3.4 D6.7.10.11 सिंहासन-समास्थि(B3 °श्रि)तां (for the post. half). —(l. 89) Ñ2 D6.7.10.11 [अ]पि; D1.2.5.9 च (for तु). D11 दुर्मदस् (for दुर्मतिस्). —(l. 90) M3 हस्तैर्. Ñ2 B4 तां चापि; V3 तामेव; B3 D2.9 तामिच्छन्; D6.7.10.11 अन्विच्छन् (for तामैच्छन्). Ñ1 हस्तेनैव ग्रहीतुं ताम्; B1 हस्तेन गृहीतं चापि (for the prior half). Ñ1 ऐच्छन्काम-(for मन्मथेन). D1 च पीडितः; T4 वशंगतः (for वशीकृतः). D5 मन्मथस्य वशंगतः (for the post. half). —(l. 91) V1 -विषवत्तद् (for -विषं यद्वद्). Ñ V3 B1.3.4 D2.6 T4 M3 कालचोदितः; V1 कालदेशितः (for कालनोदितः). —(l. 92) Ś D8.12 असुप्तः स (for अथ सुप्तो). D1.3.4 महातेजाः (for °बाहुः). T4 M3 -कुंठितः (for- गुण्ठितः). —(l. 93) D1 ग्रहीतुं (for ग्रहीतु-). Ś Ñ1 V1 B4 (m. also) D2–4.7.9 T4 M3 व्यपविध्य; V3 ह्यपविध्य (for व्यपविद्ध-). Ñ1 -पटं; D1 -[अ]परं; D6.7 -परं (for -पटं). Ś1 यथा; Ś2.3 D2.8.12 तथा

जहासोच्चैर्भृशं देवस्तं दृष्ट्वा राक्षसाधिपम् ।
तेजसा तस्य संदीप्तो रावणो लोकरावणः । [95]
कृत्तमूलो यथा शाखी निपपात महीतले ।
पतितं राक्षसं ज्ञात्वा वचनं चेदमब्रवीत् ।
उत्तिष्ठ राक्षसश्रेष्ठ मृत्युस्ते नाद्य विद्यते ।
प्रजापतिवरो रक्ष्यो येन जीवसि राक्षस ।
गच्छ रावण विस्रब्धो नाधुना मरणं तव । [100]
लब्धसंज्ञो मुहूर्तेन रावणो भयमाविशत् ।
एवमुक्तस्तथोत्थाय रावणो देवकण्टकः ।
लोमहर्षणमापन्नो ह्यब्रवीत्तं महाद्युतिम् ।
को भवाञ्शौर्यसम्पन्नो युगान्तानलसंनिभः ।
ब्रूहि त्वं को भवान्देवो भूतो वेह व्यवस्थितः । [105]

एवमुक्तः स तेनाथ रावणेन दुरात्मना ।
प्रत्युवाच हसन्देवो मेघगम्भीरया गिरा ।
किं ते मया दशग्रीव वध्योऽसि नचिरान्मम ।
एवमुक्तो दशग्रीवः प्राञ्जलिर्वाक्यमब्रवीत् ।
प्रजापतेस्तु वचनान्नाहं मृत्युवशं गतः । [110]
न स जातो जनिष्यो वा मम तुल्यः सुरेष्वपि ।
प्रजापतिवरं यो हि लङ्घयेद्वीर्यमाश्रितः ।
न तत्र परिहारोऽस्ति प्रयत्नश्चापि दुर्बलः ।
न तं पश्यामि त्रैलोक्ये यो मे कुर्याद्वरं वृथा ।
अमरोऽहं सुरश्रेष्ठ तेन मे नाविशङ्कयम् । [115]
अथापि च भवेन्मृत्युस्त्वद्धस्तान्नान्यतः प्रभो ।
यशस्यं श्लाघनीयं च त्वद्धस्तान्मरणं मम ।

(for तदा). Ñ2 व्यवचत तदा स च; B4 परश्शथि करेण सः; D5 देवदेवो महाप्रभुः (for the post. half). —(l. 94) D5.6 स (for तं). Ś D8.12 transp. तं and दृष्ट्वा. V1 राक्षसोत्तमं; D2.5.9 राक्षसर्षभं (for °साधिपम्). —(l. 95) Ñ2 B1.3.4 D6.7.10.11 सहसा (for तस्य सं-). —After l. 95, Ñ1 V1.3 D3.5 T4 M3 ins.:

6* घोणावातेन दीर्घेण तस्मिन्नाम रसातले ।

[D3 घोर-; T4 प्राण-; M3 घ्राण- (for घोणा-). D5 -पातेन (for -वातेन). T4 दीप्तेन (for दीर्घेण).]

—Ñ1 cont.:

7* वायुरेको यथा तूलं स दूरं नीयते तथा ।

—(l. 96) B4 D7.10.11 कृंत° (for कृत्त°). Ñ1 इवाशाखी; B1 D2.5.9 यथा वृक्षो (for यथा शाखी). —(l. 97) Ś1.3 Ñ1 B4 D1.2.5.9 दृष्ट्वा (for ज्ञात्वा). D6 देवम् (for चेदम्). —(l. 98) B3.4 D5.12 T4 नात्र (for नाद्य). Ś V3 D8 वर्तते (for विद्यते). —(l. 99) D9 प्रजापतेर् (for प्रजापति-). B3 -वराद् (for -वरो). Ś D8.12 दत्तो; Ñ2 V3 B2.3 D2–5 M3 रक्षो (for रक्ष्यो). Ñ B1.3.4 D6.7.10.11 तेन (for येन). D2 रक्षसि; D5.12 जीवति (for जीवसि). T4 M3 रावण (for राक्षस). —(l. 100) Ś Ñ1 V1.3 D8.12 T4 M3 विस्र(V3 °श्र)ब्धं; Ñ2 B2.3 D1–5.7 विश्रब्धो. M3 नात्र वै (for नाधुना). —(l. 101) After the prior half of l. 101, M3 ins.:

8* राक्षसो भीमविक्रमः ।
तं तु दृष्ट्वा महात्मानं.

